कविदयिता

(महादेवभट्टविरचिता पैङ्गलसूत्रवृत्तिः)

संपादिका

डॉ. शैलकुमारी मिश्र

कविदयिता

(महादेवभट्टविरचिता पैङ्गलसूत्रवृत्तिः)

संपादिका

डॉ. शैलकुमारी मिश्र

कविदर्पिता

(महादेवभट्टविरचिता पैङ्गलसूत्रवृत्तिः)

संपादिका

डॉ. शैलकुमारी मिश्र

विद्यावारिधि (पी-एच.डी.)

प्रवाचक

राष्ट्रियसंस्कृतसंस्थान (मा.वि.वि.)

गंगानाथ झा परिसर, आजाद पार्क, इलाहाबाद

अलका कम्प्यूटर्स एण्ड प्रिन्टर्स

108/5 छोटा बघाड़ा, इलाहाबाद

2006

संपादिका-

डॉ. शैलकुमारी मिश्र
प्रवाचिका
राष्ट्रिय संस्कृत संस्थान (मानित विश्वविद्यालय)
गंगानाथ झा परिसर, आजाद पार्क, इलाहाबाद

प्रकाशन वर्ष- २००६

संस्करण प्रथम (५०० प्रतियाँ)

मूल्य १२५.००

प्रकाशक

अलका कम्प्यूटर्स एण्ड प्रिन्टर्स
108/5 छोटा बघाड़ा, इलाहाबाद
दूरभाष- 3299113 (0532)

आत्मनिवेदनम्

काश्यां पाराणसेव संस्कृत-विश्वविद्यालयश्च (सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य) साहित्य विभागे तदानीमध्यक्षपदमलङ्कुर्वतां गुरुवर्याणां श्रीबटुकनाथ शास्त्रिखिस्तेमहाभागानांमादेशेन मम छन्दश्शास्त्राध्याध्ययने प्रवृत्तिरुदिता। तेरुपदिष्टं यत् काव्याङ्गभूतेषु रसदोषगुणरीत्यलङ्कारादिविषये बहवो ग्रन्थाः कृतयः निबन्धाश्च प्रकाशिताः प्रतिदिनं प्रकाश्यन्ते च। उक्तविषयेषु, अद्यत्वेऽपि प्रचुराणि शोधकार्याणि च जायन्ते। किन्तु वेदाङ्गपादभूतस्य पद्यमय काव्याङ्गाधारभूतस्य चच्छन्दसोविषये विदुषां शोधकर्तृणां च प्रवृत्तिरल्पीयसी एव दृश्यते।

अद्यतने युगे प्रवर्तमानासु काव्यधारासु छन्दसां नवीनापि-नवीनामि रूपाणि आविर्भवन्ति। पाश्चात्य काव्यच्छन्दोधाराप्रभावेण अधुनातभारतीय काव्यच्छन्दोधारा प्रभाविता संलक्ष्यते। यथा पाश्चात्य कवितासु यति-वर्ण-मात्रा-संख्या क्रमादीनविगणय्य स्वछन्दच्छन्दोधारायां रचनाप्रवृत्तिरवलोक्यते तथैव भारतेऽपि बङ्गतैलगुतमिलमलयालभप्रभृतिविविधभाषाकाव्येषु स्वच्छन्दं प्रवर्तते। अनया स्वच्छन्दश्छन्दप्रयोगप्रवृत्या गतानुगतिकन्यायेन अङ्गहिन्दीकवय इव आधुनिकसुरभारतीकवयोऽपि प्रभाविताः। ते संस्कृतकाव्येष्वपि स्वच्छन्दश्छन्दप्रयोगं कुर्वन्ति। तुकान्तमतकान्तं षड्पदी चतुष्पदीदशपदी रथच्छन्द इत्यादि प्रकारेण छन्दसां नवीनान् नवीनान् प्रयोगात् कुर्वन्ति। अनेन प्रकारेण गद्यपद्यकाव्ययोः परस्परं महदन्तरं न प्राप्यते। अतएव विचारणीयम् सहस्रवर्षपूर्वं वाङ्मयत आरभ्य एव मात्रिकवार्णिकच्छन्दसां विषये ऋषीणामाचार्याणां च महान् प्रयासः किमर्थः? व्याकरणादिविशिष्टशास्त्राणां यथा वेदाङ्गत्वं प्रतीतं तथैव छन्दश्शास्त्रस्यापि वेदाङ्गत्वमङ्गीक्रियते। यदि च्छन्दसां किमपि महत्वं न स्यात् तदाछन्दशास्त्रत्रयस्य प्रारम्भ एवं व्यर्थः स्यात्।

एतदुक्तानि अतामब्जस्यानि मनसि निधाय छन्दश्शास्त्रविषये प्राचीनानामाधुनिकानाञ्च प्राच्यानां प्रतीच्यानाञ्च विदुषां छन्दोविषयिणीं दृष्टिमालोचयितुं मनसिभावउदपद्यत। किन्तु एतस्मिन्नन्तरे छन्दोविषक एको ग्रन्थोदृष्टिपथमागच्छत्। स च पिङ्गलाचार्यप्रणीतच्छन्दःसूत्राणां वृत्तिरूपेण श्रीमहादेवभट्टाचार्यप्रणीता वर्तते।

छन्दःसूत्रस्य भाष्यग्रन्थाटीकाग्रन्थाश्चबहुश उपलभ्यन्ते किन्तु वृत्तिर्ग्रन्थाः अत्यल्पा एव। अस्य वृत्तिग्रन्थस्य एका एव प्रतिलिपिरुपलब्धा ग्रन्थोऽयं केटलागस्केटलागरे प्रसिद्धसंस्कृतग्रन्थागारेष्वपि अन्विष्टः किन्तु अस्य ग्रन्थस्य प्रतिलिपिः कुत्रापि लोपलब्धा। उत्तरप्रदेशस्य प्रथित पण्डितकुलस्य श्री प्रेमनाथत्रिपाठिनः संगृहीहस्तलिखितपुस्तकेषु अयं मूल्यवान् छन्दोवृत्तिर्ग्रन्थः प्राप्तः। प्रायः सार्धशतद्वयशब्दपूर्वेयं मातृका वर्तते।

अयं ग्रन्थः प्राचीनलिपिबद्धः विरामरेफानुस्वारादि शुन्योऽतीव दुष्पाणे वर्तते। गुरुभिल्पदि-टासं सम्पादनद्वारा अस्योन्तग्रन्थस्योद्धारर्थं संरक्षणार्थ च प्रवृत्ता।

महर्षिपिङ्गलाचार्य विरचितस्य छन्दशास्त्रस्य सन्ति अनेकापि भाष्यवृत्तिव्याख्याव्याख्यानानि तथापि अस्य महादेवभट्टाचार्यविरचितस्य पिङ्गलच्छन्दः सूत्राणां वृत्तिग्रन्थस्यास्ति किमपि वैशिष्ट्यम् अन्यपूर्वोक्त भाष्यादिभ्योऽतिशायि वैलक्षण्यं च। तत्सर्वं भूमिकायां सविशदं विवेचितम्।

ममसंपाद्यविषयस्यास्यग्रन्थस्य प्रतिलिपिर्हरिप्रस्ये 1712 वैक्रमाब्दे कृतास्ति। प्रतिलिपिकारः प्रायोऽल्पशो भवत्येव अस्यापि प्रतिलिपिकारोऽत्यल्पज्ञः प्रतिभाति। दिल्ल्वां प्रतिलिपिरभवत् अतोऽक्षरेष्वपि गुत्रमुखीलिप्या आकारप्रकार प्रभावः स्पष्टं लक्ष्यते। श ष स'' त्रयाणं शकाराणं कृते प्रतिलिपिकारहस्तेन न कोऽपि भेदः प्रकाश्यते। अत्यल्पस्थलेषु पूर्णविरामाः सन्ति। एवं प्रतिलिपिकारकृता अन्या बहव्यस्त्रुट्यः सन्ति। यथा -

क्वचिदक्षरच्युतिः क्वचिदक्षरवृद्धिः क्वचित् पदलोपः क्वचिद् वाक्यलोपः क्वचिद् वर्णविपर्यश्च। तथापि ग्रन्थस्य बहूपादेयतया अवश्यं सम्पादनीयामिति मत्वा अनेककलेशजातं सोढ्वापि यथाकथञ्चित् सम्यक्तया अयं ग्रन्थः सम्पादितः। यद्यपिसम्पादनार्थं प्रचलितनियमानुरोधेन निम्नतया विभिन्नाः तिस्त्रः प्रतिलिप्याऽपेक्षणीया भवन्ति। वाराणसेय-संस्कृत विश्वविद्यालये शोधधिकारिणं विदुषां मार्गदर्शकानां पुरस्तादयं विषय उपस्थित आसीत् मयकापि ते अधिकारिणोजनाविद्वांसो निर्देशकाश्च संस्मारिताः किन्तु तेरस्य वृत्तिग्रन्थस्य उपादेयत्वं निर्धाय प्राप्तेक प्रतिलिप्याधारेणापि सम्पादनकार्यं कर्तुमुपदिष्टा आदिष्टा च।

अस्मिन् सम्पादनकर्मणि प्रवृत्ताया मम कृते स्वीकयविषयसम्बन्धिमहत्काठिन्यमासीत यत्कृते गुरुणां साहाय्यमपेक्षितमासीत्। कतिपयानां छन्दसां तदुदाहरणनाञ्च साधुत्वविचारप्रसङ्गे वैमतयोपस्थिते सति ये

महानुभवाः स्वीयेन समुचितेन निर्देशेन यत् साहाय्यं कल्पितवन्तः तेषां कृते कातज्ञप्रकाशनार्थमधमर्णतां ज्ञापनार्थञ्च न ते शब्दा ये समर्थाः स्युः। अतः तेष पुण्याभिधानस्मरणमाश्रेण मोदमावहामि। तत्र सर्वप्रथमं साहित्यशस्त्रावतारभूतानां आचार्यप्रवराणां गुरुपादानां इदानीं शिवयाजुत्य प्राप्तानां श्री बटुकनाथशास्त्रिचित्ते महाभागानां कृते नास्ति तादृकेकोऽपि शब्दो येन एतद् कृतोपकारसाहाय्योपदेरप्रभृतीनां च कृते कृतज्ञतां प्रकाशयामि। मार्गनिर्दशेन समुचितपरामर्शप्रदानेन एते भृशमुपकृतवन्तः। तपः पूतानामुपकारैकमूर्तीनां सकलशास्त्रमर्मज्ञानां गुरुवर्याणां पं. श्रीलालविहारिमिश्रमहोदयामुपकारजातं न कदापि विस्मर्तु शक्यते यस्यानुग्रहेणेवास्मिन् कार्ये साफल्यमवाप्तम्। अनेकशास्त्राभ्यासाधिगतनिष्पन्नमतीनां परमोदारचेतसां चरणानां डा. मुरलीधरपाण्डेयमहाभागानां चरणेषु प्रणतिततिं समर्पयामि, एतद् ग्रन्थसम्पादने अस्मद् गुरुवरेः पूज्यपादेः श्री श्रीधर वार्ष्णिमहोदयैः सम्पादितस्य यादवप्रकाशकृतपिङ्गलनागच्छन्दोविचितिभाष्स्य यथेच्छमुपयोगः कृतोमहत्साहाय्यं च गृहीतम् अत एतदर्थ भूपोभूयः प्रणामाञ्जलिं समर्पये।

अस्मिन् शाोधकार्ये पाठान्तराभावात् ग्रन्थस्यास्य शुद्धपाठनिर्धारणायं खण्डितपाठपूरणार्थमधिकपाठनिस्सारणार्थमक्षरादिवृद्धिच्युतिदोषनिरसनार्थं एकैव गतिरासीत् सा चैतद्विषयकाणां ग्रन्थातराणां एतत्समानाभिप्रायाकाणां ग्रन्थन्तराणां च साहाय्यम्। एतदर्थ वाराणसेय-संस्कृत-विश्वविद्यालयपुस्तकालयवाराणस्यां विश्वनाथपुस्तकालय-प्रयागस्य गङ्गानाथ-केन्द्रीय-संस्कृतविद्यापीठपुस्तकालय-अम्मूस्थ श्री रणवीर केन्द्रीय संस्कृत विद्यापीठ पुस्तकालय तत्रैव रघुनाथपुस्तकालयप्रभृतीनां साहाय्यमवाप्तम्। एतदर्थ एते सर्वेषां पुस्तकालयाध्यक्षणामधिकारिणाञ्च कृते आत्मीयां कृतज्ञतां प्रकाशयामि। ये चास्मिन् कर्मणि येन केनापि प्रकारेण उपकृतवन्तस्तेषां सर्वेषां कृते कृतज्ञतां बिभर्मि।

अन्ते च भगवदाशुतोष साम्बसदाशिवचरणारविन्देषु सादरं प्रणति वतिसमर्पये येनेदसाध्यमपि साध्यमभवत्। शमिति।

अथ च सुष्ठुमुद्रणार्थश्री विनोद कुमार द्विवेदिनः धन्यवादं करोमि।

विषयानुक्रमः

भूमिका

संस्कृतवाङ्मये छन्दः शास्त्रयातीव महत्त्वम्। वेदानां षट्ष्वङ्गेषु अन्यतममङ्गं छन्द इति। वेदाङ्गेषु छन्दःशास्त्रं वेदानां पादाविति पाणिनीयशिक्षायामुक्तम्।[1] किन्तु ऐतरेय आरण्यके तु वैदिकानि सप्तछन्दौसि वेदपुरुषस्य सप्ताङ्गानीति वर्णितम्। यथा हि- तस्योष्णिङ् लोमीन, त्वङ् गायत्री, त्रिष्टुबमांसमनुष्टुव्‌ृ सवनानि, अस्थि जगती, पंवितर्मज्जा प्राणो बृहती।[2]

एतानि च वेदकानि छन्दांसि सप्तभवन्ति- गायत्र्युष्णिगनुष्टुप् पंवितबृहतीजगत्यः इति।[3] ऋग्वेदीयेपुरुषसूक्ते च छन्दसां यज्ञादुत्पत्तिरजायत इति वर्णितम्। यथा हि मन्त्रः -

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानिजाज्ञिरे।

छन्दांसि जज्ञिरे तस्मात् तस्माद यनुरजायत।।[4]

ऋग्वेदस्य-यत्पूर्वे साध्याः सन्ति देवा[5] इति मन्त्रभागस्य व्याख्याने ऐतरेये छन्दांसि वेसाध्यादेवा इति लिखितम्। एतमेव शुक्ल यजुर्वेदे (1/27) (23/33), (38/6) ऐतरेयादि ब्राह्मणेषु आरण्यकेषु च ''छन्दः'' शब्दः आयाति। विशेषतः छन्दसां विचारः सामेवेदस्य निदानसूत्रे, साङ्ख्यायानश्रौतसूत्रे कात्यायनप्रणीतायां सर्वानुक्रमण्यां यजुःसर्वानुक्रमण्यां च द्रष्टुं शक्यते। किन्तु एतेषु सामान्यत एव छन्दः शब्दस्य चर्चा अस्ति। भरतमुनिस्तु कथयति यत् ''छन्दोहीनो न शब्दोऽस्ति च्छिन्दःशब्दवर्जितम्।''[6] अनेन शब्दानामिव छन्दसामपि

---

1 पाणिनीय शिक्षायाम् 42-6

2 ऐतरेय ब्राह्मणे 2-1-6

3 ऋग्वेद 10-130-3

4 ऋग्वेद 10-90-9

5 तत्रैव 10-90-16

6 नाट्यशास्त्रे 15-42

अनादित्वं सिद्धं भवति। आधुनिकेऽविद्वत्सु मेकडॉनलमहोदयेन[1] कीथमहोदयेन[2] च छन्दोविष्ये बहुधा विचारितम्।

श्रीमदनन्तरार्मधुपकरमहोदयेन पिङ्गलसूत्रस्य व्याख्यायां एतत प्रकाशितं यत छन्दःशास्त्रस्य व्यवस्थितं रूपं साङ्ख्यायनश्रौतसूत्रे एव सर्व प्रथमं प्राप्यते। निदानसूत्राणाञ्च कालः सांख्यायनश्रौतसूत्राणामनन्तरमस्ति। परन्तु छन्दोरुपेण यादृशनिछन्दांसि प्रस्तुते अध्ययने तात्पर्य विषयीभूतानि सन्ति तादृशानां छन्दसां स्पष्टतया उल्लेखो भरतस्य नाट्यशास्त्रे अस्ति। वस्तुतः लौकिकानां छन्दसां प्रयोगः आदिकवितः आरब्धः। आदिकवेवाल्मीकेर्मुखात् क्रौञ्चयुगलस्य वियोगोत्थः शोकः श्लोकरूपेण प्रथमतया प्रकटीभूताः। यथा च कालिदासोऽपि घटनामिमां पद्येनानेनर्रघुवंशस्य चतुदर्शसर्गेनिबवन्ध।

तामभ्यगच्छन रुदितानुसारी कविःकुशेध्माहरणाययातः।

निषादविद्धाण्डजदर्शनोत्थःश्लोकत्व मापद्यत यस्य शोकः।।[3]

(क) छन्दःशास्त्रस्य प्रयोजनम् - महन्तमोज्ञानराशिः परमात्मस्वरूपो वेदः सम्पूर्णस्य वाङ्मयस्य सनातनः आदिभूतोनिधिः। तस्य च वेदस्य पादो छन्दः। यथा पाणिनीय शिक्षायां वेदपुरुषस्याङ्गानि -

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।

कल्पश्चेति षङ्गानि वेदस्याहु र्मनीषिणः।।[4]

वेदस्य पादो छन्दः इत्युक्तम् -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते।

ज्योतिषभयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।

शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्ग मधीत्यैव ब्रह्मलोके महीयते।।[1]

---

1 ए. ए. मैक्डॉनल : ए हिस्ट्री ऑफ संस्कृत लिट्रेचर, द्वितीय संस्करणे 1961 ई. पृ. 204।

2 ए. बी. कीथ : ए. हिस्ट्री ऑफ संस्कृतलिट्रेचर पृ. 415

3 रघु. 14-70

4 पाणिनीयशिक्षा पृष्ठ 41

अनेन वेदानामधश्छन्दः।

वेदानां गतिश्च छन्दसा इत्याख्यातम्। तेन छन्दसां ज्ञानं विना वेदाध्ययनं पङ्गुवद् भवति। एवं विधूच्छन्दसां माहात्म्यं निर्धाय मन्त्राणां विनियोगे छन्दसां सन्निवेशः कृतः। विनियोगं विना मन्त्राणां जपानुष्ठानादिकं निष्फलं श्रूयते। विनियोगे ऋषिः देवताच्छन्दश्च विनियुज्यन्ते। भट्टमुकुलात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ छन्दसां ज्ञानस्य ऐहलौकिक पारलौकिक परनार्थत्वप्रदानस्य हेतुत्वमुक्तम् -

छन्दांसि अभिधेयानि तत्परिज्ञान प्रयोजनम् वेदिकानामुपस्थानादौ विनियुक्तानां गायत्र्यादीनां परिज्ञानस्य पुरुषार्थसाधनविधिराधिकारित्व सम्पन्त्या स्वर्गाद्यवाप्तिप्रयोजनमिति। तथा च आर्षेय ब्राह्मणे अपि छन्दोज्ञानस्य महत्त्वमेवं प्रतिपादयति। तथाहि-

"यो हि वा अविदितार्षेयच्छन्देदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स स्थाणुं वार्च्छति गर्तं वा प्रपद्यते प्रमीयते वा पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्तीति।"[2]

एवमेव वृहद्देवतायामपि -

"ऋषिन्तु प्रथमं ब्रूयात् छन्दस्तु तदनन्तरम्।

देवतामथ मन्त्राणां कर्मस्वेवामिति श्रुतिः।।[3]

तन्तत् छन्दसां तन्त्रत् देवास्तथा तन्तव् सम्बन्धिनो ऋषयः प्रसन्ना भवन्ति। ऐतरेयारण्यके उक्तम् यत् छन्दांसि वेदपुरुषस्याङ्गानि तस्योष्णिङ्लोमानि त्वङ् गायत्री त्रिष्टुब् मासम् अनुष्टुप् स्नायुः अस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती।[4] अतः वेदपाठस्य फलप्राप्तये छन्दोज्ञानमत्यावश्यकम्। ऋग्वेद प्रातिशाख्ये उक्तम् यत् छन्दोज्ञः स्वर्गममृतत्वञ्च प्राप्नोति -

या छन्दसां वेदविशेषमेतम्

भूतानि च वैष्टुभ जागतानि।

---

1 पाणिनीयशिक्षायाम् 42-6

2 आर्षेय ब्राह्मण 1-1

3 बृहद् देवतायाम् 4-13-138

4 ऐतरेय आरण्यके 2-1-6

सर्वाणि रूपाणि च भक्ति तोयः

स्वर्गं जयत्येभिरथामृतत्वम्।।[1]

शुक्लयजुः सर्वानुक्रमणिकायां छन्दोज्ञानं विना यः वेदमधीते तस्य वेदज्ञानं निर्बीजं भवति इति कात्यायननोक्तम् -

एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजति याजयते तस्य ब्रह्मनिर्वीयं यातयामम्भवति।[2]

तैत्तिरीय ब्राह्मणे यज्ञसम्पादनायं छन्दोज्ञानमत्यावश्यकमित्युक्तम्।

यथा- तस्मात्सप्त चतुसन्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते।[3]

छन्दोविचिति भाष्ये यादवप्रकाशेनोक्तम् यच्छन्दोज्ञानरहितेन पुरुषेण मन्त्राः न प्रयोक्तव्याः यथा -

छन्दांसि च विदुष न मन्त्राः कर्मसु प्रयोक्तव्याः।[4]

ऋग्वेद भाष्य भूमिकायां सायणाकार्येण वेदार्थं यज्ञार्थञ्च छन्दोज्ञानमतीवावश्यकमिति निर्धारितम् तस्मात् भङ्गवेदज्ञानार्थं पादभूतस्य छन्दसोज्ञानमनिवार्यम्।

एतावदलौकिकेषु वेदादि शास्त्रेषु छन्दसां प्रयोजनमभिहितं भवति परं कालिदासादिनां लौकिकानां कवीनां लौकिकेषु काव्यादिषु छन्दसां मुपयोगः कवित्वस्य सम्बर्धनायैव भवति। छन्दोनिबद्धा वाक् केवलं मृदुतरा न भवति अपितु सङ्गीतस्य तत्र किञ्चित सामज्जत्यमपि सा विभर्ति अतएव सा हृद्या संपद्यते।

(ख) छन्दःशास्त्रम् वेदाङ्गत्वञ्च - छन्दः शास्त्रस्य कृते अनेके शब्दाः प्राचीनग्रन्थेषु प्राप्यन्ते। यथा पाणिनेः अष्टाध्याय्यां (4-3-73) ऋत्यष छन्दोमानछन्दोभाषाछन्दोविचितिश्च त्रयः शब्दाः पठिताः। पतज्जलिना तु महाभाष्ये छन्दोभाषा ऋतिशब्दस्य प्रातिशाख्यरूपोऽर्थः कृतः। एतच्च श्रीवाचस्पति गैरोला[5]

---

1 ऋक् प्रातिशाख्ये 18-62

2 शुक्लयजुः सर्वानुक्रमण्याम् पृ. 8

3 तैत्तिरीय ब्राह्मण 1-5-12-1

4 यादवप्रकाशकृते छन्दोविचिति भाष्ये आदौ, पृ. 2

5 गैरोला संस्कृत का इतिहास 1-9-3

महोदयेन स्वीये "संस्कृत साहित्यस्य का इतिहास" इति ग्रन्थे स्पष्टीकृतम्। पतज्जलिविरचिते निदानसूत्रे तु छन्दः शास्त्रस्य कृते छन्दोविषय इति शब्दः प्रयुक्तः। भरतमुनेः नाट्यशास्त्रे[1] छन्दश्शास्त्रस्यकृते छन्दोपिधानम्, वृन्तविधानम् छन्दोविचितिरिति शब्दाः प्रयुक्ताः। छन्दःशास्त्रकृते छन्दोविच्छितिरिति शब्दोऽपि प्रयुज्यते। इति युधिष्ठिर मीमांसक महोदयेन लिखितम्।[2]

छन्दोविचितिः - पतज्जले र्निदानसूत्रेषु अन्तिमो भागः छन्दोविचितिरस्ति। डॉ कैलाशनाथ भटनागर महोदयेन निदानसूत्राणां[3] ग्रन्थरुपेण सम्पादन कृतम्। छन्दोविचितेर्भाष्यकर्ता पेन्तशास्त्री अथवा पेद्दशास्त्री स्वीये भाष्ये षण्णां छन्दो विचितीनां परिचयं दन्तवान्। इमाः षड्विचितयः -

याः षट् पिंगलनागाद्यैः छन्दोविचितयः कृताः।
तासां पिङ्गलनागीया सर्वसाधारणी भवेत्।।
सर्वानुक्रमणी काचित् छन्दोऽनुक्रमणी परा।
शौनकीया तृतीयेनास्तिसुः ऋग्वेदिनां मताः।।
यजुर्वेदविदां मन्या सर्वानुक्रमणी भवेत्।
सामगानां निदानस्था पतज्जलिकृता हि सा।।[4]

ऋग्वेदीयास्तिस्रः छन्दोविचितय दमाः -

1- ऋक्सर्वानुक्रमणी 2- ऋक्छन्दोऽनुक्रमणी 3- शौनकीय छन्दोविचितिः। एतासु ऋक्सर्वानुक्रमणी कात्यायनप्रणीता। ऋक्छन्दोऽनुक्रमण्याः विषये अधिकं न प्राप्यते। शौनकीय छन्दोविचितिः आश्वलायनगुरूशौनकप्रणीता।[5] इयं ऋक्प्रातिशाख्येषोडषे सप्तदेशे अष्टदशे च पटले प्राप्यते।

यजुर्वेदीयाछन्दोविचितिः -

---

1 भरतमुनि र्ना. शा. श्रीबाबूलाल सम्या. प्र. सं. चौखम्भासीरीज पृ. 224, 225, 275।

2 युधिष्ठिर मीमांसक वैदिकछन्दोमीमांसा।

3 के. ना. भट. निदानसूत्र ऑफ पतज्जलि, मोतीलाल बनारसीदास।

4 के. ना. भट. सम्पादित निदान सूत्र पृ. 43

5 ए. ए. मैक्डानल ए हिस्ट्री ऑफ संस्कृत लिट्रेचर हि. संस्करण, मोतीलाल बनारसीदास 1971

यजुः सर्वानुक्रमणी कात्यायनप्रणीता। इयं ऋक्सर्वानुक्रणीमनुकरोति।

सामवेदीया छन्दोविचितिः -

सामवेदीया छन्दो विचितिः पतज्जलिप्रणीतस्यनिदानसूत्रस्यान्तिमो भागः।

पिङ्गलनागीयाछन्दोविचितिः -

पिङ्गलनागीयछन्दोविचितिः पिङ्गलनागप्रणीता। अत्रेदं वैशिष्ट्यम् यत् वैदिकच्छन्दसामतिरिक्तं लौकिकच्छन्दसामपि विचारकृतोवर्तते।

एतदतिरिक्ता अपि छन्दोविचितयः सन्ति इति ऋग्वेद भाष्यभूमिकायां आचार्यसायणेन सूचितम् तथासर्वैश्छन्दोविचित्यादिभिः पिङ्गलयास्क सैतवप्रभृत्तिभिः'' अनेन प्रतीयते यत् कात्यायन प्रभृतिभ्योऽन्येऽपि यास्क सैतव प्रभृतयश्छन्दोविचितकाराः सन्ति। किन्तु पूर्वोक्ताभ्योः विचितिभ्योऽन्यासां छन्दोविचितानां विवरणं नोपलभ्यते।

छन्दोविचितीनाम्पार्वापर्यम् -

कीथमहोदय वाचस्पति गैरोला पेन्तशास्त्रि महोदयानाञ्चमतानुसारं आसां विचितीनामयं पौर्वापर्यक्रमः -

1- साख्यायन श्रौतसूत्रम्

2- पिङ्गलच्छन्दः सूत्रम्

3- ऋक् प्रातिशाख्यम्

4- ऋक् सर्वानुक्रमणी

5- यजुः सर्वानुक्रमणी

एतेषु ग्रन्थेषु अन्योन्यानुकरण प्रभावः स्पष्टं संलक्ष्यते।

(ग) छन्दः पदार्थः - छन्दः शब्दः छादनार्थकच्छद्धातोः आच्छादनार्थकाच्छंदि धतोर्वा निष्पन्नः। अतः छन्दः मन्त्रमागच्छादयति व्याप्नोति वेत्यर्थः। तेन आच्छादित गतियतिध्वनिभिरावृतानां मन्त्राणां पाठादेव मन्त्रपाठफलं यज्ञसाफल्यं पूर्णाहुतयश्च जायन्ते। अतएव मन्त्राणां विनियोगे छन्दसां सन्निवेशः कृतः। छन्दः शब्दस्याच्छादनार्थत्वादेव राजशेखरेण काव्यमीमांसायाम -

''रोमाणि छन्दांसि[1] इत्युक्तम्।''

---

1 का. मी. पृ. 16, चौ. वि. भवन।

अर्थात् यथा रोमाणि सर्वं शरीरमाच्छादयन्ति तथैव छन्दांसि सर्वं वेदमाच्छदयन्ति। तैत्तिरीय संहितायामेका कथा वर्तते यत्र छन्दसां आच्छादनार्थत्वं स्पष्टीकृतम्। प्रजापतिः वङ्निना परिवेष्टित आसीत् देवाः तमुपसर्वं नापाश्यन् तदा छन्दोभिरात्मानमाच्छाद्य सुरक्षिताः प्रजापतिमुपागच्छन्। यथा -

प्रजापतिरग्निमचिनुत स करपविर्भूत्वाऽतिष्ठत् तं देवा बिभ्यतो नोपाऽऽभ्यन् ते छन्दोभिरात्मानं छादयित्वोपाऽऽयन् तच्छन्दसा छन्दस्त्वं ब्रह्म वे छन्दांसि ब्रह्मण एतद्रूपं यत् कृष्णायिनं कार्ष्णीं उपानहावुपमुञ्चते छन्दोभिरेवात्मानं छादयितवाऽग्निमुपचरत्यात्मनोऽपि सा यै।[1] एवमेव शतपथ ब्राह्मणेऽपि -

"यदस्या आच्छादयस्तस्माच्छन्दांसि[2]-

यास्केनाप्युक्तम् -

छन्दांसिछादनात्। यदेभिरात्मानमाच्छादयन् देवामृत्योर्बिभ्यतः तच्छन्दसां छन्दस्त्वम्[3] छान्दोग्योपनिषट्यपि एवमेव छन्दशब्दस्य आच्छादनतपोऽर्थः प्रोक्तः -

"देवाः वे मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन् ते छन्दोभिराच्छादयन् यदेभिरच्छ तच्छन्दसां छन्दस्त्वम्[4]"

वेदे छद धातोः प्रायो रक्षणेऽर्थेऽपि दश्यते -

यथा - "गायत्रेण छन्दसा त्वां छादयामि। त्रेष्टुमेन छन्दसा त्वां छादयामि। आगतेन त्वां छादयामि।[5]

एवमेव ऐतरेय आरण्यकेऽपि रक्षणार्थे अथवा निवारणार्थे छन्दसां प्रयोगः -

"छादयन्ति हि वा छन्दांसि पापात् कर्मणो यस्यां कस्याञ्चिद दिशि कामयते[6] सन्तर्पणे प्रसादेन चार्ये छन्दः शब्दस्य प्रयोगः शतपथब्राह्मणे दृश्यते -

"तद् यत्र छन्दांसि देवान् समतर्यपन्नथ छन्दांसि देवाः समतर्पयन्।[1]

---

1 तैत्ति. सं. का. 1 प्र. 6 अनु. 6-1

2 श. प. ब्राह्मणे 8-5-2

3 निरुक्ते 7-12

4 छा. उप. 1-4-2

5 श. प. ब्राह्मणे 7-5-2-60

6 ऐ. आ. 2-1-6

निघण्टो छन्दः धातुः कान्तिकर्मा पठितः। चदि धातुः दीप्तिकर्मा पठितः। तेन छन्दः शब्दस्य कान्तिरूपोऽर्थो दीप्तिरूपोऽर्थश्च भवतः। तत्रैव स्तुतकर्माणि पठितः। तेन स्तुतिरूपोऽर्थः भ्वति।[2]

एभ्योऽर्येभ्यः भिन्ना अपि अर्थाः छन्दः पदस्य भवन्ति। यथा वैदिक संहितार्थे - ''छन्दांसियस्य पर्णानि[3]-

यथा च बहुलं छन्दसि'' इति पाणिनीयसूत्रे[4] लोके च छन्दो अधीते इति व्यवहारः। छन्दः शब्दस्य स्वरूपोऽप्यर्थः -

पशुरुपेऽर्थे च यथा ''पशवो वे देवानाच्छन्दांसि''[5]

ऋग्वेदसंहितायाम् - ''गायत्र्युष्णिगनुष्टुञ् बृहती पवित्र त्रिष्टुब-अगत्यः सप्तछन्दांसि अश्वरूपेण वर्णितानि।[6]

शुक्लयजुर्वेदे चतुर्दशाध्याये पञ्चदशाध्याये च छन्दशब्दस्य विचिषेस्वर्येषु प्रयोगः कृतो वर्तते माच्छन्दः प्रमाच्छन्दः प्रतिमाच्छन्दो अस्तीवयश्छन्दः पक्तिच्छन्द ऊहिष्णाच्छन्दो बृहतीछन्दोऽपुष्टुप्छन्दो विराट्छन्दो गायत्रीच्छन्दाः त्रिष्टुपछन्दो जगतीछन्दः।[7]

पृथिवीच्छन्दोऽतरिकं छन्दो द्यौश्छन्दः समाछन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गोश्छन्दोऽजाश्छन्दो श्वच्छन्दः।[8]

वकुञ्छन्दस्त्रिककुभ्छन्दो काव्यं छन्दः पदपङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्क्ति क्षुरोभ्रजश्छन्दः। वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकाच्छन्दो विविधश्छन्दो गिरश्छन्दो भ्रजच्छन्दौ सन्तुपच्छछन्दोऽनुष्टुप् छन्दः।[1]

---

1 द्र. सिद्धेश्वर शर्मणोलेखः - ''वैदिक कनसेप्ट ऑफ मीटर''
विश्ववैदिक शोध संस्थान होशियारपुरे संरक्षिता।

2 निघण्टु 3-16

3 भा. गी. 11-1

4 पा. सू. 1-4-39

5 श. ब्रा. 1-8-28

6 ऋग्वेद 2-3

7 यजुर्वेद 14-14

8 यजुर्वेद 14-18

छन्दःशब्दस्य यजुर्वेदोऽपि अर्थो भवति यथा पुरुष सूक्ते -

तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्माद् यजुः तस्मादजायत[2]

अत्र छन्दः शब्दः यजुः परः।

छन्दः शब्दो देवार्थपरोऽपि दृश्यते- यथा ऋग्वेदे पुरुषसूक्ते -

''यज्ञेन यज्ञमयान्त देवाः[3] ....''।

अत्र साध्याः देवाः छन्दांसि एव।

यथा ऐतरेय ब्राह्मणे व्याख्यातम् -

छन्दांसि वे साध्याः देवाः।

संस्कारार्थोऽपि छन्दः शब्दः प्राप्यते। यथा ऐतरेय श्रुतौ -

गायढ्या ब्राह्मणं निर्वर्तयत त्रिष्टुभा राज्न्यं जगत्या वैश्यं केनचिच्छन्दसा शूद्रं न्यवर्तयत्।

मनुरपीममेवमर्थमनुवदति -

शूद्रोऽपि एवं विधः कार्यो विना मन्त्रेण संस्कृतः।

न केनचित् समसृजत् छन्दसा त्वम्प्रजापतिः।।

वैदिक छन्दोऽनन्तरं लौकिकवाक्यानामप्याच्छादनार्थं लौकिक च्छन्दांसि प्रवर्तितानि। संस्कृतवाङ्मये संस्कृतजन्यभाषावाङ्मये च कविकर्मर्णः कृते छन्दोज्ञानमत्यावश्यकमस्तिं त्रयं प्रसिद्धिरस्ति यत् छन्दोमयी लौकिकी आग् आदिकवेर्वाल्मीकेर्मुखादेव सर्व प्रथमं प्रावर्तत्।

''मा निषाद प्रतिष्ठा त्वमगमः शाश्वतोसमाः

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।[4]

---

1 यजुर्वेद 14-19

2 यजुर्वेद 15-4

3 यजुर्वेद 10-90-16

4 1-2-14

छन्दश्शब्दस्य व्यापकमर्थमनसि निधाय केदारभट्टे। वृन्तरत्नाकरे उक्तम् यद् यथा विष्णुना सर्वव्याप्तं तथैव मगणनगणाद्यरवर्गेण सर्व व्याप्तम् -

म्यरस्तजभूनगैलान्तैरेभिर्दशाभिरक्षरैः।

समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना।।[1]

छन्दसां वाङ्मण्उनकरत्वमप्युच्यते अतएव जयदेवच्छन्दो ग्रन्थे आद्यमङ्गलश्लोके -

गायत्र्यां छन्दसां पूर्वं वर्धमानाक्षरं परम्।

वाङ्मण्डनकरं नौमि चित्रवृन्तप्रसिद्धये।।[2]

यथा वस्त्राणि भूषणानि च शरीरमलङ्कुर्वन्ति तथैव छन्दोऽपि वाचमलङ्करोति। अस्य श्लोकस्य भट्टमुकुलात्मज हर्षटविरचितायां जयदेवच्छन्दो विवृतौ छन्दः - अक्षराणभियन्ताविशेष इत्युक्तम्। लोकव्यवहारेऽपि एवमेवोच्यते- चन्दनच्छन्नशाचं मेघाच्छन्ने अहनि दुर्दिनमिति। लोके रुच्यर्थेऽपि छन्दः शब्दः पठ्यते -

यथा - मयोच्यमानं यदि ते श्रौतुं छन्दो विलासिनि।

श्रूयतामभिधास्यामि श्रुत्वा चैतद् विधीयताम्।।[3]

छन्दशब्दस्य अनेकविधाः बहव उपसंख्या पर्याधान चर्चितकादयोऽर्थाः भवन्ति इति जयपूरीय पं. श्री केदारनाथ श्री वासुदेव शर्मभ्यां सम्पादितस्य मृतसंझीयनी व्याख्यासहित छन्दशास्त्रस्य ग्रन्थस्य भूमिकायां सविस्तरं विवेचितः।[4]

(घ) छन्दोलक्षणम् - छन्दोलक्षणम् विद्वद्भिर्बहुधा कृतम्। तत्रैके परिभाषन्ते ''छन्दोनामवक्षरपरिभाषम्'' किन्तु एवं विधे लक्षणे कृते पृथिवी गायत्री अन्तरिक्षं त्रैष्टुभं ब्राह्मणो गायत्र्यः क्षत्रियो त्रैष्ठुभः इत्यार्षवचने अव्याप्तिः। अतः एके भाषन्ते प्राणमात्राः छन्दः। सर्वञ्चेदं स्थावरं जङ्गमं सप्राणमेव जीवति तेन वाचिक प्राणः स्वर इत्युच्यते। अन्मात्रा वाचिकं छन्दः। एवं भौतिकः प्राणः वैश्वानरः तन्मात्रा च भौतिक छन्दः। मात्रा चात्रावच्छेदः सेनावच्छेदः छन्दः इत्येव

---

1 वृ. र. अ. 1 श्लो. 6

2 जयदेवच्छन्दसि 1-1

3 वा. रा. 2-9-7

4 छ. शा. भूमिकायां पृ. 44

लक्षणं सुवचमिति केचन भाषन्ते अवच्छेदस्य बहु विषयतया वाग्विषये वाक् छन्दः अर्थात् वागवच्छेद एव छन्दःशास्त्रस्य विषयः।

अवच्छेदश्च नियत मात्रा अक्षरव्यूह एव। एतच्च भट्टइलायुधेन 'आत्रैष्टुभाच्चयदार्षम्।[1] इति सूत्रवृन्तो लिखितम् - छन्दः शब्देनाक्षरसंख्यावच्छेदोऽत्राभिधीयते। तेन च चतुर्विंशत्यक्षरा वैगायत्री अष्टाविंशत्यक्षरोषिणक् द्वात्रिंशदक्षरानुष्टुबित्यादभिधीयते।

अत एव पिङ्गलाचर्येण छन्दसां लक्षणनिर्धारणे संख्यया अक्षरावच्छेदो विहितः। यथा गायत्र्याः वसवः[2] अत्र वसवः = अष्टौ संख्याः। जगत्याः आदित्याः[3] आदित्याः = द्वादश संख्याः। विराजो दिशः[4] दिशः = दशसंख्याः। त्रिष्टुभोरुद्राः[5] रुद्राः = एकादश संख्याः। स च गतियत्वध्वपरिच्छिन्नरूपः। तत्र गतेस्त्रयो भेदाः - वृन्तिर्लयोध्वनिश्चन। यतेश्च पञ्चभेदाः अवसायोविच्छेदोविरतिर्यतिरणुयतिश्च। अध्वयोगस्य द्वौ भेदोलिप्यध्वपरिच्छिन्ति र्गत्यध्वपरिच्छिन्तिश्च। तेन मुख्यतया छन्दसस्त्रयो भेदाः - वर्णच्छन्दः गणच्छन्दः मात्राछन्दश्चेति।[6]

यद्यपि परस्परमापाततः इदं विरुद्धभिवाभाति किं त्वेषां स्वरूपे भेदो नास्ति यदि सर्वस्य वाचः आच्छानात् छन्द उच्यते तर्हि छन्दः केनाच्छादितमिति नाशङ्कनीयम्। यथा ब्रह्मणः व्यापकत्वं स्वरूपेण स्वस्यापि तथैव।

छन्दस्तु नियताक्षराणामतिरिक्तं पादस्यापि महत्त्वं वर्तते। पादो नाम चतुर्थांशः। किन्तु त्रयोऽपि पादाः दृश्यन्ते यथा गायत्र्याम् - उक्तञ्च - "प्रथमं छन्दस् त्रिपदा गायत्री।[7] वेदे छन्दसां पञ्चपादाः षट्पादाः सप्तपादाः अपि भवन्ति।

---

1 पि. सू. 3-3

2 पि. सू. 3-3

3 पि. सू. 3-4

4 पि. सू. 3-5

5 पि. सू. 3-6

6 द्र. श्रीकेदारनाथ श्रीवासुदेव शर्मभ्यां सम्पादितश्च छन्दाशास्त्रस्य भूमिकायाम् पृ. 52

7 ऋक् सर्वानुक्रमणिकायाम् - 4

यथोक्तम् - पञ्च पङ्क्तेः अट्सप्तेत्यतिछन्दसाम्[1] लोके प्रायश्चत्वारः पादाः भवन्ति। वैदिकछन्दसामेकमपरमपि वैचित्र्यमिदं वर्तते यत् दत्तरसंख्या तु नियता किन्तु पादसंख्या न नियता। तेन त्रिपदाऽपि गायत्री चतुष्पदाऽपि गायत्रीति श्रूयते। यदा अष्टाक्षरात्मकः पादः तदा त्रिपदा गायत्री यदा षडाक्षरात्मकः पादः तदा चतुष्पदा गायत्री। अतएव पिंगलनागेनोक्तम् -

"आद्यंचतष्पाद ऋषिभिः।"[2] ऋग्वेदस्याद्योमन्त्रः त्रिपादात्मकः चतुर्विंशत्यक्षरात्मकः। अत्र च गायत्री छन्दः यथा - अग्निमीले पुरोहितम् (1 पादः)

यज्ञस्यदेवमृत्विजम् (2 पादः)

होतारं रत्नधातमम् (3 पादः)[3]

यथा च चतुष्पादात्मकः चतुर्विशत्यरात्मकोऽथर्ववेदमन्त्रः। अत्र च गायत्री छन्दः।

दोषोगायबृहत् (1 पादः)

गायद्युमधेहि (2 पादः)

आथर्वपस्तुहि (3 पादः)

देवंसवितारम् (4 पादः)[4]

अत्र प्रतिचरणं षडक्षराणि चतुर्षुचरणेषु आहत्य चतुर्विंशत्यक्षराणि।

अत्रेकमपरं वैशिष्टयम् यत्र गायत्र्याः अष्टाक्षरात्मकाः त्रयः पादाः तत्र गायत्री छन्दः यत्र च गायक्याः अष्टाक्षरात्मकाः चत्वारः पादाः तत्रानुष्टुप् छन्दः। उक्तञ्च पिङ्गलाचार्येण -

"अनुष्टुप् गायत्रैः (पि. सू. 2-3)

वैदिकेषु छन्दस्सु चतुर्भिः पादैः प्रतिच्छन्दो भाव्यममिति नास्ति नियमः। लौकिकेषु छन्दस्सु प्रतिच्छन्दश्चतुर्भिः पादैरवश्यमेव भाव्यमिति नियमः। वेदे इव

---

1 सांख्यायन श्रौतसूत्रे 7-27

2 पि. सू. 3-8

3 ऋग्वेद 1-1-1

4 अथर्ववेद 6-1

लोकेऽपि अनुष्टुच्छन्दः प्रयुज्यते। एवमेव इन्द्रवज्रावंशस्थवसन्ततिलकाशिखरिणी प्रभृतिषु छन्दस्सु चत्वारः पादाः तथा क्रमशः एकादशद्वादशचतुर्दशापञ्चदशसप्तदशाक्षराणि भवन्ति। लौकिकेषु छन्दस्सु प्रतिपादं नियताक्षरेण छन्दोनिर्णयः सरलः किन्तु वैदिक छन्दस्सु प्रतिपादमनियताक्षेरेण विभिन्नानि अनेकानि छन्दांसि जायन्ते।

उदाहरणार्थम् - गायत्रीच्छन्दः एवावलोकनीयम्। न्यूनाधिकपादेन न्यूनाधिकाक्षरेण गायत्रीच्छन्दसः मुख्या इमे भेदाः भवन्ति।

1- चतुष्पदा गायत्री

2- त्रिपदागायत्री

3- पाद निवृत् गायत्री

4- नागी गायत्री

5- पिरीता गायत्री

6- वर्धमाना गायत्री

7- प्रतिष्ठा गायत्री

8- द्विपाद गायत्री

9- त्रिपादविराट् गायत्री।

ऋक् प्रातिशाख्ये अपरोऽपि भेदो लक्ष्यते। यथा- द्विपदा गायत्री[1] देवी याजुषी-आसुरी प्राजापत्या-साम्नी-आर्ची-ब्राह्मीऋति भेदेरनुष्टुवादि छन्दसामक्षरसंख्यायां भेदाः भवन्ति। एतदर्थं ऋक् सर्वानुक्रमणी यजुः - सर्वानुक्रमणी बृहद्देवतादि ग्रन्थाः द्रष्टव्याः।

(ङ) छन्दोभेदाः - प्रथमं छन्दो द्विप्रकारकम् - वैदिकं छन्दः लौकिकं छन्दश्चं वैदिकानि छन्दांसि मुख्यतः सप्त सन्ति। गायत्र्युष्णिगनष्टुब्बृहतीपङ्क्तित्रिष्टुज्जगत्यश्चा। तत एतान्याधृत्य सप्तातिछन्दांसि भवन्ति। छन्दः शास्त्रे "अत्र लौकिकं[2] इत्यस्मात् सूत्रात् पूर्वेषां छन्दसां

---

1 ऋक् प्रातिशाख्ये पटल 16 सूत्र 23

2 छ. शा. 4-8

वैदिकत्वमेवोक्तम्। एतेषां छन्दसां देवता अपि पृथक् पृथक् भवन्ति। यथा गायत्री छन्दसोऽग्निर्देवता त्रिष्टुप् छन्दसरिन्द्रो देवतादयः।[1]

आर्यादीनां चूलिकापर्यन्तानां लौकिकत्वमेव। समान्यादीनामुत्कृतिपर्यन्तानां वैदिकत्वं लौकिकत्वञ्च। अत्र वैदिकच्छन्दसां प्रस्तावे प्रसङ्गाद्वेदवदनादि-मुनिपारम्पर्यागतं स्मृतिपुराणेतिहासादिषु दृश्मानमार्यादिदण्डपर्यन्तं लौकिकं छन्दोजातमधिक्रियते। अनुष्टुप् छन्दः लोके वेदे च उभयत्रावलोक्यतें इन्द्रवज्रा वसन्ततिलकाप्रभृतिछन्दांसि केवलं लोके एव दृश्यन्ते न तु वेदे। संस्कृत वाङ्मये प्रसिद्धिरस्ति यल्लोके अनुष्टुप् छन्दो महर्षि - वाल्मीकिमुखात् आविर्वभूव।

लौकिकं छन्दो द्विविधं भवति -

मात्राछन्दोगणच्छन्दश्चं यथा वृन्तरत्नाकरे -

लक्षणं सर्ववृन्तानां मात्रावृन्तानुपूर्वकम्।।[2]

केचित् त्रीन् भेदानीच्छन्ति - गणच्छन्दोमात्राच्छन्दोऽक्षरब्दन्दश्चेति। यथा मृतसंजीवनीटीकायां हलायुधेनोक्तम् -

आदौ तावद् गणच्छन्दो मात्राछन्दस्ततः परम्।

तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम्।।

आर्य्याद्युद्गीति पर्यन्तं गणच्छन्दः समीरितम्।

वैताल्यादि चूलिकान्तं मात्राछन्दः समीरितम्।

समान्याद्युत्कृतिं यावदक्षरच्छन्द एव च।।[3]

श्रीमहादेवभट्टाचार्योऽपि इममेव भेदत्रयमूलकं सिद्धान्तमत्र व्याचष्टे।

तत्र गण्च्छन्दो जगणमगणादिगणाधारेण भवति। वर्ण त्रयस्यैको गणो भवति। लघुगुरुमात्रयोरादिमध्यान्तस्थानभेदेन वर्णत्रयस्याष्टोगणाः भवन्ति यथा श्रुतबोधे -

आदिमध्यावसानेषु यरसा यान्ति लाघवम्

भजसा गौरवं यान्ति मनौ गुरुलाघवम्।[4]

---

1 बृहद् देवतादि ग्रन्थाः।

2 वृ. र. 1-22

3 छ. शा. मृ. सं. टीकायाम् 4-11 सूत्रस्य वृत्तिः।

4 श्रु. ओ. 1-3

तदेवं गणानां स्वरूपं भवति -

यगणः	।ऽऽ
रगणः	ऽ।ऽ
तगणः	ऽऽ।
भगणः	ऽ।।
जगणः	।ऽ।
सगणः	।।ऽ
मगणः	ऽऽऽ
नगणः	।।।

मात्राच्छन्दः - मात्राछन्दस्तु मात्राणां निर्धारितसंख्यया मात्रिकच्छन्दसां निर्धारणं भेदो वा भवति। लघु स्वरः एकमात्रिको भवति दीर्घस्वरो द्वि मात्रिको भवति। संयोगात् पूर्वं लघुरपि द्विमात्रिक गण्यते। पादान्तस्थोलघुरपि विकल्पेन द्विमात्रिककोभवति। चतुर्षु पादेषु कतमस्य पादस्यान्तस्थः लघुः गुरुर्भवति इत्यत्र विदुषां मतभेदाः सन्ति। चतुर्षां मात्राणामेकोगणो भवति यथा पिङ्गलाचर्येणो मतम् "स समुदा गणः"।[1] एकेन अपरेण सूत्रेण च एवं विधस्य गणस्य स्वरूपनिर्देशः कृतः यथा -

"गीगान्तमध्यादिर्लैश्च"[2]

गौ = द्वौ गुरु =

गान्तः = अन्ते गुरुः =

गमध्यः = मध्ये गुरुः =

गादिः = आदो गुरुः =

लाः = सर्व लघवः =

पिङ्गलशास्त्रे स्वर इत्यस्य सप्तसंख्याऽर्थोभवति। अर्द्धशब्दस्य मात्रिकगणस्यार्द्ध अर्थात् द्विसंख्यारूपोऽर्थोभवति। एतच्च पिङ्गलछन्दःशास्त्रे

---

1 पि. सू. 4-12

2 पि. सू. 4-13

आर्याच्छन्दसः विचारे स्पष्टीकृतम्। यथा "स्वरार्द्धम् चार्यार्द्धम"[1] अस्यार्थः स्वरः अर्थात् सप्त पादसंख्या चत्वारः, सप्त संख्यायाः चतुसंख्ययागुणो अष्टाविंशतिः संख्या (7 4=28) अर्द्धः अर्थात् गणस्य चतुसंख्यारूपस्यार्द्धः द्विसंख्या भवति। एव अष्टाविंशति संख्यया सह योजने त्रिंशत् संख्या (28+2=30) भवति। आर्याच्छन्दसः अर्द्धः त्रिंशत् संख्याकाः मात्रा इत्यर्थः। अर्थात् आर्याच्छन्दसि षष्ठिमात्राः भवन्ति। तस्यार्द्धः त्रिंशत् मात्राः। अयमवसूत्राभिप्रायः।

अक्षरच्छन्दः - यत्र वर्णिकगणस्य मात्रिकगणस्य वा बनधनं न भवति केवलमक्षराणां संख्या नियता भवति गुरुलघुकृमश्च समान्यतो भवति तदक्षरच्छन्दो भवति। वस्तुतोऽक्षर छन्दांसि वर्णिकच्छन्दस्तु एवान्तर्भवन्ति। अतः केचन विद्वांसः अक्षरच्छन्दंसि पृथक् न गणयन्ति, यथा समानीच्छन्दः -

"स्त्रीतिसमानी"[2]

प्रतिवरण गुरुलघुक्रमेण अष्टावक्षराणि भवन्ति एवमेवानुष्टुपोऽपि प्रतिचरणं अष्टावक्षराणि नियतानि, गुरु-लघुक्रमश्च सामान्यः। यथा श्रुतबोधे -

श्लोके षष्ठं गुरुज्ञेयं सर्वत्र खलुपञ्चमम्।

द्वि चतुष्पादयोर्ह्स्वं सप्तमं दीर्घमन्ययोः।।[3]

छन्दसामन्धिनं वृत्तमित्यपि भवति। वर्तते इति वृत्तम्। यथा हलायुधेन मृतसंजीवनीटीकायामुक्तम् -

"गायत्रादो छन्दसि "वर्तते" इति वृत्तम् -

तच्च स्थिरगुरुलध्वक्षर विन्यासमिष्यते।[4] एवमेव छन्दः परिमलकारेणाद्धि उक्तम् - "ग ल समवेत स्वरुपेणनियता वाग् वृत्तम्।"

हलायुधकृतटीकायामिदमप्युक्तम् -

पञ्चं चतुष्पदं तत्र वृत्तं जातिरिति द्विधा

एकदेशस्थिता जातिवृत्तंगुरुलघास्थितम्।[1]

---

1 पि. सू. 4-14

2 पि. सू. 5-6

3 पु. बो. 10

4 छ. शा. मृ. सं. टी. 5-1 सूत्रस्य वृत्तिः।

अतएव छन्दोग्रन्थस्येकस्यवृत्तरत्नाकर इति नाम।

इदवृत्तत्रिविधम् -

1- समवृत्तम्

2- अर्द्धसमवृत्तम्

3- विषमवृत्तम्

वृत्तः चत्वारः पादाः नियताः भवन्ति। अतएव पद्यमित्याचक्षते। यस्मिन् वृत्ते चत्वारः पादाः समाः सन्ति तद् समवृत्तम्। यथा मालिनी वसन्ततिलकाप्रभृतीनि। 'यत्र प्रथमद्वितीयपादौ परस्परं समौ तत्र तृतीयचतुर्थपादौ परस्परं एकसमानो तद् अर्थसमवृत्तमुच्यते।' एवञ्च यत्र प्रथमतृतीयचरणे परस्परं समो तथा द्वितीय चतुर्थो च चरणौ परस्पर समौ तदर्धसमवृत्तमुच्यतें यथा पुष्पिताग्रा आर्योपजातिप्रभृतीनि।

यस्मिन् वृत्ते सर्वेपादाः अक्षरसंख्यादृष्ट्या विसदृशाः तद्विषमंवृत्तम्। यथा पदचतुर्ध्वम् आपीडः कलिका लवत्यमृततधारोद्गतादि।

भरतमुनिना अन्यप्रकारेणछन्दोभेदा वर्णिताः।

1- दिव्यम्

2- दिव्येतरम्

3- दिव्यमानसज्व।[2]

तत्र दिख्यानि तावद् वैदिकच्छन्दांसि गायत्र्युष्णिमनुष्टुब् बृहतीपंक्ति-त्रिष्टुब्जगती छन्दांसि।[3] दिव्येतरमपि छन्दांसि अतिजगती-शक्वरी-अतिशक्वरी-अष्टि-अव्यष्टि-धृति-अतिधृति छन्दांसि।

दिव्यमानसानि -

कृति-प्रकृति-आकृति-विकृति-संकृति-अभिकृति-उत्कृति छन्दांसि।

तत्र भरतमुनिना समः अर्धसमः विषमः अर्धविषमाश्चेति चत्वारो प्रकाराः प्रदर्शिताः।

---

1 मृ. सं. टी. 5-1 सूत्रस्यवृत्तिः।

2 नाट्यशास्त्रे 15-98

3 नाट्यशास्त्रे 15-99

पादेषु संहिता विचारः - छन्दस्तु पादानां विभागः पादाक्षराणां संख्यान्निख्य पाद मात्राणाञ्च संख्यानिश्चयः छन्दोलक्ष्णानुरोद्येन भवति। प्रथम पादस्यान्तिमेनाक्षरेण द्वितीयपादस्याद्येनाक्षरेण च संहिता भवति। एवमेव तृतीय पादस्यान्तिमेनाक्षरेण चर्तुपादस्याद्येनाक्षरेण च संहिता भवति सन्धिः कार्यञ्च भवति। संहितया एवं विधस्थले समासोऽपि भवति अर्थात् प्रथम द्वितीय पादयोः समासेन एकपदता तक्ष तृतीय चतुर्थपादयोः समासेन एकपदसा भवति अयं नियमः वैदिकच्छन्दस्तु लौकिकच्छन्दस्सु समान एव भवति।

यतिविचारः - छन्दसां पद्यानां वा उच्चारणे श्वांसप्रश्वासनियमनाय स्वरमाधुर्याय च मध्ये-मध्ये कश्चन विरामः क्रियते। अर्ध-विराम एव यति रित्युच्यते। यत्यर्थे विश्रामः विच्छेदश्चेति शब्दावपि प्रयुज्येते। यति नियमः प्रतिच्छन्दः लक्षणानुरोधेन निर्धारितः। अयं यतिः वैदिक लौकिकछन्दस्तु चोभयत्र भवति अयं यतिनियमः पद्योच्चारणे सौविध्यं सौन्दर्यवर्धनं गेयत्वं च सम्पादयति। यतिनियमेन पिङ्गलाचार्येण एकोऽपरोऽपि भेदः छन्दसां कृतः यथा यत्र सप्तसु अष्टसु यतिर्भवति तद् चन्द्रावर्ता[1] नामको भवति। यत्र षट्सु नवसु च यतिर्भवति तत्र भालारूपोभेदो भवति।[2]

भरतमुनिना विरामशब्दस्य अपरोऽर्थः लिखितः -

''यत्रार्थस्य समाप्तिः स्यात् सविराम इति स्मृतः।'' [3] अस्मिन् मते पद्योच्चारणे सौविध्यार्थे न केवलं यतिः कार्या किन्तु अर्थसमाप्तावपि विरामः कार्यः।

श्री पिङ्गलाचार्यकृतछन्दः शास्त्रस्य षष्ठाऽध्याये एकं सूत्रं ''यतिर्विच्छेदः'' अस्य सूत्रस्य हलायुध विशदा व्याख्या कृता प्रकृते ग्रन्थे छन्दोवृत्तावपि अस्य विस्तृता वृत्तिरस्ति। पदमध्ये पदान्ते समासे विश्वस्यन्ते सन्धौ च कथं यतिः कार्या कुत्र यति शोभनीया कुत्र दोषयुक्ता चेति तत्र सम्यक् विवेचिता।

---

1 पि. सू. 7-10

2 तत्रैव 7-11

3 भ. ना. शास्त्रम् 15-91

(च) छन्दसां नानामाधारः - छन्दसां नामानि चिराधारं न यदृच्छया कृतानि किन्तु सार्थकानि साभिप्रायाणि साधाराणि कृतानि। तत्राष्टो आधाराः सन्ति -

1- ऐतिहासिक आधारः

2- स्वरूपाधारः

3- पशुनामाधारः

4- नागनामाधारः

5- पक्षिनामाधारः

6- नैसर्गिकवस्तुनामाधारः

7- स्त्रीनामाधारः

8- सामान्यः आधारः।

1- **ऐतिहासिक आधारः -** ऐतिहासिकाधारेण्छन्दसां नाम निर्धारणविषये मैक्समूलर[1] महोदयमधुसूदनमिश्रमहोदयेन[2] च बहु विवेचितम् - यथा - त्रिष्टुप्छन्दसा मन्त्रेण इन्द्रस्य बलस्य वज्रस्य शक्तेश्च वर्णनमस्ति। अनन्तरं त्रिष्टुपन्दः लौकिकच्छदसः इन्द्रवज्रा इति नाम कृतम्। अत्र वैदिक इन्द्रकथा एव आधारः प्रतिभाति। वैदिकछन्दस्तु सप्तसु अन्तिमश्छन्दः जगती। अन्तिमत्वेन जगतीच्छन्दः सर्वोन्नतं सर्वोच्चं च। लोके वंशवृक्षः उच्चो भवति तस्माद् द्वादशाक्षरात्मकस्य छन्दसोनाम लोके वंशसय इति संवृतम्।

मन्त्रान् गायतोमुखादुदपतन् इत्यस्मात् ऐतिहासिकाधारात् छन्दसो नाम गायत्री।

2- **स्वरूपाधारः -** येषां छन्दसां स्वरूपेणैवार्थप्रतीतिर्भवति तेषा नाम स्वरूपाधारेण कृतम्। यथा- द्रुतबिलम्बितम् एतच्छन्दः पद्यस्योचचारणे द्रुतमपि बिलम्बितमपि च भवति। एवमेव मन्दाक्रान्ता इत्यत्र मन्दाक्रान्तच्चोच्चारणं च भवति। अतएव महाकविकालिदासेन मेघदूते यक्षमुखाद् विरहवर्णने मन्दाक्रान्ता वृत्तं वृत्तम्। एवमेव यत्र मध्यमो भागः कृशः तत् पिपीलिकामध्याच्छन्दः एवं

---

1 मैक्समूलर - सेक्रेड बुक ऑफ द ईस्ट, भाग 32, पृ. 125-127

2 मधुसूदनमिश्र - मीटर्स आफ कालिदास, पृ. 21

भ्रमरविलसितमपि। यस्य चाग्रभागः शङ्कुरिव तीक्ष्णः स्वल्पो वा तत् शङ्कुमतीच्छन्दः।

3- **पशूनामाधारः** - पशूनाम् प्रकृतिमाधृत्य तदनुरोधेन मृदुकठिनवर्णस्वरारोहावरोह क्रमादिकं लक्ष्मीकृत्य तन्तत् पशूनां नामभिः छन्दसां नामानि कृतानि यथा- शार्दूलविक्रीडितम् सिंहोन्मताहरिणप्लुताहरिणीत्यादीनि छन्दांसि।

4- **नागानां नामधारः -** पिङ्गलमुनेः नामजातीयस्य जात्यनुरोधेन वा नागगतेः साम्येन वा छन्दोनाम भुङ्गप्रयातमिति कृतम्। इत्थं श्रूयते यत् पिङ्गलमुनिः सिन्धुतटे गच्छन् सलिले प्रविशन् वा एकं छन्दः शिष्यमबोधयन् तेन तस्य छन्दसः नाम भुजङ्गप्रयातमिति जातम्।

5- **पक्षिनाम आधारः -** त-तत् पक्षिणां कूजनविलसितादीनि आधृत्य एतेषां साम्येन स्वरवर्णादि युक्तानां छन्दसां नामानि पक्षिणां नामाधारेण कृतानि। यथा- क्रौञ्चपदं, मत्तममयूरं, कोकिलकम्, श्येनी, मयूरसारिणी, हत्यादीनि।

6- **नैसर्गिकवस्तुनामाधारः -** नैसर्गिकवस्तुनानदीपृथिवीविद्युदादीनां नामाधारेण छन्दसां नामानि। यथा- ज्योतिःर्विद्युन्मालाचम्पकमालापृथिवीशिखा मञ्जरीशैलशिखेत्यादीनि। एवमेव शिखरिणी यथा नदी पर्वतशिखरेभ्यः त्वरितं प्रयाति, समभूमिं प्राप्य मन्दं मन्दं प्रवहति तथैव शिखरिणी छन्दसः पठने प्रथमं त्वरितमुच्चारणं तदनन्तरं मन्दमुच्चारणं भवति।

7- **स्त्रीनामाधारः -** स्त्रीजातिः रूपगुणक्रियादीनां मनोरमत्वमावहति। अतः सामामङ्गक्रियागुणसौन्दर्यमाधृत्यछन्दसां नामानि प्रयुक्तानि। यथा शशिवदना, सुवदना, चच्चलाक्षिका कुड्मलदन्ती लघनचपला, लघनविपुला, चारुहासिनी, अतिशायिनी, कुटिलगति विलासिनी गौरी रुचिरा वियोगिनी, सुभद्रा प्रभृतीनि।

8- **सामान्याधारः** - बहूनां छन्दसां नामानि सामान्यवस्तुगुणक्रियादीनामाधारेण कृतानि। यथा- वसन्ततिलका, मालिनी, शालिनी स्रग्धरा प्रहर्षिणी, माणतकक्रीडितम् दण्डकप्रभृतीनि।

छन्दःशास्त्राचार्याः - श्रीपिङ्गलाचार्यविरचितः पिङ्गलसूत्रनामकः छन्दोग्रन्थोऽद्यछन्दोग्रन्थेषु प्रामुख्यभजते। यद्यपि आचार्यपिङ्गलात् पूर्वमपरेऽपि छन्दः शास्त्रस्याचार्याः अभूवन्। तैर्विरचितेषु छन्दःशास्त्रविषयकेषु ग्रन्थेषु न कोऽपि ग्रन्थोऽवद्यत्वे उपलभ्यते। परन्तु तेषां नामोल्लेखः प्राप्यते तेनेदं ज्ञायते यत्

आचार्यपिङ्गलात् पूर्वमपि छन्दशास्त्रस्य एका अविच्छिन्ना परम्परा आसीत्। श्री यादवप्रकाशेन छन्दःसूत्र भाष्यस्यान्ते छन्दः शास्त्रप्रवर्तकानां परम्परायारुल्लेखः कृतः -

छन्दोज्ञानमिदभवाद् भगवतो लेभे सुराणां गुरुः,

तस्माद्दुश्च्यवनस्ततो सुरगुरुर्माण्डव्यनामाततः।

माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः,

तस्येदं यशसा गुरोर्भुविधृतं प्राप्यास्मदाधेः क्रमात्।।

अस्मिन्नेव ग्रन्थे एकोऽपरोऽपिश्लोक उद्धृतोऽस्ति -

छन्दः शास्त्रमिदं पुरात्रिनयनाल्लेमेगुहोऽनादितः,

तस्माद् प्राप सनत्कुमारमुनितस्तस्मात सुराणां गुरूः।

तस्माद्देवपतिस्ततः फणिपतिस्तस्माच्चसत्पिङ्गलः,

तच्छिष्येर्बहुभिर्महात्मभिरयो मह्यं प्रतिष्ठापितम्।।

पं. युधिष्ठिरमीमांसकमतेन[1] उपर्युल्लिखिता परम्परा अधिका प्रामाणिकी वर्तते। पिङ्गलसूत्रेषुष्वपि पूर्ववर्तिनां सप्तानामाचार्याणां नामानि आगतानि। तेषु त्रयाणां क्रौष्टुकिताण्डियास्काचार्याणां नामानि वैदिकच्छन्दसां विचारप्रसङ्गे आगतानि। सैतवकाश्यवरातमाण्डव्यादि चतुर्णामाचार्याणां नामानि लौकिकच्छन्दसां प्रसङ्गे आगतानि। यास्काचार्यस्य निरुक्तग्रन्थे गायत्र्यादिप्रमुखवैदिकसप्तछन्दसां निर्वचनमात्रमुपलभ्यते। एतदतिरिक्तं वकुष्विराटपिपीलिकमध्यानां छन्दसामपि निर्वचनमस्ति, किन्तु यास्केन छन्दोलक्षणानि न निरूपितानि। अघत्वे यास्काचार्य विहाय अन्येषां षण्णामाचार्याणां ग्रन्थाः नोपलभ्यन्ते।

छन्दश्शास्त्रस्योपलभ्यमानाः ग्रन्थाः ग्रन्थकर्तारश्च

आचार्यपिङ्गलः - छन्दसां विषये वैदिकलौकिकच्छन्दसां व्यवस्थितं स्वरूपं पिङ्गलाचार्यकृते छन्दः सूत्रग्रन्थे एव सर्वप्रथमं दृश्यते। छन्दसां वेदाङ्गत्वसमर्थकोऽयं प्रमुखतमो ग्रन्थः। इमं ग्रन्थमाधृत्वेवापरे परवर्तिन आचार्याः छन्दोविषयकान् ग्रन्थानरचयन्। पिङ्गलाचार्यः पिङ्गलनागः शेषनागश्च एक एवेति

---

1 द्र. वैदिकच्छन्दोमीमांसा, पृ. 61 (संशोधितसंस्करण 1979 ई.)।

विदुषाम्मतम्। छन्दः शास्त्रस्य हलायुधकृतमृतसंजीवनीटीकायाः मङ्गलाचरणे आदावेव अनयोरेक्यं निरूपितम्।

यथा हि-

श्रीमत्पिङ्गलनागोवतछन्दःशास्त्रमहोदधौ।

वृत्तानि मौक्तिकानीव कानिचिद्विचिनोम्यहम्।।[1]

यथा व्याकरणे पाणिनीयसूत्राष्टाध्यायायाः यादृशं वैशिष्ट्यं महत्वञ्च तादृशमेव छन्दःशास्त्रे पिड्लछन्दः सूत्राणां महत्वं वैशिष्टयञ्च। यथा पाणिनिव्याकरणोदये अन्धव्याकरणशास्त्राणि हतप्रभानि जातानि तथैव पिङ्गलाचार्यात् प्राक्तनाचार्यकृत्छन्दश्शस्त्रग्रन्थाः नामनात्रावशेषाः जाताः। पिङ्गलाचार्य स्येदमत्यधिकं महत्वं यत् पिङ्गलशब्दः छन्दसः पर्यायवाची जातः। आचार्य पिङ्गलेन छन्दसां नाम निर्धारणेऽपि स्वीया प्रतिमा प्रदर्शिता। यस्य छन्दसः अनेकानि नामानि तस्य एकं नाम निर्धारितमपराणि नामानि निर्दिष्टानि। यथा- एकं छन्दः पिङ्गलाचार्यमते न्यड्कुसारिणी इति तस्यैव आचार्य क्रौष्टुकी मते "स्कन्धोग्रीवी अस्यैव यास्कस्य मते "उरोबृहती" इति। एवमेव एकस्य छन्दसो नाम आचार्य ताण्डिमते सतोबृहती" तस्यैव पिङ्गलमते "महाबृहती" इति।

पिङ्गलछन्दःसूत्राणामेकमपरमपि वैशिष्टयम् यत् वैदिकछन्दसां आर्षदिव्यासुरीत्यादि भेदप्रदर्शनम्। लौकिकच्छन्दसां वर्णनेन सह वैदिकच्छन्दसावर्णनमपि कृतं वर्तते। प्रस्तारादि वर्णने आचार्य पिङ्गलस्याङ्कगणितबीजगणितयोः महत्पाण्डित्यं प्रकाश्यते।

पिङ्गलाचार्यः कः आसीत् कुत्र च प्रादुरभूव् इत्यस्मिन् विषये विदुषां महान् विवादोवर्तते वामनपुराणे महताऽदरेणास्य नाम गृहीतम्।

सनत्कुमारः सनकः सनन्दनः,

सनातनोऽप्यासुरिपिङ्गलो च।[2]

एवमेव स्कन्दपुराणेऽपि काश्यां पिङ्गलेवरलिङ्गस्य स्थापनप्रकरणे पिङ्गलस्य नाम निर्दिष्टम्।

गणने पिङ्गलाख्येन पिङ्गलेशख्य संशितम्।

---

1 हलायुधकृत मृ.सं. टीकायां मङ्गलाचरणे श्लोक 4

2 वा. पु. 14-25

लिङ्गं प्रतिष्ठापितं शम्भोः कपर्दीशादुदग्दिशि।।

छन्दः शास्त्रस्य प्रस्तावनायां मेधाग्रतादार्येणपिङ्गलस्य नागइत्युपनामकेन सह सम्बन्धः साधितः। विद्वत्सु इयं प्रसिद्धिरपि वर्तते यत् पिङ्गलाचार्यः नागःअसीत्। तेरुच्यते यत् भुजङ्गप्रयातच्छन्दोनिरुपणावसरे समुद्रस्योपण्डे सकेतायाम्भूमो गुरुलघुरेखाप्रदर्शने सह समुद्रे प्रवेशपुरस्सरं भुजङ्गप्रयातच्छन्दो निर्दिष्टम्।

भजङ्ग प्रयातं याः।।[1]

महाभारतेऽपि सर्वयज्ञप्रसङ्गे पिङ्गलनागस्य चर्चाश्रूयते-

निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा।।[2]

एवमेवमत्स्यपुराणे पेङ्गलनामामुनिरपि श्रूयते -

ज्ञात्वायनो हरिर्वास्यः पेङ्गलश्च तथैव च।[3]

मन्येपिङ्गलस्यापत्यपुमान् पेङ्गलोमुनिर्भवेत् इति। कीथस्त्रभृंतिभिर्विद्वद्भिः पतज्जलिः पिङ्गलाचार्यैश्च एक एव मन्येते।[4]

परमिदं मतं समीचीनं न प्रतिभाति यतो हि पातज्जलमहाभाष्ये[5] पैङ्गलकाण्व इति पठितम्। विदुषा षड्गुरूशिष्येण सूचितं यत् पिङ्गलः भगवतः पाणिनेरनुजरासीत् इति। पण्डितयुधिष्ठिर मीमांसकेनापि इदमेवाङ्गीकृतम् स्वीये ग्रन्थे[6] प्रसाधितम्। अत्र पाणिनेवंशवृक्षोऽपि प्रदर्शितः।

व्यडः

पाणिन्

पाणिनिः पिङ्गलः

1 छ. शा. 6-37

2 म. भा. आ. पर्व 35-6

3 म. पु. 196-6

4 ए. बी. कीथ- ए हिस्ट्री ऑफ संस्कृत लिट्रेचर, पृ. 48

5 पा. म. भा. आह्निक 9 सूत्रे 3

6 संस्कृत व्याकरण का इतिहास पृ. 385

पाणिनिशिक्षायाः शिक्षाप्रकाशव्याख्यायां एवमेव प्रदर्शितम् यत् ज्येष्ठभ्राता पाणिनिना व्याकरण सूत्रम् विरचितम् तदनुनेन पिङ्गलाचार्येण व्याकरणमतमनुसृत्य शिक्षाग्रन्थो[1] निर्मितः।

आचार्यपिङ्गलस्य कालविषयेऽपि इतिहासविदां नैकमत्यम्। केचन कथयन्ति यत् नाट्यशास्त्र प्रणेतुः भरतमुनेः पूर्वं पिङ्गलाचार्योऽभवत्।[2] भरतमुनेः कालः खिस्तपूर्वद्वितीयशताब्धास्ति। अतः पिङ्गलस्य कालः ततः पूर्वं सिद्धयेति। द्वितीयं मतेदमस्ति यत् पिंगलसूत्रेषु "उरोवृहतीयास्कस्य" इति यास्काचार्यस्य नामायार्ति[3] तेन यास्काचार्यादनन्तरमस्य स्थितकालोभवितुमर्हति। यास्काचार्यस्य कालः[4] स्त्रिस्तपूर्वं पञ्चशताब्धस्ति। तेन यास्काचार्यदनन्तरं भरतमुने पूर्वञ्चास्यस्थितिकालोमन्यते, कीथमहोदयेपीममेव समर्थयति।[5] केषाञ्चन मते पाणिनेरनुजेति मत्वा पाणिनेः समकालिकोऽयं स्त्रिस्तपूर्वपञ्चमशताब्धामासीत् इति मन्यते। पाणिनेश्चकालः मैक्डानल[6] महोदयमतानुसारं तथा डा. वासुदेवशरणअग्रवालमहोदय[7]मतानुसारं स्त्रितात् पूर्वं पञ्चमशब्धस्ति। अस्याचार्यस्य देशः पश्चिमसमुद्रतीरसमीपस्थः अनुमीयते, यतो हि छन्दः सूत्रेषु अपरान्तिका" "वानसालिका" इत्यादीनि पदान्यायान्ति। अपरान्तिका इत्यस्यार्थ पश्चिम समुद्रतट समीपस्थ देशः तत्र भवाः अपरान्तिकाः। एवमेव कोङ्कणदेशात् पूर्वोदेशवनवासः तत्र भवाः वानवासिकाः। एतद् वात्स्यायनसूत्रस्य जयमङ्गलाव्याख्यायां साधु प्रतिपादितम्।[8] पञ्चतन्त्रे एकः श्लोकः प्राप्यते येन सूच्यते यत् वेलातटे मकरः पिङ्गलाचार्यं जग्राह -

छन्दोज्ञाननिधिं जहान मकरो वेलालटे पिङ्गलम्।[9]

---

1 शिक्षा संग्रहः काशी संस्करणम् , पृ. 350

2 नाट्यशास्त्रभूमिका पृ. 51 संपादकः आबूलालश्रवलः

3 पिङ्गलसूत्रम् 3-30

4 मैक्डानल ए हिस्ट्री ऑफ संस्कृत लिट्रेचर पृ. 22

5 ए. बी. कीथ : ए हिस्ट्री ऑफ संस्कृत लिटरेचर पृ. 48

6 मैक्डानल ए. हिस्ट्री आफ सं. लिट्रेचर पृ. 16

7 वा. श. अग्रवाल इण्डिया ऐज नोन टू पाणिनि पृ. 475

8 छन्दःसूत्र प्रस्तावना पृ. 6 सं. मेधाव्रताचार्यः।

9 पञ्चतन्त्र 2-26

मीमांसाभाष्ये शबरस्वामिनः वाक्येनापि एवमेव प्रतीयते-

यथा मकरेणापि पिङ्गलस्य सर्वगुरूस्त्रिकः प्रतीयते[1] समुद्रतीरवासित्वेनेव एवं सम्भवेत। कदाचिदाचार्यः समुद्रतटे ध्यानस्थो भवेत् समुद्रात् निःसृत्य मकरस्तं गृहणीयात्।

आचार्य पिङ्गलस्य नाम छन्दःशास्त्रस्य गुरुपरम्पराक्रमे महताऽवादरेण स्मर्यते। यथा -

छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणांपतिः,

तस्माद्दुश्चयवनस्ततः सुरगुरुमाण्डव्यनामाततः।

माण्ड व्यादपि सेतवस्तत ऋषिर्यास्करततः पिङ्गलः

तस्येदं यशसा गुरोर्भुविधृतं प्राप्यास्मदाद्यैः कुतम्।।

एवमाहृत्य इतिहासविदां मतानुसारेण पिङ्गलाचार्यस्य समय ईशापूर्वद्वितीयशताब्दीरेव स्वीक्रियते।

पिङ्गलछन्दः सूत्रम्

उपलभ्यमानेकछन्दोग्रन्थेषु छन्दःसूत्रपिङ्गलसूत्र-छन्दोविचितीत्यपराभिधानः प्राचीनतमश्चार्थ पिङ्गलछन्दः सूत्रग्रन्थः छन्दोमात्रविषयः। अत्र वैदिकलौकिकं उभया छन्दसी प्रतिपादिते। आचार्य-पिङ्गलस्य चर्चा प्रसङ्गेऽस्यकालो निर्धारितः। ग्रन्थोऽष्टध्यात्मकः। तत्र आद्येषु त्रिष्वध्यायेषु चतुर्थाध्यायस्यसप्तसूत्रेषु च वैदिकच्छन्दो विषयाः प्रतिपादिताः। शेषांशस्तु लौकिकच्छन्दोविषयपरकः। समासेन यथाऽध्यायंविषयो वर्ण्यते -

1. प्रथमाध्याये "म-य-र-स-तज-भन-गल" इति छन्दः शास्त्रय दशाक्षराणां परिचयद्वारा मगणादिगणानां गुरालघ्वोश्च लक्षणदयोवर्णिताः।
2. द्वितीयाध्याये गायत्रीप्रभृतिसप्तवैदिकच्छन्दसामार्षी-देवीप्रभृतितदष्टभेदानाञ्च वर्णनं कृतम्।
3. तृतीयाध्याधेयवैदिकच्छन्दसां पादानां तत्प्रयुक्ताक्षरसंख्यानां तदधिकृत्य तेषाञ्छन्दलामुपभेद छन्दोदेवताछन्दस्वरछन्दोवर्णछन्दोगोत्राणि च परिगणितानि।

---

1 शबरस्वामिमीमांसा भाष्ये 1-1-5

4. चतुर्थाध्याये उत्कृति अभिकृति प्रभृतिवैदिकच्छन्दो विचारणानन्तरम् "अथ लौकिकम्" (पि. सू. 4-8) इतिसूत्रमुल्लिख्य लौकिकच्छन्दसामवतारणा क्रियते। लौकिकच्छन्दो स्वरूपमालोच्यार्यावैतालीयमात्रासमकानि लोकप्रचलितानि छन्दांसि सविस्तरं प्रतिपादितानि। तदनन्तरं शिखाचूलिकादीनां मात्राच्छन्दसां चर्चा वर्तते।

5. पञ्चमाध्यायेः अध्यायेऽस्मिन् समार्धसमविषमवृत्तानां स्वरूप वर्णनानन्तरं समानी-प्रमाणी प्रभृतीनि छन्दांसि वर्णितानि।

6. षष्ठाध्याये- अत्र यतिस्वरूपविवेचनानन्तरं वैदिकच्छन्दसामाधारेणैव लौकिकच्छन्दसां लक्षणादीनि कृतानि। यथा हि गायत्रीछन्दसः आधारेण तनुमध्या। उष्णिहगाधारेण कुमारललिता। अनुष्टुबाधारेण माणवकक्रीडितं चित्रपदा-विद्युन्माला हंसततम्, बृहत्याधारेण भुजङ्गशिशुभृता हलमुखी। पङ्क्त्याधरेण शुद्धविराट्-रुक्मवती-मयूर-सारिणीमन्तोपस्थिता च। त्रिष्टुबाधारेण इन्द्रवज्रोपेन्द्रवज्रोपजतिदोधक-शालिनी-वातोर्मी-भ्रमरविलसितंरयोद्धतास्वागता-श्येनी विलासिनी। जगत्याधारेण वंशस्यइन्द्रवंशाद्रुतविलम्बितलोटकजलो-डकगतिकुसुमविचित्राचञ्चलाक्षिकाभुजङ्गप्रयात स्रग्विणीप्रतिमाक्षरा कान्तोत्पीडा वेश्वदेवीवाहिनीनवमालिनीइत्येषा लक्षणनिनिपितानि।

सप्तमाध्यायः - अत्र अतिजगती-शक्वरी-प्रभृतीनामतिच्छन्दसां विवेचनमस्ति। अन्ते दण्डकस्य निरूपणकृतम्।

अष्टमाध्यायः - अस्मिन्नध्याये पूर्ववर्तिष्वध्यायेषु अचर्चितानि लोकस्वीकृतानि कतिपयानि छन्दांसि प्रतिपादितान्येतेषां नाम गाथा इति।

अन्ते च प्रस्तारनष्टोदि्दष्टसंख्यानाध्वयोगएकद्वयादिलगक्रियानामानः षट्प्रत्ययाः लिखिताः। एभिः कस्मिश्चिछन्दसि के गणाः कियन्तः भविष्यन्ति तथा द्वितीयोगणः अथवा तृतीयश्चतुर्थो वा गणः को भविष्यति एवं विधाः गण सम्बन्धिनः अपरेऽपि विचाराः कृताः।

भरतमुनिः - भरताचार्यस्य नाट्यशाास्त्रमतीव प्रसिद्धमस्ति तत्र पञ्चदशे षोडषेऽध्याये च सविस्तरं साङ्गोपाङ्गं च छन्दःशास्त्रं विवेचितम्। तत्र केवलं लौकिकच्छन्दसां लक्षणादीनि लिखितानि। तत्र एकाक्षरात्मकच्छन्दसः आरभ्य षड्विंशत्यक्षरात्मकच्छन्दः पर्यन्तं विवेचितम्। अस्मिन् ग्रन्थे छन्दसां लक्षणं - प्रस्तारभेद - पादयति - सम - विषयम - अर्द्धसम -अर्द्धविषम -

गुरूलघुदेवतास्थान - प्रभृतीनि वर्णितानि। छन्दसां त्रयः प्रकाराः तेनोक्ताः - दिव्यदिव्येतरदिव्यमानुषरूपाः।

अग्निपुराणम् - अग्निपुराणे यथा व्याकरणादीनां शास्त्राणां विषयस्य संग्रहो वर्तते। तथैव छन्दः शास्त्रीयविषयाणामपि सङ्ग्रहः। अस्मिन् पुराणे 227 अध्यायदारभ्य 334 अध्याय पर्यन्तं छन्दः शास्त्रविजयाः विवेचिताः। अत्र छन्दोविवेचनम् पिङ्गलछन्दःसूत्रानुसारमेव। यथा पिङ्गलच्छन्दशास्त्रस्य अध्यायेषु येन प्रकारेण विषयक्रमः प्राप्यते तेनेव क्रमेण अग्निपुराणेऽपि प्रत्यध्याये विषयाः सन्निवेशिताः। किन्तु अत्र संक्षेपरूपेण सर्वं विवेचितम्। अत्र केवलं छन्दसां लक्षणानि निरूपितानि न तु उदाहरणानि।

नारदीय पुराणम् - अस्य पुराणस्य पञ्चाशतमतेऽध्याये छन्दो विषयाः निरूपिताः। अत्र वैदिकच्छन्दसां लौकिकच्छन्दसामुभ्योरपि वर्णनं प्राप्यते। पाद, यति, सम, विषमादीनामपि विचारः कृतो वर्तते। किन्तु सर्वमपि अतिसंक्षिप्तरूपेण।

गरुडपुराणम् - गरुडपुराणे 207 अध्यायादारभ्य 212 अध्यायपर्यन्तं छन्दः शास्त्रविषयो विवेचितः। अत्र लौकिकानि एव छन्दांसि विवेचितानि न तु वैदिकानि। अस्मिन् पुराणे छन्दःशास्त्रेविषयवर्णनं पिङ्गलछन्दःशास्त्रेण प्रभावितं वर्तते।

विष्णुधर्मोत्तरपुराणम् - विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डस्य तृतीयाध्याये छन्दशास्त्रविषयकं वर्णनमुपलभ्यते किन्तु अति संक्षिप्तरूपेण वर्णितमस्ति। तृतीयाध्यायस्यादौ इदं स्वीकृतमपि -

दिङ्मात्रमेतत्कथितं नरेन्द्र,
विस्तारजिज्ञासुरतो मनुष्यः।।
संसाधयेत्तत्स्वधिया यथावत्,
संदुस्तरं विस्तरसो हि वक्तुम्।।[1]

श्रुतबोधः - कालिदासकृतः श्रुतबोधनामको लघुकायग्रन्थः छन्दोग्रन्थेषु अतितरां प्रसिद्धः। लघुग्रन्थेऽपि व्यवहारयोग्यः सर्वोऽपि छन्दो विषयः वर्णितः। अत्र केवलं चत्वारिशत् श्लोकाः वर्तन्ते। एकस्मिन्नेव श्लोकेछन्दसः

---

1 वि. धर्मो. पु. 3-3-3

लक्षणमुदाहरण्यमुभयमपि निबद्धमस्ति। कविसम्प्रदाये प्रसिद्धानि व्यवहारयोग्यानि सर्वाणि छन्दांसि अत्र आगतानि।

नवसु कालिदासेषु कतमोऽयं कालिदास इति विषये विदुषां मतभेदः। कृष्णमाचार्यमतेनास्योपनाम[1] कोटिजिद् आसीत् तथ काञ्चीकामकोटिमठाधीशस्थ श्री शङ्कराचार्यस्यायं शिष्यः आसीत्। 1430 खिस्ताब्दे अस्य स्थितिर्मन्यते। एतन्मते नवसु कालिदासेषु अयं तृतीयः कालिदासः। ऋतुसंहारग्रन्थोऽपि अस्यैव कृतिरिति मन्यते।

बृहत् संहिता - ज्योतिषविषयकोऽयंग्रन्थः वाराहमिहिररचितायां बृहत्संहितायां चतुर्दशेऽध्याये छन्दसां संक्षिप्तं विवरणं प्राप्यते। कीथमतेन वराहमिहिरस्य छन्दःशास्त्रविषयकः अन्योऽपि ग्रन्थोभवितुर्महति किन्तु अद्यावधि एतादृशो ग्रन्थे दृष्टिपथि नायात्।

दण्डीभामहौ - कीथ[2] महोदयस्य लेखानुसारं दण्डिना भामहेनापि छन्दोग्रन्थो विरचितो किन्तु सम्प्रति लोपलभ्येते।

जयदेवच्छन्दम् - जयदेवेन विरचितछन्दोग्रन्थः ''जयदेवच्छन्दसंहति नाम्ना प्रसिद्धः। अयं ग्रन्थः अष्टस्वध्यायेषु वर्तते। पिङ्गलछन्दःशास्त्रस्य प्रभावो ग्रन्थेऽस्मिन् स्पष्टं परिलक्ष्यते। वैदिकानि लौकिकानि चोभयविधानि छन्दांसि अत्र वर्णितानि। छन्दो लक्षणेष्वेव छन्दसामुदाहरणानि अपि वर्तन्ते। अयं जयदेवो गीतगोविन्दाकारात् जयदेवः। प्रो. एच. डी. वेल्हणकरमहोदयेन[3] अस्य समयः 600-900 वि. संवतस्य मध्ये स्वीकृतः।

वृत्तजातिसमुच्चय - विरहाङ्कविरचितः छन्दोग्रन्थः षट्सु अध्यायेषु विभक्तोऽयं ग्रन्थः ''वृत्तजातिसमुच्चय'' नाम्ना प्रसिद्धः। अयं ग्रन्थः प्राकृतभाषायां लिखितः। सम्पादकवेलणकर महोदयेन प्राकृतभाषायाः संस्कृतभाषायामनुवादः कृतः। सम्पादकः केषाञ्चित छन्दोलक्षणानां तुलना हेमचन्द्रस्य छन्दोऽनुशानेन पिङ्गलेन च कृता। अत्र लक्षणेष्वेवोदाहरणान्यपि प्रदर्शितानि। अस्मिन् ग्रन्थे कतिपयच्छन्दःशास्त्राचार्याणां नामान्यपि लिखितानि। यथा पिङ्गलः भुजङ्गाधिः

---

1 एम. कृष्णमाचारियरः : हिस्ट्री ऑफ क्लासिकल संस्कृत, पृ. 908

2 ए. बी. कीथ : ए हिस्ट्री आफ संस्कृत लिट्रेचर, पृ. 416

3 द्र. जयदामनभूमिकायां, हरितोषमाला, बम्बई

विषधरः वृद्धकविः शालाहणश्च। डॉ वेल्हणकर महोदयानुसारं अस्यकालः 9 वा 10 म् शताब्दी भवितुमर्हति। पिङ्गलपश्चात् मात्रिकच्छन्दसां सर्वाधिकविवेचनमस्मिन् ग्रन्थे प्राप्तमस्ति। अस्मिन् षट् परिच्छेदाः सन्ति। भाषा प्राकृतः किन्तु पञ्चमपरिच्छेदे संस्कृत भाषायां वर्णिकच्छन्दसां लक्षणानि निरुपितानि सन्ति। अस्मिन् यतेरुल्लेखो नास्ति संभवतः विरहाङ्को यतिविरोधिसम्प्रदायिकः।

गाथालक्षमवम् - अयं छन्दोग्रन्थो नन्दिताढ्यविरचितः वेल्हणकर[1] मतानुसारं अस्य समयः ख्रिस्ताब्दस्य प्रारम्भिकः कालः। अयंग्रन्थः प्राकृत-अपभ्रंश भाषायां च विरचितः। प्राकृतपरम्परायाश्छन्दोग्रन्थेष्नु अयं सर्वतोप्राचीनतमोग्रन्थः। गाथाछन्दसः जैनबोधागमग्रन्थेषु बाहुल्येन प्रयोगः कृतो वर्तते।

स्वयम्भृच्छन्दः - स्वयम्भूजैनकविना विरचितः स्वम्भूच्छन्दानामा ग्रन्थः। लेखकस्य विषये विदुषां मतभेदोस्ति वेल्हणकरेण[2] "पउमचरिअ" इति ग्रन्थस्य प्रणेतुः स्वयम्भू कवेर्भिन्नोऽयं कविरिति निधर्य दशशताब्दयाः उत्तरार्धस्य समयः स्वीकृतः। किन्तु राहुलसङ्कृत्यायनः[3] हीरालाल[4]महोदयश्च उभौ एकवेव इति मन्यते। ग्रन्थस्य प्रारम्भिकः अंशः अनुपलब्धः अन्यांशः पूर्णः। अत्रोदाहरणानि प्राकृत अपभ्रंशभाषानिबद्धानि सन्ति। 206 पद्यानि अन्यप्राकृतकवीनां उद्धृतीनि सन्ति। ग्रन्थोऽयं अपभ्रंशछन्दपरम्परायां महत्वपूर्णः कविना मगणादिगणानां प्रयोगं विहाय नवीन प्रणाल्या पचतुद इत्यादि पारिभाषिक शब्दाधारैश्छन्दसां लक्षणानि निर्मितानि।

जयकीर्तिः - जयकीर्तिकृतस्य ग्रन्थस्य नाम छन्दोनुशासनम्, अयं ग्रन्थः पिङ्गल जयदेवयोरिव अष्टस्वधिकारेषु विभक्तः अत्र पिङ्गलसूत्राणां प्रभावः स्पष्टं संल्यक्ष्यते। अस्मिन् ग्रन्थे केवलं लौकिकान्येव छन्दांसि वर्णितानि न तु वैदिकानि। जयं जैनसम्प्रदायस्य कविरासीत्। अपभ्रंशभाषायाः मात्रिकच्छन्दसामपि सन्निवेशोऽय कृतः। ग्रन्थान्ते केषाञ्चित् छन्दश्शास्त्राचार्याणां नामायातम्।

---

1 कविदर्पणः (गाथालक्षणस्य भूमिकायां) रा. प्रा. वि. प्र. जोधपुर (सन् 1962)

2 स्वयम्भूछन्दसभूमिका (1949 ई.)

3 रा. सं. - हिन्दीकाव्यधारा पृ. 22

4 हीरालालजेनः - स्वयम्भू एण्डहिज् पोएम्स इन अपभ्रंश नागपुर मुनि. अरनल सं. 1, दिसम्बर 1935 पृ. 35

माण्डव्यपिङ्गलजनाश्रयलेतवाख्य,

श्रीपादपूज्यजयदेवबुधादिकानाम्

छन्दासिवीक्ष्य विविधानपि सत्प्रयोगात्।[1]

छन्दोनुशासनमिदं जयकीर्तिनोक्तम्।।

ग्रन्थेऽस्मिन् नूतनानि कानिचिद् नात्रिकच्छन्दांसि वर्णितानि[2] छन्दसां लक्षणानि कारिकारूपेण सन्ति।

छन्दोऽनुशासनम् (हेमचन्द्रस्य) - कालिकालसर्वज्ञहेमचन्द्रकृतस्य छन्दोग्रन्थस्यापि नाम छन्दोऽनुशासनमस्ति। अष्टस्वध्यायेषु ग्रन्थोऽयं निबद्धोस्ति। प्रथमाध्याये भूमिकायतिप्रसङ्गश्च। द्वितीयतृतीयाध्याययोः संस्कृतस्य वर्णवृत्तानि चतुर्थाध्याये वेतालीयमात्रासमकवृत्तानिभेदसहितानिनिबद्धनि। पञ्चमाध्यायात् अष्टमाध्यायपर्यन्तमपभ्रंशभाषायाः मात्रिकछन्दांसि वर्णितानि।

हेमचन्द्रः श्वेताम्बर जैनसम्प्रदायस्य मुनिः तथा आचार्यः आसीत्। अयं पूर्णतलगच्छीय श्रीदेवचंद्रसूरेः शिष्याः वणहिलपुरपन्तनस्य नृपतिसिद्धराजजयसिंहस्य सभायां प्रमुखो विद्वांश्च आसीत्। अस्य समासो वि. सं. 1145 तः 1229 यावत-स्वीकुर्वन्ति विद्वांसः। अस्यानेकानि नामानि प्रसिद्धानि यथा कालिकालसर्वज्ञः चाङ्गदेव हेमाचार्यः स्रामचन्द्र इत्यादिनी। अनेन अनेके छन्दकाव्य-योग-व्याकरण-विषयकाग्रन्थाः लिखिताः। अनेन छन्दोनुशासनग्रन्थोपरिस्वोपज्ञटीकापि लिखिता।

कविदर्पणः - अयंग्रन्थः अज्ञातजैनकविकृतिवर्तते। छन्दसामुदाहरणेषु जिनसिंहसूरिरचित चूडालदोहकाः[3] सन्तिं कविदर्पण इति नामको ग्रन्थः वेल्हणकरमहोदयेन पुण्यपन्तने भाण्डारकर प्राच्यशोधसंस्थानेप्रकाशितः।[4] अस्य छन्दोग्रन्थस्य परिचयः नन्दिसेनकृतस्य 1365 तमे वर्षे रचितस्य अजितशान्तिस्तवस्य जिनप्रभुसूरिणा कृते भाष्ये प्राप्यते। अस्मिन् ग्रन्थे जिनसिंह सूरि, हेमचन्द्रसूरि प्रभासूरितिलकसूरि, हर्षदेव प्रभृतिनां नामानि आमतानि।

---

1 जय. छन्दोऽनुशासने 8-19

2 तत्रैव अधि. 6। श्लो. 28-32

3 कविदर्पणः पृ. 24

4 एच. डी. वेल्हणकरः ग्रन्थ सं. 16, पृ. 56, 1934-35 ई.।

अस्मिन् षडछेश्यानि सनित अत्र वर्णिक मात्रिक समविषमार्द्धसमप्रत्ययादीनां विचाराः वर्तन्ते। ग्रन्थस्यास्य मूलपाठः प्राकृतभाषायामस्ति वेलहण्करमहोदयेन अस्य संस्कृतानुवादोविहितः। अस्य भाष्यस्य मूलभाषा संस्कृतभाषैव। लक्षणानि उदाहरणानि च पृथक् - पृथक् वर्णितानि।

प्राकृतपैङ्गलम् - अस्यग्रन्थकर्तुनाम अज्ञातम्। निर्णयसागरात् प्रकाशिते "प्राकृतपिङ्गलसूत्राणीति ग्रन्थे 1884 स्रिस्ताब्दे सम्पादिते भूमिकायामस्य[1] लेखकस्य नाम वाग्भट इति लिखितम्। किन्तु अस्यैव ग्रन्थस्य परवर्तित-संस्करणो 1902 ख्रिस्ताब्दे ग्रन्थकर्तु नाम न लिखितम्। श्री भोलाशंकरव्यास मतेन[2] हरिब्रह्म हरिहर वा ग्रन्थकर्ता।

अस्मिन् द्वौ परिच्छेदौ वर्तते। मात्रिकच्छन्दांसि वार्णिक च्छन्दांसि च लक्षेणेषु च ग्रन्थकारेण प्रस्तारभेदस्य टादिगणानां मगणादि गणनां च पारिभाषिकशब्दावलेः प्रयोगः कृतः।

वृत्तरत्नाकरः - अस्यग्रन्थकर्तुर्नाम केदारभट्टोऽस्ति। अध्यनाध्यापने अद्यत्वे अस्यग्रन्थस्य प्रचुरः प्रचारो वर्तते। ग्रन्थेऽस्मिन् षडध्यायाः सन्ति। लक्षणेन सह उदाहरणान्यपि सन्निविष्यानि। तेन छन्दोजिज्ञासुनां लक्ष्यलक्ष्णज्ञानंसुकरं भवति। मात्रिकच्छन्दसां विवेचनमत्र न्यूनंताकृतं वर्तते।

छन्दःकोशः - अस्य रचयिता श्रीरत्नशेखरः। वेलणकरमहोदयेन बम्बई विश्वविद्यालयपत्रिकायामग्रं[3] ग्रन्थः प्रकाशितः। भण्डारकरप्राच्यशोधसंस्थाने अस्यमातृका उपलभ्यते।

छन्दोमञ्जरी - ग्रन्थास्यरचयिता गङ्गादासः अयं अंगीयस्य गोपालदास वेद्यास्यात्मजः मातु र्नामसन्तोजदेवीरस्ति।[4] ग्रन्थेऽस्मिन् षड्स्तबकाः सन्ति। अत्र मुख्यानि छन्दांसि निरूपितानि। अत्र प्रस्तारादीनां विचारो न कृतः। छन्दोमज्जर्याः शैली वृत्तरत्नाकर इव। षष्ठस्तबके गद्यकाव्यस्य तस्य भेदेषु च विचारः कृतः इदं

---

1 पाकृतपेङ्गलम् भूमिका पृ. 61

2 द्र. प्राकृतपेङ्गलम् - भा. 2, पृ. 6-26

3 एच. डी. वेलणकरः, जे. यू. बी. भागे 2, खण्डे 3, पृष्ठ 55

4 देवं प्रणम्य गोपालं वेद्यगोपालदासजः
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यदः।। 1-1

अस्य ग्रन्थस्य वैशिष्ट्यम्। गङ्गादासस्यः अन्याः अपि कृतयः सन्ति अच्युतचरितमहाकाव्यम्, कंसारिशतकम् दिनेशशतकं च।[1] गङ्गादासस्य समयोऽपि निर्विवादो नास्ति। तथापि पञ्चदशः षोडशो वा शताब्दी मन्यन्ते।

आचार्य जनाश्रयस्यछन्दोविचितिः - आचार्य जनाश्रयेनापि छन्दोविचिति नामा ग्रन्थो निर्मितः। संस्कृत भाषानिबद्धछन्दोग्रन्थेषु प्राकृतभाषानिबद्धछन्दोग्रन्थेषु च पिङ्गलाचार्यकृत छन्दःसूत्रग्रन्थस्य प्रभावः संलक्ष्यते। तेषु ग्रन्थेषु पिङ्गलछन्दः सूत्रस्यानुकरणं येन केनापि रूपेण वर्तते। किन्तु आचार्यजनाश्रयेण पिङ्गलप्रवर्तितात् पथोभिन्नः पन्थाः प्रवर्तितः। स इतिहासेषु पिङ्गलसम्प्रदायात् भिन्नोजनोश्रयसम्प्रदाय उच्यते। पिङ्गलसम्प्रदाये त्रिभिरक्षरेर्गणोनिर्मितः किन्तु जनाश्रयेण द्वाभ्यामक्षराभ्यामारम्भ षड्भिरभक्षेर्गणनिर्माणं कृतम्। पिङ्गलस्वीकृतेषु गणेषु व्यञ्जनाक्षरेणेव गणनानिधार्रितम्। किन्तु जनाश्रयेण स्वराक्षरेण व्यञ्जनाक्षरेण च गणनाम निर्धारितम्। अस्मिन् सम्प्रदाये पिङ्गल सम्प्रदायाद् भिन्नाः अपराऽपि विशेषताः वर्तन्ते।

यत्र पिङ्गलाचार्यस्य छन्दोविचिति ग्रन्थः अष्टस्वध्यायेषु निबद्धः तत्र जनाश्रय कृतश्छन्दोविचितिग्रन्थः षट्सु अध्यायेषु निबद्धः। अस्मिन् ग्रन्थे समविषमार्द्धादि वृत्तानां विचारेण सह प्रस्तारादि विचारोकृतः।

किन्तु अस्य सम्प्रदायस्य पद्धते दुरूहतया प्रचारः प्रसारः नाभवत्। अस्य ग्रन्थस्य रचना जनाश्रयेन विष्णुकुण्डीनाधिपति माध्ववर्मनः प्रथमस्य राज्ये कृता अस्य समयः षष्ठशताब्दीः (ए. डी. पूर्व) प्रायः स्वीक्रियते।

एभ्यो अन्येऽपि जैनाचार्य निर्मिता त्रयोविंशतिसंख्याकाः ग्रन्थः यत्र तत्र पुस्तकालयेषु हस्तलिखितमातृकारूपेण सुरक्षिताः सन्ति। इति डॉ. रुद्रदेवत्रिपाठिमहोदयेन सम्पादितस्य काव्यप्रकाशस्य भूमिकायां सूचितम्।

वाग्बल्लभ :- अस्य प्रणेता कविदुः संभामः। अयं कान्यकुब्जवंशीयः काशीनिवासी चासीत्। अस्य पितुर्नाम चूडामणिशर्मा पितामहश्च प्रतापशर्मा। वाग्वल्लभस्य निर्माणकालः वि. सं. 1970 यावत् स्वीकर्तुं शक्यते यतो हि अस्यैव ग्रन्थस्य वस्वर्णिनी नायिकाटीका श्रीदेवीप्रसादशर्मणा वि. सं. 1985

---

1 छन्दोमञ्जरी 6-6

मध्ये निर्मिता देवी प्रसादः दुःखभंजन कवेः पुत्र आसीत्। दुःखभजनः ज्योतिर्विदोऽपि आसीत् तेन हि प्रस्तार क्रमेण अनेकानि नवीनानि छन्दांस्यपि निर्मितानि अस्मिन् ग्रन्थे 1539 छन्दांसि निरुपितानि सन्ति।

वृत्तमौक्तिकम् - कविचन्द्रशेखरभट्टविरचितवृत्तमौक्तिकग्रन्थोऽपि छन्दःशास्त्रस्य विशिष्टो ग्रन्थः। अयं ग्रन्थः मात्रावृत्तखण्डःवर्णिकवृत्तखण्डौभेदेन द्विधा विभक्तः। प्रथमखण्डे षट्प्रकरणानि द्वितीयखण्डे च द्वादशप्रकरणानि सन्ति द्वितीयखण्डस्य नवमे विरुद्धावलिप्रकरणे चत्वारि अवान्तर प्रकरणान्यपि सन्ति। अतविशालकायोऽयं ग्रन्थः। सर्वेषां छन्दसां छन्दोभेदानां च विवेचनं विस्तृतरुपेण कृतमस्ति। ग्रन्थ निर्माणकालः वि. सं. 1675-76 अस्ति, कवेः पितुर्नाम लक्ष्मीनाथभट्टः मातुर्नाम लोपामुद्रा चास्ति। वृत्तमौक्तिकस्य "वृत्तमौक्तिकवार्तिकदुष्करोद्धार" नामिका एका टीकापि वर्तते। एभ्योऽतिरिक्ता अपि छन्दोग्रन्थः वर्तन्ते -

1- नन्दनन्दनस्य छन्दोविलासः[1]

2- दामोदरमित्रकृत वाणीभूषणम्।

3- चिन्तामणिकृत प्रस्तारचिन्तामणिः[2]

एतद्ग्रन्थातिरिक्तोऽपि अद्यत्वे सुरभारती समुपासकेः छन्दसां नवीनाः प्रयोगाः क्रियन्ते। अत्र उदाहरण रूपेण येषाञ्चित् छन्दसां नामानि प्रस्तूयन्ते। मेरठ विश्वविद्यालयात् प्रकाशितायां संस्कृत वार्षिकशोधपत्रिकायां[3] डा. राम किशोर मिश्रेण कानिचित् नूतनानि छन्दसां नामान्युदाहरणानि च कल्पितानि येषामन्यत्र छन्दःशास्त्रीयग्रन्थेषु विवरणं न प्राप्यते। यथा-

मयावृत्तानुसन्धानं स्वरचनासु यत्कृतम्,
छन्दःसूत्रादिग्रन्थेषु प्राप्यते चवापि तन्नहि।।
चेद् यदत्र च मे वृत्तं तत्तन्भूतमेव हि,
येषां लक्षणनामानि कल्पितानि मयाबुधाः।।

---

1 दिल्लीस्थ लालबहादुर शास्त्रि क. सं. विद्यापीठस्य शोधपत्रिकायां शोधप्रभायां 1981-82 खिस्ताब्दे प्रकाशितः।

2 यम कृष्णमाचारियर-हिस्ट्री ऑफ क्लासिकल संस्कृत लिटरेचर पृ. 910

3 मेरठ वि. वि. सं. शोधपत्रिका (भाग 1, 11) 1983

वर्ण मात्रादिवृत्तेषु समानि विषनानि च।

तेषु वार्णिकवृत्तानि दर्श्यन्ते प्रथमं मया।।

समवर्णवृत्तानि - वाणी, विद्या, जया, श्री, यमुना, शाली, प्रतिमादयः।

विषमवर्णवृत्तम् - मतिः नूतनधारा चन्द्रम् गौरवम् रीतिः प्रणीतिः प्रीतिः संगीतादयः।

अर्धसममात्रिक चतुष्पदः - आभा, शशिवाला गिरा सौख्यदाप्रभृतयः।

अर्धसममात्रिक सप्तपदी - धरणि प्रगीतक सुजातादयः।

एवमेव अर्धसममात्रिके विषम-मात्रिके च नवपदी षट्पदी सप्तपद्यादि छन्दसामुल्लेखो वर्तते।

प्रकृतग्रन्थसम्पादनम् - अयं छन्दोवृत्तिग्रन्थः अदावध्यप्रकाशितः उत्तरप्रदेशस्य मिर्जापुरमण्डले खटवरियाग्रामवासिनः पण्डित श्री प्रेमनाथत्रिपाठिनः पुस्तकागारे सम्प्राप्तः। ग्रन्थोऽयं प्रतिलिपिरूपेण लब्धः। पुष्पिकया जायते यत् सप्तदशतमसंवत्सरे वेक्रमे इन्द्रप्रस्थनगरे (दिल्ली नगर्य्याम्) प्रतिलिपिः कुत। श्री प्रेमनाथ त्रिपाठिनः पूर्वमेव श्रीमता प्राणनाथत्रिपाठिना प्रतिलिपिः कारिता इत्यपि पुष्पिकया ज्ञायते। त्रिपाठिपरिवारे अस्मिन् अनेके संस्कृत विद्वांसः समजायन्त परिवारश्चायं संस्कृतपण्डितसम्मानपूर्णः सुरभारतीविदुषांमाश्रयश्चेति अनेकेरभिलेखादिप्रमाणैः प्रमाणितः दिल्लीप्रशासकबादशाहशाहजहाँ सम्मानितश्चासीत्। अयं ग्रन्थोऽद्वितीयो वर्तते। अस्य प्रतिलिपिः कुत्रापि नोपलभ्यते। भारतस्य प्रसिद्धेषु पुस्तकागारेषु मद्रासओरियन्टल लाईब्रेरीमध्ये तंजौरसंस्कृतपाण्डुलिपिसंग्रहालये च अस्य प्रतिलिपिनोपलब्धा। कैटलागोरसकैटलागोरम् इत्याख्यग्रन्थेऽपि एतद् विषये सूचना न प्राप्यते। एतत्प्रतिलिपिग्रन्थे गुरूमुखीलिपेः प्रभावो लक्ष्यते यथा च, घ, ध इत्यादि वर्णानां लेखनं गुरूमुखीलिपिवद् वर्तते। मन्ये दिल्लीनगरे अस्य छन्दोवृत्तिग्रन्थस्य प्रतिलिपिर्जाता। तेनास्य स्थितिर्भारतस्य पश्चिमेभागे भवेत्। पश्चिमभारतस्य संस्कृतग्रन्थानां संग्रहस्थानं लाहौर संस्कृतकालेजपुस्तकालय आसीत् तेन लाहौरसंस्कृतग्रन्थसंग्रहालये कथंचिदयं ग्रन्थो भवेदिति अनेनेवाभिप्रायेण होशियारपुरस्थ वैदिकशोधसंस्थानस्य पुस्तकालये अस्य प्रतिलिपिमवाप्तुं प्रयासमकरवम् किन्तु तत्रापि साफल्यं नावाप्तवती।

पूज्यपादानां निर्देशकमहोदयानां श्रीमतां बटुकनाथशास्त्रिमहाभगानां पुरतः एतत्सर्वं निवेदितमुपस्थापितञ्च। किन्तु ग्रन्थस्य दुलर्भत्वात् अतीवोपादेयत्वाच्च अस्य ग्रन्थस्य सम्पादने गुरूणामाज्ञया शुभाशीभिश्च व्यापृता। अद्योपलभ्यमानेषु पिङ्गलछन्दः सूत्रस्य भाष्यव्याख्याटीकावृत्तिग्रन्थेष्वयं ग्रन्थोऽतितरसाधारणोऽद्वितीया एव। अतोऽस्य सम्पादनं प्रकाशनं चातीवावश्यकम्।

एम् कृष्णमाचारिमहोदयेन[1] पिङ्गलाचार्यविरचितछन्दः सूत्राणामेषामेव भाष्याणामुल्लेखः कृतो वर्तते।

1- हलायुधकृतभाष्यम्।

2- वाणीनाथकृतभाष्यम्।

3- मकरध्वजसूनु श्रीहर्षशर्मकृतभाष्यम्।

4- रामयभट्टपुत्रलक्ष्मीनाथकृतभाष्यम्।

5- यादवप्रकाशकृतभाष्यम्।

6- दामोदर कृतभाष्यम्।

एतेषु हलायुधकृत भाष्यस्य नाम मृतसंजीवनी व्याख्या इति वर्तते। इदं भाष्यं व्याख्या वा ईशवीय दशमशताब्द्या उत्तरार्धे विरचितम्। मैक्डानल[2] कीथ[3] महोदयाभ्यां एतत्स्पष्टीकृतम्। हलायुधभाष्ये कतिचित् सूत्राणि न दृश्यन्ते। अत्रकारणद्वयं भवितुमर्हति। प्रथममिदं यदेषां सूत्राणामति स्पष्टार्थ तया व्याख्यानानपेका द्वितीयं सूत्रविशेषाणमस्वीकारः।

अन्येषां भाष्याणां विषये न किञ्चिद्विवरणमधि गम्यते। अधुनापिङ्गलसूत्राणामुलम्यमानेषु भाष्यटीकाव्याख्यादिषु महादेवभट्टाचार्यविरचितायाः पिङ्गलछन्दसूत्रवृत्तेश्चर्चा कैटलागरमित्यत्रापि नास्ति एतत् पूर्वमपि निवेदितम्। सूत्रसहित एतद् वृत्तिग्रन्थः एकोनपञ्चाशत् पृष्ठेषु पूर्यते। उभयोः पृष्ठयोराहत्य अष्टनवति परिमिता भवति। पुष्पिकया ज्ञायते यत् अष्टादश वैक्रमाब्दस्य पूर्वार्धःः (1712) अस्य प्रतिलिपिः कालः। प्रतिलिपिकारयिता

---

1 एम् श्रीकृष्णम्माचारियर - ए हिस्ट्री ऑफ क्लासिकल संस्कृत पृ. 903

2 मैक्डॉनल - ए हिस्ट्री ऑफ संस्कृतलिट्रेचर पृ. 437

3 कीथः ए हिस्ट्री ऑफ संस्कृत लिट्रेचर पृ. 414

उत्तरप्रदेशीय मिर्जापुर मण्डलान्तर्गत खटखरिया ग्राम निवासिनं प्रेमनाथत्रिपाठिनः पूर्वजः नवमः पूर्वपुरुषः। मध्ये-मध्ये अशुद्धाक्षर

निरसनार्थं पीतगोरीचनालेपः पीतहरताल्लेपो वा प्रयुक्तः। यत्रकुत्रापि च्युतपाठपूरणार्थमेकद्विसंख्यानां चिह्नं विधाय पृष्ठस्योपरि अधो वामे दक्षिणे च पार्श्वे पाठयोजना कृता वर्तते।

प्रतिलिपिकर्ता प्रायोऽल्पज्ञ एव भवति तेन प्रतिलिप्याअनेकास्त्रुय्यः संभाव्यन्ते। अस्यग्रन्थस्य प्रतिलिपिकर्ता संस्कृतानभिज्ञः प्रतीयते तेन "श, ष, स, स, ज, व" इत्यादि वर्णानां लेखने प्रायोऽनवध्मनता दृश्यते। प्रतिलिपिषु त्रुटिसंभावनायां बहूनि कारणानि भवन्ति। केचनविद्याव्यसनिनो भवन्ति ये छात्रान्अध्यापयन्ति छात्रेश्च प्रतिलिपिं कारयन्ति। ते ग्रन्थं पठन्ति छात्राश्च लिखन्ति। अनेन प्रतिलिप्यां दोषाः सम्भवन्ति। केचन व्यापारिणः प्रतिलिपिं कुर्वन्तिकारयन्ति च अनेनापि दोषाः सम्भवन्ति। प्राचीनसमये प्रतिलिपिकर्तुः संज्ञा लेखक आसीत्। लेखकस्य गुण्दोषविचारणायां काव्यमीमांसाया कश्चन विचारो उपलभ्यन्ते।

सर्वभाषाकुशलः शीघ्रवाङ्चार्वक्षरः इङ्गिताकारवेदी नानालिपिज्ञः कविर्लाक्षणिक एव लेखकः स्यात्।[1]

संस्कृतस्य प्राचीनग्रन्थाः त्रिषु रूपेषु उपलभ्यन्ते -

1- मूलरचयितुः हस्तलिखितरूपेण।

2- मूल-लेख हस्तलिपिः, ततश्च तत् प्रतिलिपिरूपेण।

3- मूलग्रन्थस्य प्रतिलिपिः ततः प्रतिलिपिभ्यः प्रतिलिप्यन्तराणि।

प्रथमरुपे संपादकस्य कार्यं कष्टसाध्यं न भवति। यतो हि मूलरचयितुर्लिपिसत्वात् रचयितुः सर्वोऽपि आशयः सुनिबद्धः प्राप्यते। किन्तु यदायं ग्रन्थोऽतीव प्राचीनो भवति तदा अनेकेषां विकाराणां संभावना भवति। यथा- पत्राणि जीर्णत्वात् खण्डितानि भवन्ति। कीटभ्रष्टाः, मसीहीना अक्षराणिमृष्टानि च जायन्ते। तेन सम्पादकानां कृते पाठसंधोधनमन्तः साक्ष्यैर्वाह्यसाक्ष्यैश्च च पठनं भवति।

---

1 का. मी. पृ. 131

द्वितीये रूपे च मूललेखकस्य हस्तलिपिः परिचीयते तदा अन्य प्रतिलिपीनां सहाय्येन पाठशुद्धकरणे सम्पादको बहुसाहाय्यं लभते। यदा च मूललेखकस्य कानिचिदक्षराणि अन्यप्रतिलिपिषु लुप्तानि भवन्ति तदा विभिन्न प्रतिलिपीनां साहाय्येन शुद्धपाठो निर्धारणीयो भवति।

तृतीयरूपे च यावत्योऽधिकाः प्रतिलिपयः प्राप्याः ताः सर्वाः संगृह्य मातृकावंशो निर्मातव्यः। सर्वप्राचीनां मातृकामाधृत्य अन्यासां मातृकाणां साहाय्येन रचयितुरभीष्टरो सूत्रपाठो मूलपाठो निर्धारणीयः। विभिन्न मातृकावंशवृक्षेषु सन्धेषु ग्रन्थं पूर्वापरभावेन समालोच्य मूलपाठोनिर्धारणीयः।

प्रतिलिपिकर्तारो यदा प्रतिलिपिं कुर्वन्ति तदा तिस्रः त्रुटयः सम्भवन्ति -

1- आनेच्छिकीत्रुटिः

2- ऐच्छिकीत्रुटिः

3- ऐच्छिकी अनेच्छिकीय।

प्रबुद्ध प्रतिलिपिकर्त्रपेक्षया अप्रबुद्धप्रतिलिपिकर्ता श्रेयान् भवति यतो ह्ययम् प्रबुद्धो यदा मूलं पश्यति तयेवानुलिखति। प्रबुद्धस्तु मूलपाठं दृष्ट्वा यत्रकुत्रचित् स्वमत्या यत्किञ्चिद् निवेशयति। अत एवाप्रबुद्धः प्रतिलिपिको यत्रकुत्रापि प्रतिलिपिं दूषयति तत्राबोधः अज्ञानंत्वरादृष्टिदोषादिकारणम्। अतएव त्रुटिरियमनेच्छिकी त्रुटीः कथ्यते। तेन क्वचिदक्षरच्युतिः क्वचिदक्षराधिक्यं क्वचिद् पंक्तिच्युतिर्वा ज्ञायते।

द्वितीया ऐच्छिकीत्रुटिः। इयं त्रुटिः सुबुद्धप्रतिलिपिकर्त्रा भवति। सिद्धान्तविशेषेण सम्प्रदायविशेषेण प्रभावितः प्रतिलिपिकर्ता दुराग्रहवशादादर्शमातृकापाठं परिवर्त्य केनचिदंशेन स्विसिद्धान्तितं पाठं निवेशयति तेन प्राचीनेषु ग्रन्थेषु बहुत्र प्रक्षिप्तः पाठउपभ्यते। एवं विधाः त्रुटयः प्रायोन्यूना एव भवन्ति। प्रबुद्धः सम्पादक एतानू त्रुटीः सरलतया परिशोधयति। यदो इच्छापूर्वकं ज्ञानपूर्वकं वा एवं विधा त्रुटिर्जायते सा तदेवेच्छिकीत्रुटिरुच्यते। अन्यथा निष्प्रयोजना जाता त्रुटिरनेच्छिकीएव। तृतीया त्रुटिरेच्छिकी अनेच्छिकी च तदा भवति यदा आदर्शमातृकायां कस्मिश्चिद् स्थले अक्षराणि लुप्यन्ते कीटजलादिदोषाद् वा कानिचिदक्षराणि न पठ्यन्ते तदा तत्र पाठं पूरयितुं कामः प्रतिलिपि कर्ता अक्षराणि निवेशयति, किञ्चिद् वा परिशोध यति तदेयं त्रुटिर्जायते। अस्यां त्रुटो प्रतिलिपिकर्तुः तादृशकरणे इच्छा जायते नापि जायते तादृशकरणाय प्रतिलिपिकर्ता सामान्यतोऽवशो भवति। एवं विधो लिखितः पाठः कदाचिदस्पष्टः

कदाचिदर्थहीनः कदाचिद् भिन्नार्थको भवति। एतादृशे स्थले अन्यमातृकाधारेण पाठशोधनं सरलं भवति। अन्यमातृकाभावे तु एतादृशे स्थले पाठशोधनमतीव दुष्करं भवति।

सम्पादकस्येकं महनीयं कर्म पदं भवति यत् ग्रन्थ सम्पादनात्पूर्वमस्य ग्रन्थस्य मातृकाः कुत्र कुत्र वर्तन्ते इति सर्वप्रथममनुसन्धेयम्। ततः यथाशक्ति मातृकाः संग्राहयाः। ततः शुद्धतमं मातृकामाधृत्य एवमेव प्रमुखतामासाद्य अन्यमातृका साहाय्येन पाठशोधनं कार्यम्।

मयातु अन्यमातृकाभावे एततसौविध्यमपि नावाप्तम्। मम सम्पाद्यग्रन्थे प्रथमकोटिकाया अनैच्छिकयाः त्रुट्या बाहुल्यं वर्तते। निदर्शनार्य द्विधाः त्रुटयोऽत्रोप स्थाप्यन्ते।

कुत्रचित् लक्षणमन्यत् उदाहरणमन्यत् यथा -

"अथ ललितं ज्भौ ज्भौ म्नौ ग्रुदादित्याः।"

लक्षणानुसारं एकोनविंशत्यक्षराणि भवन्ति किन्तु उदाहरणे तु त्रयोविंशत्यक्षराणि सन्ति यथा- "अयि सजि किं विभर्त्सयसि मास्रहं न विगुणा न चापि पुरुषा।

कुटिलतमः समे विधिवशादुपागत इदं स्वयं वितनुते।

इत्यत्र लक्षणामाधारेण उदाहरणं न संगच्छते।।

एवमेव अत्रापि -

लक्षणम् - भुजङ्गविजृमितं मौ त्नौ नौ सौ ल्गो वसुरुद्रर्षयः।

उदाहरणम् - "आकर्ण्यो नूनं काञ्चिद् परभृदगकथितां मनोजमहीपतेः।" 7-29 पृ. 94 अस्मित्रश्लोके 'आकर्ण्यो' इत्यत्र व्याकरणस्याशुद्धिर्लक्ष्यते। "परभृद्गण" अत्र लक्षणेन सह सङ्गतिर्नास्त्यक्षराण्यपि न्यूनानि सन्ति।

वर्णविपर्ययः - "सह वत शिशिशूकर" पृ. 65, अ. 5, सूत्र 40। अत्र "शिशिरकरः" शुद्धः पाठः।

वर्णच्युतिर्यथा - "रचित् कलक्षाम देहा बभूव" अ. 7 सू. 23 पृ. 92 अत्र "रचितरतिकलक्षामदेहो बभूव" इति कृते श्लोकः पूर्णो भवति।

एवमेव "रजनीशेष रति श्रम निद्रा. "अ. 7 सू. 167 पु. 128 अत्र "रजनीशेखर विभ्रम" इति शुद्धः। ति इति वर्णो निरर्थकः।

अर्थासङ्गतिः - अपवाहकछन्दसोदाहरणे-पायान्मां विकटसमर भवकुत भव ह. अ 7 सु. 30 पृ. 94 ''भव कुत भवह'' इत्यत्र अर्थस्य प्रतीतिर्न भवति। द्रुतमध्या छन्दोसोदाहरणमस्ति किन्तु लक्षणं नास्ति मया अन्यस्मात् छन्दोग्रन्थात् लक्षणमुद्धृतम्। एवमेव वहव्योऽशुद्धयो वर्तन्ते। प्रायशः प्रतिपृष्ठे एतादृश्यस्त्रुटयः पञ्च षट् वा सन्ति।

ग्रन्थपरिचयः

(क) छन्दोवृत्तिः - अयं छन्दोवृत्तिनामा अस्माकं प्रस्तुतः शोधविषयः पिङ्गलच्छन्दसूत्रेषु श्रीमहादेवभट्टाचार्यप्रणीत पिङ्गलनागस्य छन्दःसूत्राणां वृत्तिरूपः। अयं छन्दोवृत्तिग्रन्थः अद्यावध्यप्रकाशितउत्तरप्रदेशस्य मिर्जापुरमण्डले खटखरियाग्रामवासिनः पण्डितश्रीप्रेमनाथ त्रिपाठिनः पुस्तकागारे सम्प्राप्तः। ग्रन्थोऽयं प्रतिलिपिरूपेण लब्धः। अस्यां वृत्तौ पिङ्गलसूत्रमङ्गीकृत्य छन्दसां वृत्तयः समुपपादिताः।

उक्तञ्चारम्भे छन्दोवृत्तेर्विपश्चिता -

श्री पिङ्गलमुनिमनिशं नत्वा

प्रामाणिकवचनानि च विदित्वा।

तनुतेववृत्ति स महादेवः

कविदयितां कृत शिवपदसेवः।।

अष्टाध्यायप्रणीतपिङ्गलसूत्रानुसरणशीलायां कविदयितायां छन्दोवृत्तौ बहूनां छन्दोग्रन्थप्रवर्तकानामाचार्याणां सुनामधेयानि गृहीतानि सन्ति वाक्यान्यपि च संगृहीतानि सन्ति यथा "मस्त्रिगुरुस्त्रिलहुश्च नकार" इति छन्दोमज्जरीकार वचनम्।

एवमेव आचार्यभरतस्य वृत्तरत्नाकरकारस्य च नाम पदे-पदे गृहीतम्। छन्दोवृत्तौतु प्रायो बहूनां छन्दः शास्त्रस्य भाष्यव्याख्याटीका दिनाञ्च प्रभावः संत्यक्ष्यते। भट्टाचार्यः स्थले स्थले पूर्ववर्तिनामाचार्याणां सैतवकाश्यपताण्डिभाण्डव्यभोजकालिकदासभरतकेदार-गङ्गादासहेमचन्द्रादीना नामोल्लेखपुरःसरं तेषां कृतीनामुपयोगः कृतः।

छन्दोवृत्तिर्महादेवभट्टाचार्येण पिङ्गलसूत्रलक्षणग्रन्थस्य विवृत्ति रूपेण प्रणीताऽस्ति। पिङ्गलछन्दःसूत्रेऽष्टावध्यायाः, छन्दोवृत्तावपि अष्टाभिरध्याये प्रतिप्रतीकमुपादाय शोभनावृत्तिः प्रदर्शिता।

प्रथमाध्याये गुरुलघुविवरणम् गणानां परिभाषा स्वरूपादीनां व्याख्यानमस्ति।

द्वितीयाध्याये गायत्र्या अधिकारं प्रदर्श्य देवी, आसुरी, प्राजापत्या, याजुषी, साम्नी, आर्चीति गायत्र्या भेदं सलक्षणं परिपूर्णं विवेचित मित्थमेवोष्णिगादीनां विवेचनकृतम्।

तृतीयाध्याये - पादस्याधिकारं निरुप्य पादपूरणाय नियमविशेषो गायत्र्यादि छन्दसां प्रदर्शितः।

चतुर्थेऽध्याये - "चतुः शतमुत्कृतिः" इत्यादिना "उत्कृत्यादीनां लक्षणविवेचनम् कृतम विस्तरेणायमध्यायः पूरितः। लौकिकछन्दसामपि विवरणमत्रकृतम्। पञ्चमे - विषमार्द्धसमवृत्तानां विवेचनमस्ति।

षष्ठे- पूर्वपतिविचारः पश्चात् षठक्षरपादमारभ्य द्वादशाक्षरपादच्छन्दसां विवेचनम् कृतम्। सप्तमेऽध्याये त्रयोदशक्षरमारभ्य दण्डकप्रभृतिच्छन्दसां विवृतिः। ततः विशालकायेऽस्मिन्नध्याये अन्यछन्दोग्रन्थेष्वमुपलब्धान्यपि छन्दांसि सन्ति। तन्त्रान्तर प्रसिद्धानि छन्दांसि प्रायः सार्धशत संख्याकानि कवीनां कृते वर्णितानि सन्ति।

अष्टमे- गाथादि विवेचनपूर्वकं प्रस्तारादीनां सविस्तरं विवरणमुपादितम्।

छन्दोवृत्तेः समाप्तौ विवुधसम्राट "वागीश्वरः" छन्दोवृत्तेः प्रणेतुः जनकः भास्वती "भागीरथी" जननी गौडगुरुमण्डल वंशजातः शंकरसेवको ग्रन्थकार इति सङ्केतितमस्ति।

सूत्रसंहितः एतद् वृत्तिग्रन्थः एकोनपञ्चाशत पृष्ठेषु पूर्यते। आधारः प्राचीनं वंशवृक्षसारनिर्मितं कर्गदपत्रम्। पृष्ठस्य आकारः द्वादश से.मी. परिमित दीर्घः। त्रिंशत् से.मी. परिमितः विस्तृतः। प्रतिपत्रं नवपङ्क्तयः, प्रतिपङ्क्तिप्रायशो द्वात्रिंशोऽक्षराणि वर्तन्ते। अस्मिन् ग्रन्थे अनुच्छेदव्यवस्था सर्वथा नास्ति। विरामादि चिह्नव्यवस्था समीचीना नास्ति। प्रतिपत्रं एकस्मिन्नेव पृष्ठे वागपार्श्वेपृष्ठसंख्या लिखिता वर्तते। पुष्पिकया ज्ञायते यदयं सप्तदशतम संवत्सरे हरिप्रस्थनगरे (दिल्ली नगरे) प्रतिलिपिः कृता -

नाखेब्दे (17/12) तपस्यस्य कृष्णयुग्दशमी शनौ।

प्राणनाथो हरिप्रस्थे छन्दोवृत्तिमलीलिखत्।।

अस्यां वृत्तौ प्रत्येकसूत्राणां संक्षेपेणार्थः उदाहरणानि प्रत्युदाहरणानि सामान्यतो विशेषतश्च निर्दिष्टानि। उदाहरणानि प्रत्युदाहरणानि संस्कृत भाषायं प्राकृतापभ्रंशादि भाषायां च रचितानि। अहून्युदाहरणानि भट्टाचार्येण स्वयमेव निर्मितानि। चतुर्थाध्याये स्वयमेवोक्तं "अतः परंममेव काव्यानि उदाहरणानि।"

अद्यावधि पिङ्गलनागछन्दःशास्त्रस्य भाष्यवृत्तिटीकाग्रन्थश्च प्रायेण द्वादशसंख्याको[1] उपलभ्यन्ते। एतासु वृत्तिषु सर्वाः वृत्तयः प्रायः सुलभाः न सन्ति। काश्चित् सम्प्रति नोपलभ्यन्ते। अद्यत्वे हलायुधकृतवृत्तिरेव सर्वातिशायिनी वर्तते। हलायुधवृत्तिस्तु अतिप्राचीना एकादशशताब्द्यां निर्मिता। अत्युपयोगिनीवृत्तिरियं वैदुष्यपूर्णा विद्वत्संमानिता च। अस्यप्रणेता श्री हलायुधभट्टः, वृत्तेर्नाम च मृतसंजीवनी अयं हलायुधे भट्टनारायणस्यपूर्वपुरुषः। द्वितीया मुनिमेधव्रताचार्यनिर्मिता व्रतिमङ्गला नामिकावृत्तिः। मुनिमेधाव्रताचार्येण भज्जरगुरुकुलवासिना विंशतिशताब्द्यामेव इयंवृत्तिर्निर्मिता।

अस्यां वृत्तौ हलायुधवृत्तेः प्रभावाऽधिको वर्तते। मुनिमेधाव्रताचार्यस्य वृत्तो अयमेवोत्कृष्टतमः प्रयासो यदुदाहरणान्युत्कटशृङ्गाररसस्य। भवेयुः तदर्थं तेन स्व निर्मिता भक्तिप्रधानलोका उदाहरणरूपेण लिखिताः। वृत्तेरर्थविचारे विशेषवैशिष्ट्यं नास्ति। महादेव भट्टाचार्यकृतछन्दोवृत्तौ तु प्रायो बहूनां छन्दशास्त्रस्य भाष्यवयाख्याटीकादीनां प्रभावः संलक्ष्यते। अस्यावृत्तौ क्वचिदर्थ विस्तरतः क्वचिछदार्थसंक्षेपः कृतः, क्वचिच्च पूर्वाचार्याणां कृतमर्थ लिखित्वा ''अथवा'' ''वा'' इत्यादि पदैः संसूच्य स्त्रीयो नवीनोऽर्थः कृतः क्वचिचच्छन्दोलक्षणेऽपि भेदः संलक्ष्यते। अस्यां वृत्तो अर्थविचारणावसरे क्वचित् पूर्वमीमांसाशास्त्रस्य निर्णयसरणि जेंमिनीयन्यायानुसारिण्यनुसृता वर्तते। अस्यामर्थ-प्रकाशनसमर्थोदाहरणमुदानसमये च व्याकरणशास्त्रानुकारि नवीनो नवीनः प्रयोगो लिखितः। काव्ये च भट्टाचार्यस्य महती प्रवृत्तिरस्ति, एतन्निर्मितेषु काव्येषु काव्यसौष्ठवश्चमत्कारश्चानुभूयेते। अस्यग्रन्थस्य प्रथमपृष्ठे सर्वतोपरि श्लोकद्वयं लिखितमस्ति -

दीप्यद्दारिद्र्दावानल (वलय शिखा)[2] व्याकुलस्यातिमात्रं
संतापं मे समन्ताज्जहिहि[3] सकरूणस्वान्तदवपानतपातैः।।
चन्द्रोदत्रचन्मयूखावलिललितललाटस्थल श्री महेशः
प्रालेयाद्रि प्रभूताकलितकलिमलध्वंसनप्राप्तकीर्तेः।।

---

1 हलायुधकृत मृतसंजीवनी टीका

2 मूले खण्डितः

3 नष्टाक्षरम्

आयातो दयितातिं दूरत इति प्रेमाक्षरव्यञ्जकं
श्रुत्वा मित्रमुखाम्बुजान्मधु (रस?)[1] द्राक्षासदृशं वचः।
उत्कण्ठातितरामियं समभवन्मन्मानसे साम्प्रतम्
द्रष्टव्यं वदनारविन्दममलं कस्मिन् क्षणे (तन्)[2] मया।।

मो श्लोको ग्रन्थकर्त्रा श्रीमहादेयेन लिखितो लिपिकारेण प्राणनार्थेन वा इति निश्चितं न भवति। कर्गदस्यजीर्णत्वात् श्लोकयोरक्षराणि कुत्रचित् खण्डितानि भ्रष्टानि च जातानि।

ग्रन्थवैशिष्ट्यम् - सत्स्वप्यनेकेषु व्याख्यानेषु महादेवभट्टाचार्याणां पिङ्गलच्छन्दःसूत्रेषु वृत्तिग्रन्थनिर्माणस्य विषये कोऽभिप्रायआसीदिति विचारणीयं प्रस्तुतं भवति। कृष्णमाचारिमहोदयानां मतानुसारं षण्णां भाष्यव्याख्यायानां तदानीमतीव प्रसिद्धिरासीत तथापि भट्टाचार्यस्यच्छन्दोवृत्तिग्रन्थनिर्माणे इदमेव मुख्यमुद्देश्यं प्रतीयते यत् पिङ्गलच्छन्दः शास्त्रस्य हलायुधनिर्मितमतसंजीवनीटीका यादवप्रकाशभाष्यं च परिहाय नैकापि टीका -

व्याख्या वा सुलभासीत्। अन्यासां केवलं नाम परिचय एव आसीत्। येन छन्दःशास्त्रे नवप्रविविक्षणां लाधवेनोपकारिणी भवेत्। हलायुधव्याख्या यद्यपि पाण्डित्यपूर्ण विशदा सर्वाङ्गीण च किन्त्वियम् कठिना अस्ति। एवमेव यादवप्रकाशस्य पिङ्गलनागच्छन्दोविचितिभाष्यमधिकवि स्तुतदुरगाहं चासीत्। अतः पण्डितप्रवरः महादेवभट्टाचार्यः मध्यममार्गमनुसृत्य नाति विस्तृतां नाति संक्षिप्तां नाति दुजगाहांवृत्ति रचयितुं प्रावर्तत। राजशेखरः वृत्तिलक्षणमपि एवमेवावोचत्। अस्यांवृत्तौ पूर्वतन भाष्यव्याख्यादीनां प्रभावः सुस्पष्टं लक्ष्यते। यत्र कुत्रापिपूर्वतन व्याख्यादीनां खण्डनमपि प्राच्यते। यथा- पादान्तगुरोऽपि वा लघुत्वं यथा- प्रारम्भे एव "अल्पव्ययेन सुन्दरि ग्राम्यजनोमिष्टमश्नाति" ग्रंड्गादासादयस्तदनार्थम्। अतएव -

पादादाविह वर्णस्य संयोगः क्रम संज्ञकः।
पुरः स्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः।।[3]

---

1 नियोजितः पाठः

2 नियोजितः

3 छन्दोवृत्तिः

इत्युक्तं वा पादान्त इत्युक्त्वापिरत्नाकरे। एवं बहुषु स्थलेषु अपरेषां विदुषां मतखण्डनं स्वाभिमतसिद्धान्तप्रतिपादनमस्ति।

पण्डितराजजगन्नाथस्य यथा स्वीयवैदुष्यविषये स्वाभिमानं आसीत् स यथा कथयति रस गंगाधरे -

कस्तुरिका जननशक्तिभृतामृगेण,

नास्वाद्यते सुमनसां मनसापिगन्धः।

तथा रसगंङ्गाधरे स्वनिर्मितानि पद्यानि उदाहरणत्वेन प्रास्तौत एवमेव भट्टाचार्योऽपि स्वपाण्डित्यकवित्वविषये स्वाभिमानी छन्दोवृत्तिग्रन्थेचतुर्थाध्याये आर्यालक्षणानन्तरं प्रतिज्ञापूर्वकं स्वनिर्मितानि उदाहरणानि प्रस्तौत -

ऋत आरभ्य ममैव काव्यन्युदाहरणानि।[1]

अस्य वृत्तिग्रन्थस्येदं वैशिष्ट्यमस्ति यत् केषुचित् विशेष स्थलेषु अन्यछन्दोग्रन्थानामपेक्षा विस्तृताव्याख्या कृतास्ति। यथा पादान्तगुरोर्विषये यतिविचारप्रसङ्गे आर्य्यालक्षणप्रसङ्गे, ''आदितः संदिग्धे'' इत्यस्य सूत्रस्य व्याख्या सुस्पष्टा विशदा च वर्तते। अपरवैशिष्ट्यै महत्त्वपूर्णमिदं वर्तते यत् कानिचिदेवं विधानि सूत्राणि उपलभ्यन्ते मान्युपलभ्यमानपिङ्गलछन्दः सूत्रेषु न प्राप्यन्ते। यथा सप्तमाध्याये[2] ''वयमिदानीं कवीनांकृते तन्त्रान्तर प्रसिद्धाः काश्चन विशेष संज्ञाः प्रचक्ष्महे'' ''तत्रार्धसमे'' इत आरभ्य ''इत्युकृतिः'' पर्यन्तं पुनः एकाक्षरमारभ्य समेषु षड्विंशत्यक्षराणि पर्यन्तं छन्दसां लक्षणोदाहरणानि च वर्णितानि। प्रायः एकशतोर्ध्वमेव वर्तन्ते।

वृत्तिग्रन्थेऽस्मिन् कानिचिदेवविधानिसूत्राणि वर्तन्ते येषु पिङ्गलसूत्रापेक्षया वर्णानां न्यूनाधिक्यं विपर्ययश्चप्राप्यते। सप्तमाध्यायेतु अधिकानि सूत्रोदाहरणानि च वर्तन्ते एवं अन्यत्रापि क्वचिद् - अधिकं सूत्रं क्वचिद् न्यूनं वर्तते तृतीयाध्याये ''मध्येज्योतिमध्यमेन'' (सू. 53) इदं सूत्रं नास्ति। सप्तविंशतिवैतालीयप्रभेदानां वर्णनं हलायुधटीकायां अन्यत्रापि चोपलभ्यते अयमधिकः पाठः अस्यां वृत्तौ। एवमेव चतुर्थाध्याये ''द्वितीयः चतुर्थयोः नन्देरी (अ 4-47) तत्रैव ''ज्योतिः सोम्ये (4-53) इमे सूत्रे अधिके।

---

1 छ. वृ.

2 छ. वृ.

एवं बहुषु स्थलेषु न्यूनाधिक्यं वर्तते तत्सर्वं मया परिशिष्टे विशेषेण निर्देशः करिष्यते।

(ख) ग्रन्थकारस्यपरिचयः - सम्पादनीयस्य छन्दोवृत्तेर्ग्रन्थस्य रचयिता श्रीमहादेव भट्टाचार्योऽस्ति। महादेवभट्टाचार्यनामानाऽनेके विद्वांसः संस्कृतशास्त्रेतिहासेष्वुपलभ्यन्ते किन्तु छन्दोवृत्तेः कर्त्तृरूपेण कस्यापि नाम संस्कृतसाहित्येतिहासग्रन्थेषु प्राप्यते। एवमेव अस्य देशकालविषयेऽपि स्पष्टतया न किमपि लिखितुं पार्यते। ग्रन्थस्य वारं वारमालोडनेनापीयं देशकाल-विषयिणी जिज्ञासा न शाम्यति। केटलागभिधायकेषु सूचोपुस्तकेष्वपि नास्ति छन्दोवृत्तिकारस्य महोदेवस्य नाम।

ग्रन्थारम्भे मङ्गलाचरणो एवं लिखितम् -

''विद्यानन्द सहोदरवरं तं भूरि वन्दामहे।''

इत्यनेन ज्ञायते यत् विद्यानन्दः अस्य ज्येष्ठ भ्राता तथा गुरुरपि आसीत्। ग्रन्थस्यान्ते पुष्पिकायां स्व मातापित्रोर्वंशादिकस्य च विषये किञ्चिद् विवरणं दत्तमस्ति -

वागीश्वरं शुभमतिः कृति चक्रवर्ती
भगीरथी स्वयमजीजनदीसदासम्।
एतांस गोडगुरूमण्डनवंश जातः
संक्षेपतः प्रतिजगौ कृपयन्तु सन्तः।।

श्लोकेनानेन प्रतीयते यदस्य जनकस्य नान श्री वागीश्वरो जनन्याश्च नाम भागीरथी आसीत् तथाऽयं गोडदेशाभिजनोऽथवा गौडब्राह्मण आसीत्। गौडदेशोऽद्वयत्वे वङ्ग प्रदेशः कथ्यते। काव्यमीमांसायाः परिशिष्टे स्कन्दपुराणादुद्धृतोऽयं श्लोकखण्डः ''वङ्गदेशं समारम्य भुवनेशाान्तगशिवे''। गौडदेशः समाख्यातः।'' अस्योपाधिभट्टाचायोऽस्ति तेनेवं वक्तुं प्रभवामो यदयं वङ्गीयो ब्राह्मणो भवितुमर्हति। वङ्गीयेष्वेव ब्राह्मणेषु भट्टाचार्य इत्युपाधि प्रायो लभ्यते अतएव प्रस्तुतस्य ग्रन्थकारस्य वङ्गीयत्वं कल्पयितुं शक्यते।

काशीस्थ चौखम्भा प्रकाशनात् डा. अमरनाथ पाण्डेयेन सम्पादितमेकं लघु पुस्तकं श्रीमहादेवभट्टाचार्यविरचितं ''उपसर्गवर्गः'' प्रकाशितमस्मिन् पुस्तकेऽपि लेखकस्य नामातिरिक्तं तस्य जन्मस्थानादि विषये नास्ति कश्चिदुल्लेखः। अस्मिन् छन्दोवृत्तिग्रन्थे प्रमाणरूपेणोदाहरणरूपेण चागतानां ग्रन्थानामाधारेण श्रीभट्टाचार्यस्य

जन्यस्थनादिविषये किञ्चिदनुमातुमेव शक्यते। यथास्मिन् ग्रन्थे भरतः भोजः कालिदासः केदारभट्टः गड्गादासादयश्चोद्धृताः सन्ति। एतेषु छन्दोमज्जरीकारागङ्गादासोऽन्येषामपेक्ष्या अर्वाचीनः किन्तु गङ्गादासस्यापि कालिविषये विदुषामनुमानमेवास्ति क्वचिदपि स्पष्टतया उल्लेखो न प्राप्यते। आचार्य श्रीबलदेवोपाध्यायस्य संस्कृतसाहित्येतिहासे[1] गङ्गादासस्य सनये पञ्चदशः षोडषे वा शताब्दः निश्चितः। श्री कृष्णमाचारिमहोदयेन च स्वकीये "हिस्ट्री ऑफ क्लासिकल संस्कृत लिट्रेचर[2] नामके ग्रन्थे सेव समयो निर्धारितः। सम्पादग्रन्थस्य प्रतिलिपिकारस्य 1712 विक्रमे स्थितिरासीत् यथा ग्रन्थस्यान्ते -

पुष्पिकायाम् - इनाग्रेब्दे (1712) तपस्यस्य कृष्णयुग्दशमीशनी।

प्राणनाथो हरिप्रस्थे छन्दोवृत्तिमलीखित्।।

अत्राक्षरेषु वा संख्या लिखिता सा संदिग्धा अस्पष्टार्या च तत्रवाङ्केष्वपि संख्या लिखिता संख्येयं विक्रमसंवतानुसारिणी।

यदा प्रतिलिपेः समयऽष्टादशताब्द्याः (वै. सं.) पूर्वार्धस्तदा ग्रन्थप्रणेतुः कालस्तु इतः पूर्वस्यादेव। ग्रन्थे गङ्गादासस्य नामानतमतो गंङ्गादासस्तु ततोऽपि पूर्व भवितुमर्हति। राजस्थानप्राच्यप्रतिष्ठानप्रकाशितस्य वृत्तमौक्तिकस्य भूमिकायां[3] संपादकेन- पं. विनयसागरमहोदयेन गंङ्गादासस्य समयः पञ्चदश शताब्दः षोडशताब्दो वा स्वीकृतः। पी. के. गोडे महोदयेनापि स्वकीये "स्टडीज इन इण्डिया लिट्ररी हिस्ट्री[4] नाम्नि ग्रन्थे प्रच्चदशशताब्दीरेव निर्धारितः। रूपगोस्वामिना (यस्य समयः ज. 1490 मृ. 1563) स्वकीये उज्जवलनीमणिनामके ग्रन्थे छन्दोमञ्जरी उद्धृता। एभिरिदं निश्चितं यत् 1490 तः पूर्व गङ्गादासस्य स्थितिः स्यादेव।

उपर्युक्तविदुषं मताधारेणु गंगादासस्य समयः पञ्चदशताब्देः पूर्वार्धे उत्तरार्धे वा निश्चितः गंङ्गादासोऽपि गौडदेशीयः (उत्कलप्रदेशीयः) अनेन छन्दोमज्जर्या स्व परिचयो मातापित्रोऽभिधानञ्च दत्तमस्ति। छन्दशास्त्रीयग्रन्थानां तद् वृत्तीनाञ्च

---

1 सं. साहित्य का इतिहास परि 31 पृ. 307 प्रथम संस्करण सं. 1969

2 हिस्ट्री ऑफ क्लासिकल संस्कृत लिट्रेचर परि. 1096। पृ. 909 तृ. संस्करण 1974

3 वृ. मौ. भू. पृ. 18

4 भाग 1 पृ. 470

परिशीलनेन प्रतीयते यत् प्रायशः षोडशशताब्दितः सप्तदशशताब्दं यावत् वृत्तरत्नाकरस्य लोकप्रियता अत्यासीत् तस्मिन् काले वृत्तरत्नाकरस्य वहव्यो वृत्तयष्टीकाश्च विद्वद्भिर्लिखिताः। अस्य शताब्दस्य प्रमुखाः वृत्तिकाराः रामचन्द्र विवुधः समयसुन्दरमणिः नारायणभट्जः जनार्दनश्चासन्।

समयस्य एका अपि धारा परम्परा वा सर्वदा प्रचलत्येव मन्ये तदानीं वृत्तिलेखनपरम्परा आसीत् तस्मिन्नेव प्रवाहे श्री महादेव भट्टाचार्येणापि पिङ्गलसूत्राणां कविदयितानाम्नीर्वृत्तिर्लिखिता स्यात्।

एवं सर्वमाहत्य श्री महादेव भट्टाचार्यस्य विषये इदं निर्णेतुं शक्यते यत् षोडशशताब्दस्य पूर्वार्धे उत्तरार्धे वा भट्टाचार्यस्य स्थितिरासीत्। 1655 खीस्ताब्दे (1712 वैक्रमे) छन्दोवृत्तेः प्रतिलिपिः श्री प्राणनाथेन कृता।

श्री महादेवभट्टाचार्यस्य पाण्डित्य प्रसरः व्याकरणन्यायवैशेषिक-संख्ययोगपूर्वोत्तरमीमांसासाहित्यगणितशास्त्रेषु आसीत्। छन्दोवृत्तौ स्थले-स्थले एतेषां शास्त्राणां विषयचर्चा प्राप्यते।

यथा मीमांसा शास्त्रस्योदाहरणम् -

प्रथमाध्याये छन्दोवृत्तौ प्रारम्भे एव लघुगुरूच्चारणादि प्रसङ्गे "पादान्ते गृ ग संज्ञा स्यात् तेन द्विमात्राकालमुच्चारणं कोण्डपाय्ययनेनैयमिकाग्निहोत्रस्येवताच्छब्देन तदधर्मातिदेशात् लसंश्च बहुलं व्युत्क्रमनिर्दशात्।"

एवमेव यत्र न कापि संख्या निर्दिष्टा भवति तत्रैकत्व संख्या गृहयते इति बोधयितुं जैमिनीयमीमांसाशास्त्रस्य एकोन्यायः प्रस्तुतः। यथा -

"तत्र निराकारवृत्तेरसंभावात् परिशेषात्संख्यापेक्षायां कपिज्जलाधिकरणन्यायादेक संख्यैवद्विगुणीकृत्य द्विसंख्यामन्त्यलघोरुपरि न्यस्य एवमादि यावदावत्तयेत्।" जैमिनीय पूर्वमीमांसायाः कपिञ्जलाधिकरणानुसारं यत्र कुत्रापि कापि संख्या न निर्दिष्टा स्यात्तदा तत्र पारिशेष्याद् एकत्व संख्या ग्राह्या।

अष्टमाध्याये प्रस्तारक्रमे नष्टोद्दिष्टसंख्यानाध्वयोग एकत्र्यादि लगक्रियाविचारणावसरे गणितशास्त्रस्यागाधपाण्डित्यमवलोक्यते।

भट्टाचार्यस्य काव्यप्रतिभाऽपि अत्युत्तमाऽसीत्। छन्दोवृत्तौ स्थले स्थले छन्दसामुदाहरण प्रदर्शनावसरे स्वनिर्मितानि सरसानि पद्यान्युपात्तानि यथा मालिन्युदाहरणम् -

सदसिमुनिसुराणां शैलपुत्र्याः सदक्षेऽ

वधिपरिणयमीषत् शक्तयोः कान्तपादौ।
कुरूनयनपदव्यां शंभुमित्याप्तवाग्भिः।
समजनिगुरुलज्जा यन्त्रणनन्तशाखा।।[1]
तत्रैव शार्दूलविक्रीडितस्योदाहरणम् -
गोकर्णः सहतर्णकैरधिगृहद्वारं सुखं शेरते
कुर्वन्ति प्रियपादपान् कलभ्काः कण्डूयनै र्तिस्त्वचः।
कन्दानां विरुजन्ति शूकरसुताः पश्यत्यपि त्वत्प्रिये
तस्मिन्नेवपुलिंदयूनि सुभगे त्वं चालि वाचं यम।[2]
प्राकृतापभ्रंशकाव्यरचनायामपि निपुणोऽयं कविः।
आख्यानिकी छन्दसोदाहरणम् -
गुज्जे इवामे भमरो भमन्तो णिमीलि अंभो वह मज्झा।
संकोरिऊकि णंलिनिअ चंदह अंध आरस्स रूपता डिंभो।।
आर्य्याछन्दसोदाहरण प्रसङ्गे -
जह जह उछवणाई दलाई मुञ्चन्ति परिणअल्लाइम्।
उछवण वालिवा अचि मुञ्चइत इत हमि अङ्गाहम्।। (अ. 6)
तत्रैव -
जह तह विरावणुमणु अनुहाहि
दिब्बु सहोर अमि अ अ।
जं उण अणे विसस्ससविरो
अद्य तं हतं अइ विरलम्।।

महादेव भट्टाचार्येण स्थले स्थले "इत्यार्हताः" इति लिखितमनेन ज्ञायते यदयं आर्हतमतेनापि सम्यक् परिचित आसीत् तेषामतानां खण्डनमपि कृतम्। भट्टाचार्येण यथास्थलं भरतमुनिकेदारभट्टहेमचन्द्रकालिदासगंङ्गादासादीनामाधुनिकविदुषां

---

1 छ. वृ. अ. 7

2 तत्रैव

सैततकाश्यपताण्डीप्रभृतिप्राची नाचार्याणामपि चर्चा कृता वर्तते एतेषां नामपुरस्सरं मुद्धरणमपि दत्तम् तेनानुभूयते यदयं ग्रन्थकारः तैषां सैद्धान्तिकपक्षेन सह स्व सिद्धान्तीय सामञ्जस्यं सम्यक् परिपालयति। तदनु स्वीयमपि मौलिकमभिमतपक्षं छन्दसामुदारणानाञ्च यथाविधि संस्थापने यत्नवान् दृश्यते। अस्मिन् वृत्तिग्रन्थोपरि हेमचन्द्र कृतछन्दोऽनुशासनस्य वृत्तरत्नाकरस्य स्वायम्भूछन्दसश्च प्रभावः सर्वाधिकः संलक्ष्यते। लघुगुरूव्यवस्थायां दण्डस्यप्रसङ्गे प्रचितस्य प्रकरणे च "कलिकालसर्वज्ञकृतछन्दोनुशासनस्य सर्वथा अनुकरणं कृतं प्रतीयते। छन्दोनुशासने उदाहृतानि पद्यान्यपि यथास्थलं उद्धतानि सन्ति छन्दोवृत्तौ।

अस्य ग्रन्थकारस्य विमर्शशैली वैदुष्यमावहति पिङ्गलमुनिकृतच्छन्दः सूत्राणं अन्यासु वृत्तिषु भाष्यप्रभृतिव्याख्यासु च लक्षणोदाहरणविषयकानि यानि तत्वानि नार्जितानि न समवधरितानि वा तान्यपि यथास्थलं यथाशब्दमुद्भावितानि सुस्पष्टीकृतानि च महादेव भट्टाचार्येण।

प्रारम्भतः ग्रन्थसमाप्तिपर्यन्तमन्तस्तलपर्यवेक्षणेन पूर्वव्याख्यातृणामपेक्ष्या लक्षणोदाहरणेषु कतिपयाः मौलिकाः परिकल्पिताः शास्त्रानुगामिनो विषया विमर्शपाटवं भजमाना दृष्टिपथमायान्ते येन प्रेक्षावतां प्रजृत्तिरवश्यं वृत्तिग्रन्थेऽस्मिन् भूयसी स्यादित्याशासे।

(ग) लिपिकारस्य परिचयः - छन्दोवृत्तेः पाण्डुलिपिः उत्तरप्रदेशीयमिर्जापुरमण्डलान्तर्गत खटखरियाग्राम वास्तव्यानामुदाश्चेततां पं. श्री प्रेमनाथ त्रिपाठीवर्याणं गेहादुपलब्धा। अस्या लिपिकारा मणिकण्ठसुताः शाहजहांराज्ये वर्तमाना श्री प्राणनाथ त्रिपाठिनः श्री प्रेमनाथ त्रिपाठिनः पूर्वजा आसन्। श्रीमण्किण्ठत्रिपाठिनो रघुवंशस्य "इन्दिरा" टीकाकाराणां गोपालत्रिपाठिनां पुत्रा आसन्। यतो हि रघुवंशस्य चतुर्थसर्गस्य टीकाया अन्ते पद्यमिदं लिखितम् -

गोपालः सरुआरदेशधतुराग्रानात् सुनौराधिपः

संख्यावत्सु निसर्गभक्तिरसिक श्चक्रेरधोरिन्द्रिराम्।

शृङ्गारादि विजृम्भिताञ्च सुमुखीं शब्दार्णवादुत्थिताम्

सेव्यां सर्वयुधेश्वराचरगुरोः पत्नीमिव प्रेयसीम्।

इति सरुआरदेशोद्भवत्रिपाठिरवेदुपूत्रगोपालेन कृतायां रघुवंशकाव्यस्येन्दिराटीकायां चतुर्थः समाप्तः।

एका अन्यापि जहाँगीरविरुदावलीनायिका पाण्डुलिपि स्तत्रैव (श्री प्रेमनाथत्रिपाठिमहोदयानां गेहाद्) प्राप्ता यास्याः सम्पादनं डा. जगन्नाथपाठमहोदयैः कृतम् तस्यापि प्रतिलिपिः प्राणनाथैरेव कृता इति प्रतीयते यतो हि पुष्पिकायां तत्र -

युगशशाङ्कमनीन्दुसमे शके - (1712 संवत्)

तुरगसप्तकलम्बक चन्द्रके (1577) शकाब्द

धवलपक्षकसुंयुतभाद्रके -

विधुजवारयुतो नवमीतियो।।1।।

त्रिदशलोकसदर्च्य गिरीन्द्रयो -

शचरणयुग्मसरोरूहषट् पदः

समलिखन्मणिकण्ठसुतः स्वयं -

हरिपुरे विरुदावलिकां शुभाम्।।2।।

अनया पुष्पिकया ज्ञायते यत् द्वावपि ग्रन्थो एकेनैव लेखकेन लिखितोलिप्यामपि साम्यं प्रतिभाति किन्तु छन्दोवृत्याः पुष्पिकायाम् - ''छन्दोवृत्तिमलीलिखत्'' अनेन ज्ञायते यत् पं. प्राणनाथेन लेखापितं न तु लिखितमिति किन्तु विरुदावल्यां ''अलिखत्'' इति लिखति उभयोर्लिप्योः साम्यमाधृत्यनिर्णेतुं शक्यते यत् श्री प्राणनाथत्रिपाठीरेव अस्यापि वृत्तिग्रन्थस्य लिपिकृदस्ति। उभयोरपि ग्रन्थयोः समयोऽपि अभिन्न एव यतो हि विरुदावल्याः प्रतिलिपि समयेः 1712 वेक्रमे अभवदीदतु मया पूर्वं लिखितम्।

छन्दोवृत्तेः प्रतिलिप्यपि तदानीमेवाभवत् यतः पुष्पिकायाम् ''ईनाभ्रेब्दे (1712) तपस्यस्य कृष्णयुग्दशमीशनौ''

अत इदं तु सुनिश्चितं यत् उभयोरपि ग्रन्थयोर्लिपिकारोऽभिन्न एव। अत्र श्री प्रेमनाथत्रिपाठिनां संक्षिप्तवंशानुक्रमो दीयते।

श्रीप्रेमनाथत्रिपाठिनां संक्षिप्तवंशानुक्रमः			
श्री कोविदरामत्रिपाठी			
श्री खेदूरामः			
श्री गोपालनाथः			
श्री मणिकण्ठः	श्री भूपतिः	श्री लाला	श्री जयनाथः

<table>
<tr><td colspan="3">श्री प्राणनाथः</td></tr>
<tr><td colspan="3">श्री जीवनाथः</td></tr>
<tr><td colspan="3">श्री रविनाथः</td></tr>
<tr><td colspan="3">श्री शौर्यनाथः</td></tr>
<tr><td colspan="3">श्री गोकुलनाथः</td></tr>
<tr><td colspan="2">श्री ब्रजनाथः</td><td>श्री कविधन्यः</td></tr>
<tr><td colspan="3">श्री त्रिवेणीनाथः</td></tr>
<tr><td>श्री कामतानाथः</td><td>लक्ष्मणनाथः</td><td>यज्ञनाथः</td></tr>
<tr><td colspan="2">श्री अम्बिकानाथः</td><td>श्री तारकनाथः</td></tr>
<tr><td colspan="2">श्री प्रेमनाथः</td><td>श्री ब्रह्मण्यनाथः</td></tr>
<tr><td>श्री द्विजेन्द्रनाथः</td><td>श्री विप्रेन्द्रनाथः</td><td>श्री ब्रह्मेन्द्रनाथः</td></tr>
</table>

(घ) प्रस्तुतं सम्पादनम्

इदं प्रागेवोक्तं यद् देवदुर्विपादात् भट्टाचार्यस्य छन्दीवृत्ते रकैवेयं नातृका सुरिक्षतोपलब्ध। कृतेऽपि प्रयासे द्वितीया प्रतिलिपि न दृग्गोचरीभूता। ग्रन्थस्याति-प्राचीनत्वात्दाधरस्य कर्गदस्य जीर्णत्वात् मस्याश्च विकृतत्वात् ग्रन्थसम्पादने महान् समयः धमश्चापेक्षिता भवताम्। ग्रन्थोऽप्ययं दुःखेन पठनीयोऽस्ति। अत्र प्रतिलिपि कर्तृद्वारा अनेच्छिकीनां कुटीनां बाहुल्यं वर्तते। क्वचिद् वर्णलोपः क्वचिद् वर्णाधिक्यं, क्वचिद् वर्णव्यत्यासः, क्वचिद् पदविपर्यय एवं विधा स्त्रुटयोऽनेका वर्तन्ते अपरा मातृकापि नोपलब्धा अतस्तेषां संशोधनार्थं ग्रन्थकर्तुरभीष्टवर्णादादि संयोजनार्थ महान् प्रयासः श्रमश्चानुभूतः समयश्च व्ययीकृतः।

यत्र कुत्रापि छन्दोलक्षणमन्यदुदाहरणंज्चान्यत् कुत्रचिद तु पूर्णं छन्दोलक्षणमेवाशुद्धं यथा भद्रकलक्षणम् (पृ. 126, अ. सू. 163)

क्वचिद् लक्षण शुद्धमुदाहरणमसङ्गतम् वर्तते। अतोऽत्र छन्दःशास्त्रस्य ग्रन्थान्तर साहाय्येन पाञ्चसंशोधनं मया कृतम्। क्वचिच्च छन्दोलक्षणे अन्यो गणः अर्थात् नगणो निर्दिष्टः किन्तुदाहरणे नगण स्थाने तगणः प्रयुक्तः, अतोऽत्र लक्षणानुसारं उदाहरणसंशोधनं कृतम्। अक्षरपदपङ्क्तिस्युत्या ग्रन्थपातेन च वृत्यर्थावगमो दुरूहो जातः पाणन्तरस्य साहाय्यमपि नोपलब्धं तत्र अनेके व्याख्यान्तर साहाय्येन पाठपूर्तिः कृता। बहुसु स्थलेषु स्वयत्यापि

पदपूर्तिरक्षरपूर्तिर्लक्षणसंशोधनस्य कृतम्। ग्रन्थेऽस्मिन् आगतानामुदाहरणानां दृष्टान्तानाञ्च कृते ये ग्रन्थ उदधृताः तत्र अध्यायश्लोकसंख्यासहितं स्थलनिर्देशञ्च कृतम्। यत्र श्लोकस्य पादेकं पादद्वयं वा लिखितं तत्र प्रायशः पूर्णः श्लोको लिखितो मया। अस्मिन् ग्रन्थे पूर्णविरामोऽर्धविरामो वा सम्यक् नास्ति विरामादीनां व्यवस्था सम्यक् कृता। यत्र अन्यस्मात् छन्दोग्रन्थात् न्यूनमधिकं वा छन्दो वर्तते तत्र तच्च्छन्दसो नाम दत्तम्। यत्र थकारजकारयोः वकारखकारयो ''श ष स'' इति शकारत्रयेषु न कोऽपि नेदस्तत्र भेदः प्रदर्शितः ''गणच्छन्दः'' एवं विधस्थलेषु ''च्'' कुत्रापि नास्ति सर्वत्र ''गणछन्दः'' एवं लिखितं, एतस्य व्यवस्थ्झा सम्यक् कृता।

एवं क्रमेण समग्रस्य वृत्तिग्रन्थस्य सम्पादनं यावत् सामग्रीप्राप्तिपुरं स्तरं मया विदुषां समक्षं प्रस्तूयते। इति शम।

❖❖❖

प्रथमोऽध्यायः

लीलापाङ्गविलोकनेन सहसा यस्य द्विषत्कोविदान्
मुञ्चन्तिस्थिरसङ्गिनोऽपि सुचिरं विद्यानवद्याङ्गनाः॥
कान्तारे विभ्रमेऽपि न स्खलति वाग्देवी यदालम्बनाद
विद्यानन्दगुरुं सहोदरवरं तं भूरि वन्दामहे ॥1॥
श्रीपिङ्गलमुनिमनिशं नत्वा प्रामाणिकवचनानि विदित्वा।
तनुते वृत्तिं स महादेवः कविदयितां कृतशिवपदसेवः॥2॥

"द्वे ह वे विद्ये वेदितव्ये[1] परा चैवापरा च। परा सामवेदो यजुर्वेद ऋग्वेदोऽथर्ववेदश्च, अपरा-शिक्षा कलपो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यादिना[2]" "यो ह वा अविदितार्षेयच्छन्दो देवत ब्राह्मणेन मन्त्रेण यजति याजयती[3] त्यादिना" च लोके छन्दसामुपादेय-त्वमवगम्यते। प्रयोजनं च प्रामाणिकमेव स्वर्गापवर्गादि। अतो भगवान् पिङ्गलनागो गङ्गाधर नियोगप्रसादावासाद्य वैदिकलौकिकेच्छन्दसी व्याचिख्यासुः पितामहप्रणीताः परिभाषा वस्तु व्यवहारायं प्रागाह–

धीः श्रीः स्त्रीम्। 1–1

इहैकमात्रेण लः, द्विमात्रेण ग उपलक्ष्यते तेन-

ग त्रयं 'म' सर्वां स्यात्।

वरासा य्। ।।1–2।।

आदि लं त्रिकं 'य' संज्ञं स्यात्।

---

1 मूले 'विदितव्ये' इति पाठः।

2 इदमुद्धरणं मुण्डकोपनिषदि किञ्चिद् भिन्नमिव लभ्यते। द्वेविद्ये वेदितव्ये इति हस्म यद् ब्रह्मविदोवदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदःसामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते। (मु.उ. 1.1.4,5)

3 यो ह वा अविदितार्षेवच्छन्दोदैवत विनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वास स्थाणुं वर्च्छति गर्तंवापद्यति प्रवामीयते वापापीयान् भवति। यातयामान्यस्य छन्छांसि भवन्ति। (आ. ब्रा. 1.1.6)

कागुहा र[1]। ।।1–3।।

मध्य लत्रिकं 'र' संज्ञं स्यात्।

वसुधा स्। ।।1–4।।

अन्त्य गं त्रिकं 'स' संज्ञम्।

सातेक्वत्। ।।1–5।।

अन्त्य लं त्रिकं 'त' संज्ञम्।

कदास ज्। ।।1–6।।

मध्य गं त्रिकं 'ज' सज्ञं स्याद्।

किंवद भ्। ।।1–7।।

आदि गं त्रिकं 'भ' संज्ञम्।

नहस न्। ।।1–8।।

ल त्रिकं 'न' संज्ञं स्यात्।

गृ ल्। ।।1–9।।

लघुरेको 'ल' संज्ञम्।

गन्ते। ।।1–10।।

गृलित्यनुवर्तते।

सिंहावलोकेनेनच पाद इति। पादान्तस्थ[2] मिति कालिदास वचनात्[3] पादान्ते गृह 'ग' संज्ञः स्यात्। तेन द्विमात्रा कालमुच्चारणम्। कौण्डपाय्ययने[4] नेयमिकाग्नि

---

1 मूले ''वागुहार' इति पाठः।

2 मूलपाठे ''पादान्त्यस्थ' इति पाठः।

3 संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम्।
विज्ञेयमक्षरं गुरूपादान्तस्थं विकल्पेन।। (श्रु. बो. 1-2)

4 कुण्डपायिनामयने 'मासं दर्शपूर्णमासाभ्यां यजेत्' इति वाक्येन कुण्डपायिनां त्रिंशत्पर्वसु अनुष्ठानं प्राप्तम्। किन्तु अस्य अहीनत्वाभावात् सत्रत्वाच्च सत्रात्मकद्वादशाहधर्माणामतिदेशः क्रियते। एतच्च कूण्डपायिनामयनगतमग्निहोत्रं नैयमिकादग्निहोत्रात् कर्मान्तरम् इति समधिगतम्। वि. जैमिनीयन्यायमालाविस्तरः सायणमाध्यवाचार्यप्रणीतः (2.3.11 इत्यत्र स्पष्टम्। एतेन मासाग्नि होत्रन्यायेन

होत्रस्येव तत्छब्देन[1] तद्धर्मातिदेशात्। ल संज्ञश्च, बहुलं व्युत्क्रमनिर्दशात्। उक्तं च भगवता भरतेन–"तथान्त्यं च लघु क्वचित्"[2]। न समान्यादौ न लघुतेव। प्रमाण्यादो गुरुतेव।

अन्यत्र यथा छन्दो विकल्पः। वसन्ततिलकादेरन्यत्र प्रथम तृतीय पादान्तस्य गुरुत्वं न भवति। तेन चेह दोषः–

"विकसितसहकारभारहारि

परिमल एष समागतो वसन्तः[3]।।?।।

पादान्त गुरोरपि वा लघुत्वम। यथा–

"अल्पव्ययेनसुन्दरि, ग्राम्यजनोमिष्टमश्नाति[4]"। गङगादासादयस्तदनार्षम्। अत एव-

पादादाविह वर्णस्य संयोगः क्रम संज्ञकः।

पुरस्थितेन तेन स्याल्लधुतापिक्वचिद् गुरोः[5]।।

इत्युक्तं वा पादान्त इत्युक्त्वापि रत्नाकरे।

पिअ विरहो कुसुमाउहोमहुमासो कोइलासो मद्धरा।

एक्केक्कंचिअ दुसह पंचवि ओ सहई तस्स किं जिअइ[6]।।?।।

अत्रापि पादे इत्यस्य पादान्तस्येत्यर्थः पादान्तस्थधर्मस्यातिदेशात्। पादान्तस्थौ धर्मो गुरूरूपस्तस्थातिदेशात्। अर्थाद् द्विमात्रा कालमुच्चारणमिति। (मीमांसाकोशः)

1 मूले "तच्छब्देन" इति पाठः।

2 गुरु दीर्घं प्लुतश्चैव संयोगपरभैव च।

सानुस्वारं विसर्गश्च तथान्त्यं च लघु क्वचित्।।

(भ. ना. शास्त्र 14-90) भारतीय विद्या प्रकाशन, वाराणसी।

3 अयं पद्यांशः कुतस्त्य इतिन ज्ञायते।

4 तरुणं सर्जयशाकं नवोदनं पिच्छिलानि च दधीनि।

अल्पव्ययेन सुन्दरि, ग्राम्य जनोमिष्टमक्षनाति।। (छ.म. 1-12)

5 वृ. रं. 1-10

6 प्रियविरहो कुसुमायुधः मधुमासः कोकिलासोमधुरा।

एकैकमपि च दुसहं पञ्चापि यः सहते तस्य किं जीयते।।

इति तु स्वयम्भूछन्दसि। येन, ललिता अथ लुलितपतत्रिमालमिति भ द्वौ तु वर्णयोरेकत्वात्।?

यदुक्तय्–

"वण्णो वितुरिअ पढिऔ, दुत्ति वि एक्क जाणे हू0" इति क्वचित्[1]।

तीव्रप्रयत्नादपि लघुत्वम्।

यथा–

गृहीत प्रत्युद्गमनीयवस्त्रा[2]।

प्राप्त (प्य) नाभिह्दमज्जन माशु[3]।

मम वतर्हि मयिमानकथा कथंचिदेव प्राचां तव हिया,

बहलभ्राममवेचक तामसं, ममप्रियेक्व समेष्यति तत्फलतः।।

यथा व्याघ्री हरेत् पुत्रान्, दैष्ट्राभिर्न च पीठयेत्।

भीतपतनभेदाभ्यां तद् वद्ववर्णान् प्रयोजयेत्[4]।।

यदातीव्रप्रयत्नेन संयोगादे[5]रगौरवम्।

न छन्दोभङ्गमप्याहुस्तदा दोषायसूरयः[1]।।

(राजस्थान प्राच्य विद्या प्रतिष्ठान जोधपुरतः 2016 विक्रमाब्दे प्रकाशिते प्रो. एच. डी. वेलणकर महोदयेन सम्पादितेः स्वयम्भूछन्दसि अयं श्लोको न प्राप्यते।

1 अह दीहो चि अ वण्णो, लहु जीहा पढइ होइ सो चि लहू।

वण्णो वितूरिज षिढिओ, दात्तिण्णि चि एक्क जाणेहु।। (प्रा.पै.पृ.10, श्लोक 8)

(यदि दीर्घोपि च वर्णो लघु विह्वयापठितो भवति लोपि लघुः।

वर्णोपि त्वरितपिठतो यदि यदा द्वौ चीनपि वर्णानेकं जानीत। (लक्ष्मीनाथ भट्ट, पि. प्र. टीका)

2 सा मङ्गलस्नान विशुद्धगात्री गृहीत प्रत्युद्गमनीयवस्त्रा।

निवृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशावसुधैव रेजे।। (कु. सं. 7 श्लोक 11)

3 प्राप्य नाभिह्दमज्जनमाशुप्रस्थितं निवसनग्रहणाथ।

औपनीविकमरुन्ध किल स्त्री, वल्लभभस्यकरमात्मकराभ्याम्।।(माघ,10श्लोक 60)

4 पाणिनि शिक्षायाम् (श्लोक 25)

5 मूले 'संयोगादेरेव गौरवम्' इति पाठः।

दोषाय छन्दोभङ्गस्तेनाहुः–

एदोतो प्राकृते ह्स्वो पादान्ते भवतः स्फुटम्।

विकल्पेन तथा ई ऊ ई हिं स्यर्हस्वसंज्ञका।।

इति धनसागरः।

पदान्ते विकल्पेनेति च सर्वत्रान्वेति दीर्घात्पराइत्येव। ''छन्दवसादीह परा (दा) कत्थंविलहूआ हुअंति पअअंते[2] ए ओ इ ही जिंदू वि अरह वंजण जूत्तपूर्व्वो अ[3]।।''

इति जेनकोष दर्शनात्

ध्रादिपरः।।1।11।

ध्रन्ति संयोगमुपलक्षयति। आदिपदेन विसर्ज्जनीयानुस्वारो ध्रादयः परायस्मात् स च 'ग' संज्ञो 'ल' संज्ञश्च बहुलम्। यदुक्तं भरतेन–

गुरु दीर्घ प्लुतं चैव संयोग परमेव च।

सानुस्वारं विसर्ग च तथान्त्यं च लघु क्वचित्[4]।

जिह्वामूलीयोपहमानीयपरस्य संयोगस्य पश्चाद[5] (पूर्वं?) गुरुत्वमिति। यदाहुः[6] शाब्दी व्यज्जनता स्वरसंधो स्वर यणविधा वयोगवाहानाम्।

कुपोः परगमनार्थम्। व्यज्जनतेष्ट्यानुशिष्टि। कृत इति प्लुते न चात्र न व्यवहारः।

---

1 सरस्वती कण्ठाभरणम्। (1/123)

2 छन्दवसा दीह परा कत्थवि लहुआ हुचंति पअअंते। एओइहि षिन्दू वि अरइ वंजण जुत्तपुब्बो अ (गाथा लक्षण 16-55) छन्दोवशाद्दीर्घपदाः कथञ्चिद लघुकाभवन्ति पादान्ते केसानाह ए ओ एकारोकारा विकारा बिन्दुयुक्तो हिकारश्च बिन्दुयुक्तः पूर्वो पाश्चात्य इति।

3 मूले 'ए अ इ ही ल बिंद र ह वंजण जुत्त पूर्व्वा अ' इति।

4 भरत ना. शा. अ. 14 श्लोक 99 एवं 90

5 मूले संयोगपश्चाद् पाठः।

6 अयंमंशः प्रतिलिपिकारेण एवं लिखितः - शब्दाव्यज्जनता स्वरसन्धो स्वरताण विधौ नु योगवाहानाम्। क्रुधोः परगमनार्थम्। व्यज्जनतेद्यानृशिष्टिं। इदमुद्धरणं न कुत्रापिग्रन्थे लब्धम्।

द्वे[1] ।।1–12।।

द्विमात्रश्च संध्यक्षराद्भिर्गसंज्ञोछ।।

लौ सः।1–13।।

स मः जातौ द्वौ लौ गणयितष्यो ल ग संज्ञे लघुगुसंज्ञे अपि सूचयतः। तदयं संग्रहः–

मस्त्रिगुरूः त्रिलधुश्चनकारो, भादिगुरूपुनरादिलधुर्यः।
जो गुरूमध्यगतो रलमध्यः सोऽन्त गुरूः कथितोऽन्तलघुस्तः [2]
गुरुरेको गकारस्तु लकारो लघुरेककः।
वक्रो गकारो विन्यासे लकार ऋजुरिष्यते[3] ।।
वक्र ऋजु रिति सर्वज्ञवचनात्[4]।
ज्यस्माः सूर्यजल प्रभज्जनधरा मध्यादिशेषाखिले।
दीर्घादीर्घरूजं समृद्धिमटनं देशान्तरेऽथ त्रियम्।।
तद्धग्रस्तभनाश्च वहिन गगनं श्वेताशु नाकामृतिम्।
नेष्फल्यं सुयशः सुखं निरूपमं गीतादिवद्धा गणाः [5]।।

---

1 मूले 'हे' इति पाठः।

2 छन्दोमञ्जवर्याम् 1-8

3 तत्रैव 1-9

4 ह्रस्वो लृजुः 1-14 वान्ते ग्वक्रः 1-5 आचार्य हेमचन्द्रकृत छन्दोऽनुशासनम्।

5 गणनामरूपदेवतादीनां स्पष्टतरं ज्ञापकचक्रम् -

गणनाम	रूपम्	देवता	फलम्
जगणः	।ऽ।	सूर्यः	रुजः
यगणः	।ऽऽ	जलम्	समृद्धिः
सगणः	।।ऽ	प्रभज्जनम्	देशान्तरे अटनम्
मगणः	ऽऽऽ	धरा	श्रीः
रगणः	ऽ।ऽ	वह्निः	मृतिः
तगणः	ऽऽ।	गगनम्	नैष्याल्यम्
भगणः	ऽ।।	श्वेतांशुः	सुयशः

अय ध्रीत्यादि विचिक्षोपादानफलं व्याख्या स्यामः। अध्ययनाद् धीर्भवति धिया च श्रीर्भवति, त्रिया च स्त्री धनमूलत्वाद्-गार्हस्थस्य। इतरथा नित्यनैमित्तकलोपे प्रत्यवायापत्तेः। तस्मादधीष्व। सा हि स्त्री वरा श्रेष्ठा, सुखपुण्यादि साधनत्वात्शिष्य- स्याथ प्रश्नः। तस्याः बुद्दे का गुहास्थानम्? इत्युत्तरम् वसुधा तत्रैव त्रभ्यते। प्रश्नः, - सा स्त्री कुत्राश्रमे भवति? गृहे गृहस्थात्रमे। प्रश्नः-कदा सता धियं प्राप्नोति? उत्तरम्-यदा ध्रादिपुरो धारणादिपरो भवति। प्रश्नः किं कुर्वन्मेवं भवतीति वदः उत्तरम् न हसन्, हासादि चापलं वर्ज्जयन्। मन्त्रं च गमिति गाणमतं ते तदर्थं ददामीति स्तौ। अविशेत्रे वाकार एव लकार एव उबौवोपतिष्ठेते। यथा देव्येकमित्यादौ।

।।अष्टौ वसव इति। 1-14।।

वसुशब्दादष्ट संज्ञा ज्ञेया। इति शब्दोदिग्दर्शनार्थः। तेनाब्धिरसादिभ्योऽपि चतुः षडादयो शेयाः।।

इति श्री भट्टाचार्य महादेव कृतो कविदयितायां पैड्गलवृत्तौ प्रथमोऽध्यायः।।

❖❖❖

नगणः	।।।	नाकाः	सुखम्

द्वितीयोऽध्यायः

छन्दः ।।2–1।।

अधिकारोऽयम्

गायत्री।।2–2।।

अधिकारोऽयम्। द्वादशसूत्राणि यावत्।

दैव्येकम्।।2–3।।

एकाक्षरं छन्दो दैवी गायत्री स्यात्। तत्रायं प्रदर्शनप्रकारः। चतुरङ्गक्रीडावच्चतुष्षष्टि कोष्ठानि विलिखेत्[1]। द्वितीयायां पंक्तो प्रथमे कोष्ठे संज्ञा ज्ञातुं दैवीशब्दं विन्यसेत्। द्वितीये एकाङंक प्रथम पङक्तो द्वितीय कोष्ठे गायत्री शब्दम्।

1. चतुष्षष्टिकोष्ठानां स्पष्टतरः प्रदर्शनप्रकारः–

छन्दः	गायत्री	उष्णिक्	अनुष्टुप्	बृहती	पंक्तिः	त्रिष्टुप्	जगती	
आर्षी	24	28	32	36	40	44	46	
देवी	1	2	3	4	5	6	7	
आसुरी	15	14	13	12	11	10	9	
प्राजापत्या	8	12	16	20	24	28	32	
याजुषी	6	7	8	9	10	11	12	
साम्नी	12	14	16	18	20	22	24	
आर्ची	18	21	24	27	30	33	36	
ब्राह्मी		36	42	48	54	60	66	72

आसुरीपञ्चदश। 2–4।।

पञ्चदशाक्षरमासुरी गायत्री स्यात्। तृतीय पंचतो पूर्ववदासुरीति संख्यां च लिखेत्।

---

1 अद्यत्वे चतुरङ्गक्रीडा 'शतरन्त्र'नाम्ना व्यपदिश्यते।

प्राजापत्याष्टौ।2–5।।

अष्टाक्षरं प्राजापत्या गायत्री स्यात्।

चतुर्थपंक्तो पूर्ववद्विन्यासः।

यजुषां षट्।2–6।।

षडक्षरं यजुषां गायत्री स्यात्। पञ्चम पंक्तो पूर्ववद्विन्यासः।

साम्नां द्विः।।2–7।।

षण्णां द्विः करणम्। तेन द्वादशाक्षरं साम्नां गायत्री स्यात्। षष्ठ-पंक्तो पूर्वपद् विन्यासः।

ऋचां त्रिः।2–8।।

पद त्रिःकृता न्यष्टादशाक्षरमृचां गायत्री स्यात्। सप्तमपंक्तो पूर्ववन्न्यासः।

द्वो द्वौ साम्नां वर्द्धेत[1]।2–9।।

गायत्रयक्षरं साम्नां द्वो द्वो वर्णो गृहीत्वा पूर्वात् पूर्वात् कोष्ठाद्याव दष्टमकोष्ठं वर्द्धेत। तृतीयादिकोष्ठेषु चतुर्दशषोडषाष्टाद विंशति द्वाविंशति चतुर्चिशत्यङ्कानां न्यासः।

त्रींस्त्रीनृचाम्[2]।।2–10।।

ऋचां पंक्तो त्रींस्त्रीन् वर्णान् गृहीत्वा वर्द्धेत[3]। एकविंशतिश्चतुर्विंशति सप्तविंशतित्रिशत्त्रयस्त्रिशत् षटविशदंकानां पूर्वन्न्यासः।

चतुरश्चतुरः प्राजापत्यायाः[4]।।2–11।।

प्राजापत्या[5] पंक्तो चतुरश्चतुरो वर्णान् गृहीत्वा बर्द्धेत[6]। द्वादशषोडषविंशतिचतुर्विंशत्यष्टाविंशति द्वात्रिंशदङ्कानां पूर्वन्न्यासः।

एकैक शेषे।।2–12।।

---

1 मूले इदं सूत्रं सूत्ररूपेण नास्ति, किन्तु वृत्तिरूपेणास्ति।

2 मूले मृशं इति पाठः।

3 मूले 'वर्द्धेती इति पाठः।

4 मूले चतुरश्चतुरः प्रजापत्यायाम् इति पाठः।

5 नियोजितः पाठः

6 'वर्द्वैतः' इति मूले।

उक्तवृद्धेरन्यः शेषः। तत्र दैव्यां याजुस्यां च पंक्तो एकैकंवर्णं गृहीत्वा बर्द्धेत।।

आसुर्य्यां वक्ष्यति (तेन दैव्यां) द्वि-त्रि-चतुः-पज्च-षट्-सप्ताङ्कानां (याजुष्या) सप्ताष्टनवदशैकादश द्वादशाङ्कानां च पूर्ववन्यासः।

ज्यादासुरी।।2–13।।

आसुरीवर्णस्त्वेकैकं वर्णं त्यजेत्।। चतुर्दशत्रयोदशद्वादशैकादश-दशनवाङ्कानां पूर्ववन्न्यासः।

तान्युष्णिमनुष्टब्बृहतीपंक्तित्रिष्टुब्जगत्यः।।2–14।।

तानि छन्दांसि गायत्रयाः परस्तादुष्णिगाद्याज्यानि यथासंख्यो स्युः। तिस्रः तिस्र इति वक्ष्यमाणा द्वयक्षरं देव्युष्णिक्, चतुर्दशाक्षरभासुर्युष्णिक्, त्रयक्षरं दैव्यनुष्टु वित्याद्यूहयम्। प्रथमपंक्तेस्तुतीयादि कोष्ठेपूष्णिगादि संज्ञान्यासः।

तिस्रस्तिसः सनाम्न्य एकेका ब्राहम्यः।।2–15।।

प्रागिति वक्ष्यमाणद्यजुषां पंक्तिमारभ्य याजुषीसाम्न्याच्च्र्ची च इति तिस्रस्तिस्रो गायठ्याद्या एकैकभूता मिलिता ब्राह्मीसंज्ञाः त्युः। प्रत्येकं माभूदित्येकग्रहणम्। सह नाम्ना व्यापकेन गायक्र्यादिना वर्तन्त इति सनामत्य एक संज्ञा इत्यर्थः। किमुक्तं? याजुष्याद्यास्ति स्रोगायत्र्यो मिलित्वा षटित्रंशदक्षराब्राह्मीगायत्री स्यात्। उष्णिहो मिलित्वा द्वाचत्वारिंशदक्षरा ब्राहभ्युष्णिम्[1], अनुष्टुभो मिलित्वा अष्टाचत्वारिंशदक्षरा ब्राह्भ्यनुष्टुप, बृहत्यो मिलिताश्चतुः पञ्चारदक्षरा ब्राह्मी बृहती, पंक्तयो मिलित्वा षष्ठयक्षराब्राहमीपंक्तिः, त्रिष्टुभो मिलित्वा षट्षष्ठयक्षराब्राह्मी त्रिष्टुप जगत्यो[2] मिलित्वा द्विसप्तत्यक्षरा ब्राहमी जगतीति। अष्टमपंक्तो प्रथमकोष्ठे ब्राह्मी शब्दं द्वितीयादिकोष्ठेषु च षट्त्रिंशद् द्वाचत्वारिंशः दष्टचत्वारिंशच्चतुः पञ्चाशत्षष्ठिषट्षष्ठिद्विसप्तत्यङ्कान् लिखेत्।

प्राग्यजुषामार्ष्य इति।।2–16।।

ब्राह्मीवर्ज्यमनुर्क्तते। यजुषां पंक्तिः प्राक् प्राजापत्यासुरी दैव्यस्तिस्रस्तिस्रोगायत्र्याद्याः पूर्ववदार्षीसंहाः स्युः। किमुक्तम्? प्राजापत्या द्यास्तिस्रो गायत्र्यो मिलित्वा चतुर्विंशत्यक्षराः आर्षी गायत्री, उष्णिहो

---

1 मूले "उष्णि अनुष्टुभो" इतिपाठः।

2 मूले जगत्या मिलित्वा इतिपाठः।

मिलित्वाऽष्टाविंशत्यक्षरा-आर्षी उष्णिक्, अनुष्टुभो मिलित्वा द्वात्रिंशदक्षरा आर्षी अनुष्टुप, बृहत्यो मिलित्वा षटित्रंशदक्षरा आर्षी-बृहती, षङ्कत्योमिलित्वा चत्वारिंशदक्षरा आर्षी पंक्तिः, त्रिष्टुभो मिलित्वा चतुश्चत्वारिंशदक्षरा आर्षीत्रिष्टुप्, जगत्यो मिलित्वा अष्टचत्वारिंशदक्षरा आर्षीजगतीति। प्रथमपङ्क्तो द्वितीयादि कोष्ठेषु चर्तुविंशत्यष्टाविंशतिद्वात्रिंशत्षटित्रंशच्चत्वारिं शच्चतुश्चत्वारिंशदष्ट चत्वारिंशदङ्कान् लिखेत्। वैश्च्चायेदमुच्यते। आर्ष्याद्यष्टानां क्रमेणाष्टोपङ्क्तयः। अष्टपङ्क्तीनां च द्वितीयादिसप्तकोष्ठानि गायत्रयादि सप्तानां तत्तव्योःशुकोष्ठस्थं छन्द स्तदुमेभयेकनामकं भवतीति। इति शुद्धगायङ्यादि समाप्त्यर्थः।

।।इति श्री भट्टाचार्य श्री महादेवकृतायांकविदयितायां पैङ्गलवृत्तौ द्वितीयोऽध्यायः।।

❖❖❖

तृतीयोऽध्यायः

पादः ।3–1।।

अधिकारोऽयमध्यायं यावत्।

इयादि पूरणः। ।3–2।।

बहुब्रीहिः आदि शब्दात् उवादिग्रहः यत्र गायत्र्यादो पादो न पूर्यते तत्रेया दिना पूरणीयः।

यथा–(क) तत्सवितुर्वरेण्यं[1]यम्।।

(ख) दिवं गच्छ[2] सुवर्गाय।। इत्यादि।

लोके च–''दृष्टिः सतां दशन (मस्?) तु भवन्तवूजोनाम[3]। इति?।

गायत्र्या वसवः। 3–3।।

अष्टाक्षराणि गायङ्याः पाद इति परिभाष्यते एवमग्रऽपि।

जगत्या आदित्याः।3–4।।

द्वादशाक्षराणि।

विराजो[4]दिशः। 3–5।।

दशाक्षराणि।

त्रिष्टुभो रूद्राः। 3–6।।

एकादशाक्षराणि। समाप्ता परिभाषा।

एकद्धित्रिचतुष्पादुक्तपादम्।3–7।।

---

1 हलायुध टीकायाम् 'तत्सवितुर्वरेणियम्' दिवं गच्छ सूवः पुत्र'। इति यजुर्वेदे - तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि। धियो यो नःप्रचोदयात्। (महर्षिदयानन्दकृतयजु. भाषा भाष्य, अ. 30- म. 2)

2 मूले 'गछ' इति।

3 अस्पष्टर्थोऽयंपद्यखण्डः।

4 विराजे इति मूले।

एभिश्चतुर्भिर्लक्षणैः पादो यस्य तदुक्तं पादं छन्दसो यस्य यादृशः पाद उक्तस्तेनैव पादेन तत् क्वचिदेकपात्, क्वचिद्द्वियात् क्वचिद् त्रिपात्, क्वचिद् चतुष्पात्। गायत्री[1] च त्रिपादेव[2]। चतुर्भिरष्टाक्षरै (पादैः) रनुष्टुवक्षयते।

।।आद्धं चतुष्पादृतुषिः।3–8।।

आद्यमिह छन्दो गायत्री षडक्षरैश्चतुर्भिः पादैश्चतुष्पाद्गायत्री स्यात्।

क्वचित्रिपाद्षिभिः।3–9।।

क्वचिद् वेदे त्रिभिः सप्तावरैः पादैस्त्रिपाद् गायत्री भवति।

सा पादनिचत्।3–10।।

सैव गायत्री पादनिषत् संज्ञास्यात्। अदृष्टार्थं नामान्तरम्।

षट्कसप्तकयोर्मध्येऽष्टावतिपाद निवृत्[3]।3–11।।

प्रथमःपादः षडक्षरो, द्वितीयोऽष्टाक्षरः तृतीयः सप्ताक्षरश्चेदतिपादनिवृत् त्रिपाद् गायत्री स्यात्।

द्वौ नवकौ षट्कश्च सा नागी।3–12।।

प्रथम द्वितीयौ नवाक्षरो तृतीयः षडक्षरश्चेन्नागी गायत्री स्यात्।

विपरीता वाराही। 3–13।।

प्रथमः षडक्षरः अन्यौ नवाक्षरौ चेद्वाराही गायत्री स्यात्।

षट्सप्ताष्टकैर्वर्द्धमाना।।3–14।।

आद्यः षठुक्षरः द्वितीयः सप्ताक्षरस्तृतीयोऽष्टाक्षरश्चेवर्द्धमाना[4] गायत्री स्यात्।

विपरीताप्रतिष्ठा।3–15।।

प्रथमोऽष्टाक्षरो द्वितीयः सप्ताक्षर प्रथमः षऽक्षर श्चेत् प्रतिष्ठागायत्री स्यात्। केचन साम्प्रदायिकास्त्वेते (तत्?) सूत्रेन पठन्ति, किन्तु अष्टौ सप्तषट्केतिप्रतिष्ठा। एषेव विपरीता वर्द्धमाना इति सूत्रे सपादनिचृदिति सूत्रानन्तरम्।

---

1 मूले गायत्री च इति पाठः।

2 वैदिक छन्दोमन्त्रविषयकमिदं, लौकिकं तु पादश्चतुर्थभागः, (पि. सू. 3-10)

3 'सर्वत्र मूले निवृत्' इति।

4 मूले विर्द्धमान पाठः।

तृतीयंद्विपाज्जा[1]गतगायत्रीभ्याम्।3–16।।

त्रिपादिति निवृत्तम्। परिभाषायां तृतीयं विराट्। द्वादशाष्टाक्षराभ्या[2] पादाभ्यां द्विपाद्विराङ् गायत्री स्यात्।

त्रिपात्त्रैष्टुभैः।3–17।।

एकादशाक्षरैः पादैस्त्रिभिस्त्रिपाद्विराङ्गायत्री स्यात्। त्रिपात्त्रिष्टुवेव किन्न[3] स्यादित्यत्र वक्ष्यते। इतिगायङ्यधिकारः।

उष्णिग्गायत्रौ जागतश्च।3–18।।

द्वावष्टाक्षरावेकोद्वादशाक्षरश्चेद् त्रिपादुष्णिक् स्यात्। सूत्रमिदमुत्तरार्थम्।

कक्[4]म्मध्येचेदन्त्यः।3–19।।

पूर्वसूत्रे अन्ते यावाद् (न) न्त्यो जागतः स चेद् गायत्रयोः पादयोर्मध्ये तदोष्णिक् ककुप् स्यात्।

।।पुर उष्णिक् पुरतः[5]।3–20।।

प्रथमश्चेज्जागतस्तदा "पुर उष्णिक्" स्यात्[6]।

।।परोष्णिक् परतः।3–21।।

तृतीयश्चेज्जागतस्तदा "परोष्णिक्" स्यात्।

।।चतुष्पादृषिभिः।3–22।।

सप्ताक्षरैचतुर्भिपादेश्चतुष्पादुष्णिक् स्यात्। इत्युष्णिगधिकारः।

अनुष्टुब् गायत्रैः।3–23।।

अष्टाक्षरैश्चतुर्भिः पादैरनुष्टुप् स्यात्।

त्रिपात्क्वचिज्जागताभ्यांश्च[1]।3–24।।

---

1 मूले 'जगतगायत्रीभ्याम्' पाठः।

2 'द्वादशाक्षराभ्यां' इत्येव मूले पाठः।

3 'त्रिपात्त्रिदुवेवै' इति पाठः।

4 पिङ्गल सूत्रे ककुम्मध्ये इति भूले तु 'ककुद्मध्यै' पाठः।

5 छन्दः शास्त्रे 'परतः' इति।

6 मूले 'पुरत उष्णिक्' इति।

क्वचिद् वेदे गायत्रेनेकेन ततो द्वाभ्यां जागताभ्यां "त्रिपादनुष्टुब" स्यात्।

।।मध्येऽन्त्ये च।3–25।।

जागतयोर्मध्येऽन्ते (न्त्ये) वा[2] चेद् गायत्रस्तदापि त्रिपादनुष्टुप् स्यात्।

इत्यनुष्टुबधिकारः।

बृहती जागतस्त्रयश्च गायत्री[3]।3–26।।

त्रिपादिति निवृत्तम्। उत्तरार्थमिदं सूत्रम्।

पथ्यापूर्वश्चेत्तृतीयः।3–27।।

पूर्वो जागतस्तृतीयस्त्रयोऽन्ये गायत्रश्चेत्पक्ष्या, 'बृहती' स्यात्।

न्यङ्कुसारिमी द्वितीयः। 3–28।।

द्वितीयः पादोजागतश्चेन्न्यङ्कुलारिणी 'बृहती' स्यात्।

स्कन्धोग्रीवी क्रोष्टुकेः। 3–29।।

क्रौष्टुकेराचार्यस्यमते 'स्कन्धोग्रीवी संज्ञेयम्।

उरोबृहती यास्कस्य। 3–30।।

यास्कस्याऽऽचार्यस्य मते तु उरोबृहतीयम्। तदेवं तिस्रः संज्ञा अनुमताः। आचार्यग्रहणं पूजार्थम्। एवमन्यत्रापि।

उपरिष्टाद्बृहत्यन्ते।3–31।।

जागतोऽन्ते चेत, 'उपरिष्टादबृहती' स्यात्। पुनर्बृहती ग्रहणं मिलितस्यैव संज्ञात्वार्थम्। एवमन्यत्रापि।

पुरस्ताद्बृहती पुरः।3–32।।

आद्यश्चेज्जागतः पादस्तदा 'पुरस्ताद्बृहती' स्यात्।

क्वचिन्मवकाश्चत्वारः।3–33।।

---

1 मूले 'जागताद्याश्चा' इति पाठः।

2 अन्यत्र छन्दः शास्त्रे वा इति नास्ति

3 छन्दःशास्त्रे 'गायत्राः' पाठः। अस्यसूत्रस्य हलायुधवृत्तौ 'एको जगतःपादः, त्रयश्च गायत्राः, तदा 'बृहती नाम छन्दो भवति। छ. शा. 3-26

चतुर्ग्रहणं त्रय इत्यस्य निवृत्त्यर्थम्। क्वचिद् वेदे नवाक्षराश्चत्वारः पादाः, लापि बृहती।

वैराजो गायत्रौ च।3–34।।

आद्यौ दशाक्षरावन्त्यावष्टाक्षरो सापि बृहती।

।।त्रिभिठजागतैर्महाबृहती।3–35।।

त्रिभिर्द्वादशाक्षरैः पादेस्त्रिपाच्छन्दो 'महाबृहती' स्यात्।

सतोबृहती ताण्डिनः [1]।3–36।।

ताण्डिन आचार्यस्य मते सतोबृहती संज्ञेयम्। इतिबृहत्यधिकारः।

पंक्तिर्जागतौ गायत्रौ च।3–37।।

उत्तरार्थमिदं सूत्रम्।

पूर्वाचिदयुजौ सतः पङिक्त।3–38।।

तत्रायुक्पादौ चेज्जागतौ (युजौ गायत्रौ चेत्) तदासतः पङिक्तः संज्ञा स्यात्। पूर्वा विद्याबहिरावर्तते।

विपरातौ च। 3–39।।

युक्पादौ चेत् तदापीयम्।

प्रस्तारपङिक्तः पुरतः।3–40।।

प्रथमद्वितीयो चेत्प्रस्तार पङिक्तः संज्ञा स्यात्।

आस्तार पंङिक्तः परतः [2]।3–41।।

तृतीयचतुर्थौ चेत् आस्तारपङिक्तः स्यात्।।

विस्तारपंङिक्तरन्तः [3]।3–42।।

मध्यौ तृतीयद्वितीयौ चेद् विस्तार पंक्तिः स्यात्।

---

1 मूले 'सतो बृहती भाण्ड़िनः' इति सूत्रं किन्तु अन्यत्र छन्दशास्त्रीय ग्रन्थेषु 'सतो बृहती ताण्डिनः' इति। उपलब्ध ग्रन्थानामाधारे 'ताण्डिन' इति पाठ उचितः। (छ. सू. 3-36)

2 अन्यस्मात् छन्दश्शास्त्रीयग्रन्थात् अत्र सूत्रयोः कृमभेदः। छन्दः शास्त्रे 'आस्तारपङ्क्तिपुरतः' 'प्रस्तारपङि्त परतः' एवं क्रमः।

3 पिङ्गलच्छन्दः सूत्रे विष्टारपंक्तिः इति पाठः।

संस्तारपंक्तिर्बहिः।3–43।।

प्रथमचतुर्थो चेत् संस्तार पंङिक्तः स्यात्।

अक्षरपङिक्तः पञ्चकाश्चत्वारः।3–44।।

चत्वारः पादाः पज्चाक्षराश्चेदक्षरपङिक्तः स्यात्।

द्वावप्यत्पशः।3–45।।

द्वौ पादौ चेत् पञ्चाक्षरौ तदाऽत्पशः पङिक्तः स्यात्। अपि शब्दः पञ्चकानुकर्षणार्थः।

पदपङिक्तः पञ्च।3–46।।

पञ्चाक्षराः पञ्चपादाश्चेत्पदपंक्तिः स्यात्।

चतुष्कषट्कौ त्रयश्च।3–47।।

आद्यश्चतुरक्षरः द्वितीयः षडक्षरः शेषास्त्रयः पञ्चाक्षराश्चेत्तदपि पदपङिक्तः। पङिक्तरेवेत्यके।

पथ्यापञ्चभिर्गायत्रैः।3–48।।

गायत्रैः पञ्चभिः पादैः पथ्यापङिक्तः स्यात्। पञ्चभिर्गायत्रैरिति च पृथगधिक्रियते। इति पङत्त्यधिकारः।

जगतीषङिभः।3–49।।

षङिभर्गायत्रैः पादैःजगती' स्यात्।

एकेनत्रिषटुज्जयोतिष्मती।3–50।।

पज्चभिः पादैस्त्रिष्टुष्ज्योतिष्मती स्यात्। कैरित्युक्तमेतेनेति प्रत्यासत्तेरेकेन त्रैष्टुभपादेन शिष्टैश्चतुर्भिर्गायत्रैर्विशिष्टाधिकारेऽपि युधिष्ठिरेण सह पञ्चभ्रातर[1] इत्यत्र युधिष्ठिरस्येव त्रैष्टुभस्य पञ्च[2] स्वावसायानन् न षट्पादत्वांशकेति केचित्तत्र भातृणामिव गायत्राणां पञ्चत्वाभावात्।

तथा जगती[3]।3–51।।

---

1 हलायुधवृत्तौ यथोपाध्यायेन सह पञ्चशिष्या आगता इति पाठः।

2 मूले पञ्चत्वावसायात्रवद्यादत्वाशकिति केचिन्तत्र इति अस्पष्ट पाठः।

3 मूले 'तथा जगता' इति पाठः।

एकेन जागतेनपादेन चतुर्भिर्गायत्रै[1]र्जगज्ज्योतिष्मती स्यात्। तर्थेति गुरुकरणमेग्रेषभयाधिकारार्थम्।

पुरस्ताज्जयोतिः प्रथमेन।3–52।।

तत्रैव प्रथमेन त्रैष्टुमेन पादेन[2] शेषेश्च गायत्रैः पादैः 'षुरस्ताज्ज्योतिः' ताम त्रिष्टुत् स्यात्।

मध्येज्योतिर्मध्यमेन[3]।3–53।।

यदा मध्यमस्त्रैष्टुभस्तुतीयः पादो भवति, उभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योति' नाम त्रिष्टुब् भवति। तथा 'जगती' इत्यनुवर्तते। एकेन जागतेन मध्यमेन तृतीयेनोबयतश्च द्वौ द्वौ गायत्रौ, तदा मध्ये ज्योतिर्जगती भवति।

उपरिष्ठज्ज्योतिरन्तेन।3–54।।

पञ्चमेन त्रैष्टुभेनोपरिष्ठाज्ज्योतिस्त्रिष्टुप् जागतेन उपरिष्ठाज्ज्योतिर्जगती।

एकस्मिन् पञ्चके छन्दः शङ्कुमती।3–55।।

एकस्मिन् पञ्चाक्षरे पादेऽन्येषु यथा स्वलक्षणेषु शङ्कुमती स्यात्। पुनश्छन्दोग्रहणं व्याप्त्यर्यम्।

षट्के ककुद्मती।3–56।।

एकस्मिन् षडक्षरे इतरेषु यथा त्वलक्षणेषु ककुद्मती स्यात्।

त्रिपाद[4]णिष्ठमध्या पिपीलिकमध्या।3–57।।

आद्यन्तावपेक्ष्याऽल्पाक्षरश्चेन्नध्यमस्तहा त्रिपाच्छन्दः पिपीलकमध्या स्यात्। आदिरन्तश्च यस्यछन्दसः पादस्तन्नामेव[5] वा।

---

1 ह. टीकायां 'ज्योतिष्मती' नाम छन्द इत्येवष्ट

2 मूले 'पादेन' एतावत् पर्यन्तं वृत्तिरस्ति। अतः परं 'शेषेश्च' इत आरभ्य 'स्यात्' पर्यन्तंपाठः संयोजितः।

3 मूल ग्रन्थे 'मध्येज्योतिर्मध्यमेन' अस्य सूत्रस्यवृत्तिः प्रतिलिपिकारेण प्रमादवशात्पुरस्तात् 'मध्ये.' इति द्वयोः सूत्रयोवृत्तयौ सम्मेत्य एकमेव लिखिता यथा मूले 'तत्रैव प्रथमेन त्रैष्टुमेन मध्ये ज्योतिस्त्रिष्टुप् जागतेन मध्ये ज्योतिर्ज्जगती' इति। अत उपर्युक्तभो र्द्वयोः सूत्रयोर्वृति 'हं. टीकात' उद्धृता।

4 मूले 'चिपादाणिष्ठ' इति पाठः।

5 मूले 'तन्नामैवा' इति पाठः।

विपरीता यवमध्या।3–58।।

मध्ये बहवक्षर आद्यन्तावल्पाक्षरो चेत्तदा यवमध्या स्यात्।

जनाधिकेनैकेननिचुद्भूरिजो[1]।।3–59।।

निर्दिष्टच्छन्दोऽक्षराण्येकाक्षेरेण न्यूनानि चेत् तदा निवृत्स्यात्। अधिकानि चेत्तदा 'भुरिक्' स्यात्।

द्वाभ्यां विराट् स्वराजौ।।3–60।।

अक्षराभ्यां पादाभ्यां येति भरतवचनाद् द्वाभ्यामक्षराभ्यां पादाभ्यां वा न्यूनत्वे विराट् स्यात्। आधिक्ये स्वराट् स्यात्।

शङ्कुमत्यादिषु गायत्रादि संज्ञा अवतिष्ठन्ते एवा एवं तर्हि षडिंवशत्यक्षरच्छन्दः किं किं स्वराड् गायत्री विराडष्णियश्चेति संदेहे कुतो निर्णय इत्यत आह–

आदितः संदिग्धे।।3–61।।

आदि पादो गायत्रश्चेत्तदा गायढ्येव, उष्णिहश्चेत्तदौष्णिणेवं सर्वत्रापि (बोध्यम्)[2]

देवतादितश्च[3]।।3–62।।

तत्र गायत्र्यादीनां सप्तानां क्रमेण सप्त देवतादीन त्रिसूत्र्याऽऽह।

अग्निः सविता सोमोबृहसतिर्मित्रावरुणा[4]चिन्द्रो विश्वेदेवा देवताः।।13–63।।

अग्निश्चेद् देवता तदा गायत्रीत्यादि। स्वराः अङ्जादयः।

षड्जर्षभगान्धारमध्यमपञ्चमधेवेत[5]। निषादाः।।3–64।।

---

1 मूले पाठे 'उँनाधिकेनैकेन निचृद्भाविजौ' इति पाठः।

2 किञ्चित् खण्डितत्वात्पठितुं न शक्यम्, अतो हलायुध टीकायां 'सर्वत्रापि कोध्यम्' इति पाठानुरोधेन शोधनम्।।

3 देवतादितश्च सूत्रमिदं प्रमाणितम्। मूले देवता स्वरादितोऽपि निर्णयः।

4 मूले 'बृहस्पतिर्वरुणइन्द्रो' इति पाठः।

5 मूलेतु 'धैवता' इति पाठः।

सित[1]सारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः।।3–65।।

रोचनाभाः कृतय[2]। श्यामान्यतिच्छन्दांति। अजि (ति) जगत्यादीनि। अससोवृष इति देवताः। सिंसा पिंकृनीलोगौरवर्णाः[3]। षड्त्रृगामपधैनिश्चरा इति। इतिस्वरान्तर व्यवच्छेदार्थः। शिष्यशिक्षार्थमेवं सङ्केतेनो[4]क्त्वा स्फुटं वक्तुं सूत्रमनुवदति। आदितः संदिग्धे। देवतादितः कृत्यादीनां निवृदादित्वाभावेनासंदेहाद-दृष्टार्थ वर्णज्ञानमित्येते सूत्रे इति प्राञ्चः।

तन्न–

वेदानुक्रमण्या[5] कात्यायनो गायङ्यादि उत्कृत्यन्तमुक्त्वा चतुर्विंशत्यक्षरादीनिचतुरुत्तरान्यूनाधिकेनेकेन निवृद्भुविजौ द्वाभ्यां विराट् स्वराजाविति-एकाक्षरं भवेदुक्तमित्यादिनौक्तादि दण्डकान्ता नभिधायभरतः।

छन्दलौ यस्यपादेस्याद्धीनं वाधिकमेव वा।

अक्षरं तन्निवृत्प्रोक्तं भुविक् चेति द्विजोत्तमाः।।

अक्षराभ्यां सदा द्वाभ्या[6] माधेकं हीनमेव वा।

तच्छन्दोनामतोशेयंस्वराडथ विराऽपि[7]।।इति।।

---

1 मूले 'सिताशारङ्ग' इति।

2 मूले कृतयाः।

3 'अससो.' सिं सा पि.' इति वचनद्वयं उपर्युक्तस्य 'अग्नि सविता सोम.' 'सितशारङ्गः' इतिवचनद्वयस्य समासतःप्रतिपादनम्।

4 'संक्रेते' इति मूले।

5 'चिदमत्तवनुक्रमण्याम्' इतिमूले पाठः।

6 मूलपाठे 'पादाभ्यां' इति।

7 छन्दसो यस्यपादे स्यादीनं वाऽधिकमेव वा।

अक्षरं निवृदिति प्रोक्तं भूरिक् चेति द्विजोत्तमाः।।

अक्षराभ्यां सदाद्वाभ्यामधिकं हीनमे व वा।

तच्छन्दो नामतो ज्ञेयं स्वराडिति विराऽपि।।

(भ.ना.शा. अ. 14, श्लोक 106-107)

गोत्राण्याह–आग्निवेश्य काश्यागौतमांगिरस भार्गवकौशिकवाशिष्ठानि गोत्राणीति।3–66।।

इति केवल वैदिक समाप्तौ।।

इति श्री भट्टाचार्य श्री महादेव कृतौ कविदयितायां

पेड्गलवृत्तौ तृतीयोऽध्यायः।

❖❖❖

चतुर्थोऽध्यायः

चतुःशतमुत्कृतिः।।4–1।।

चतुरधिकशताक्षरं छन्द उत्कृतिः स्यात्।

चतुरश्चतुरस्त्यजेदुत्कृतेः।4–2।।

तस्माच्चतुः शतमुत्कृतिः। चतुरधिकशताच्चतु रश्चतुरोवर्णांस्त्यजेत्। तेनं, वक्ष्यमांणपर्य्यालोचनृया[1] (चतुश) शतादारभ्याष्ट चत्वारिंशतं (त्) यावच्चतुश्चतुर्न्युनं पृथक् स्थापयेत्।

तान्या[2]बिसंव्याप्रेभ्यः कृतिः।।4–3।।

तानि शतादीनि स्थापितानि यथाक्रमभ्यादि[3] पञ्चोपसर्गपरकृतिसंज्ञानि स्युः। तत्र शतमक्षराण्यभिकृतिः ण्णवतिः संकृतिः। द्विर्नवतिर्विकृतिः।। अष्टाशीतिराकृतिः। चतुरशीतिः प्रकृतिः।

प्रकृत्या च[4]।।4–4।।

स्वरुपेणापिकृतिः स्यात्। तेनाशीतिः कृतिः।

धृत्यष्टिशक्वरीजगत्यः।।4–5।।

कृतेरधस्तात् धृत्यादि चतुरः संज्ञाः क्रमेण स्थापयेत्।

पृथक् पृथक् पूर्व्वत एवेषाम्[5]।।4–6।।

एतान्येव धृत्यादीनि[6] चत्वारिधृत्यादीनां पूर्वं यथास्वं स्थापयेत्।

द्वितीयं द्वितीयं द्वितीयमतितः[7]।।4–7।।

---

1 मूले 'लोचनाया' इति पाठः।

2 'तान्यति सं व्याप्रेभ्यः' इति मूले।

3 मूले 'मत्यादि' इति पाठः।

4 छन्दः शास्त्रे 'प्रकृत्या चोपसर्गवर्जित' इति पाठः। इदमेव सूत्रं सर्वत्रोपलभ्यते।

5 अन्यत्र 'एतान्येवैषाम्'।

6 मूले 'धुत्यादि' इति पाठः।

7 मूले 'अभितः' इति पाठः।

द्वितीयं द्वितीयं पूर्वतो लिखितं धृत्यादि अतिशब्दात् परं प्रयोक्तव्यम्। तेनोत्तरं छन्दसामेताः संज्ञाः। तत्र षट्सप्ततिरतिधृतिः। द्धिःसप्ततिर्धृतिः। अष्टषष्ठयक्षरमत्यष्टिः। चतुःषष्ठिरष्टिः। षष्ठिरतिशक्वरी। षट्पञ्चाशदशक्वरी। द्विपञ्चाशदति जगती। अष्टवत्वारिंशज्जगती''

अत्र लौकिकम्।।4–8।।

अथ वचनात्पूर्वेषां वैदिकत्वमुक्तम्। अथानन्तररमेव यदायर्यादि वक्तव्यम् तल्लोकिकम्, दनुमध्यादि र संज्ञाः, संभवे वैदिकेऽपि।

आत्रैष्टुबाच्चयदार्षम्।।4–9।।

गायत्र्यादित्रिष्टुबन्तं यदार्षं छन्द उक्तं यथा चतुविंशतिरक्षराणि गायत्रीः, अष्टाविंशतिरुष्णिक्, द्वात्रिंशदनुष्टुप्, षटित्रंशद्बृहती, चत्वारिंशत्पंक्तिः। चतुश्चत्वारिंशतत्रिष्टुबिति। तदपि लौकिकम्, वैदिकवत्। चकारादुत्कृत्यादयश्च। अतएव अस्मिन्नध्याये पठिताः। जगत्यनुवादाच्च न च विध्यनुवाददोषः, सूत्रत्वात्।

पादश्चतुर्भागः।।4–10।।

चतुर्थोभागः पादः स्यात्। यथा–गायत्र्याः षडिति।

यथावृत्तसमाप्तिर्वा[1]।।4–11।।

वृत्तमत्र पद्यमात्रम् यस्य पद्यस्य यादृशैर्न्यूनाधिकैरक्षरैः पादसमाप्तिरुच्यते, द्वयादि पादौ वा तस्य स एव पादः। (वा) शब्दो व्यवस्थितविभाषा। हयमुद्गतादि पद्यादिविषयं यत्यर्थम्। वसुन (र)[2] सादिनिषेधार्थम्। इह तावत्

पद्यं गन्धंद्विधाछन्दः पद्यं द्वित्रादिपादकम्।
तद्द्विधा जातिर्वृत्तं चं जातिर्मात्राकृता भवेत्।।
गणात्राप्रभेदेन सा पुनर्विविधा भवेत्।
वृत्तमक्षर संख्यातं तच्चतुर्द्धा व्यवस्थितम्।।
सममर्द्धसमं चैव विषयमं सह गाधवा।
समं तुल्यचतुष्पादं तदर्द्धसममुच्यते।।

---

1 मूले समाप्तेर्वा' पाठः

2 यद्यप्यत्र 'वसूनसादि' इत्यस्पष्टार्थकः शब्दः किन्तु यत्यर्थकाः शब्दा वसु रसादयो भवन्ति।

यस्याङ्घ्री अयुजो तुल्यौ युजौ तुल्यौपृथग्विधौ।
विउपा यस्य चत्वारः पादास्तद्विषमं विदुः।।
अपादः पदसंज्ञानो गद्यं तच्च त्रिधा मतम्।
चूर्णमुत्कलिकाप्रायं पद्यगन्धि च पण्डितैः।।
अकठोराक्षरं चूर्णं तत्रादीर्घ समासकम्।
समासाराहवद्गाढ़वर्णमुत्कलिकाह्वयम्।।
पद्यं पादांशसंरूपर्कि पदगन्धिप्रचक्षते।
कलादीन्यपि पादानि परं तालादियोजना।
गुण आयर्यादिको ज्ञेयो वेतालीयादि का पुनः।।
मात्रा उक्तादिकं छन्दस्त्वक्षरं परिचक्षते।[1]

तत्रादौ गणच्छन्दो वक्तुमाह–

लः[2] समुद्रा गणः।।4–12।।

इह चत्वारो ला[3] एको गणः। (चतुर्णांलकाराणां गणः)[4]

गौ गन्तमध्यादिर्लश्च[5]।4–13।।

स च पञ्चधा। गुरूद्वयमन्त्यगुरूर्गुरुर्मध्योगुर्वादिर्लधुचतुष्टयं च[6]। गन्तादौ चतुर्मात्रासिध्यर्थं पूर्वं सूत्रम्।

अथायुर्वा लक्षणमाह–

स्वरा अर्द्ध चार्याधर्म्।।4–14।।

---

1 छन्दसां भेद विषये एवं विधाः श्लोका अन्यत्र छन्दःशास्त्रीयग्रन्थेषु न सन्ति, एते श्लोकाः ग्रन्थकारस्य मौलिकाः।

2 मूले 'लः' इति।

3 मूले 'लापकोगणः'

4 संयोजितः पाठः।

5 मूले 'गौगन्तमध्यादिन्लश्च' इति सूत्रम्।

6 अस्य स्पष्टोऽर्थ - अनेन गणस्य विन्यासभेदं दर्शयति। अस्य गणस्य मात्राप्रस्तार नियमेन प्रस्तारे क्रियमाणे पञ्चैव भेदाः भवन्ति। ते च भेदाः क्रमशः द्विगुण्काद्धूणादेव ऽऽ।,।।ऽ,।ऽ।, ऽ।।,।।।। एते पञ्चगणा जायन्ते।

सप्त गणाः। गणस्यार्ध च गुरुरेक आर्यार्धं गोपेत[1]मिति वचनात्[2]। अर्द्धनपुंसकमितिपूर्व निपातश्चेत्। पिप्ल्यर्द्धमितिवत्[3]षष्ठीसमासात्।

अन्नायुङ्न ज्।।4–15।।

अत्रैति शकलद्वय व्याप्त्यर्थमाय्र्यायामयुग् गणो मध्यगुरूर्न कार्यः। दोषाय ह्यसौ।

यदुक्तम्–

जह पढम तीअ पञ्चम सप्तम अंसेसुं होइ गुरुमज्झा।

गुब्बिणि अवि णु पइणा गाहा दो[4] सप आलेई।।[5]

अष्ठो जः।।4–16।।

प्रथमेऽर्थे षष्ठो गणो गुरुमध्यः कार्यः।

लौ वा।।4–17।।

सर्व लघु र्वा।

न्लौ चेत्यदं द्वितीयादि।।4–18।।

षष्ठस्य सरवलघुत्वे द्वितीयाक्षरमारभ्य पदं प्रवर्तते। तेनाद्य जयो? यतिः। यदुक्तं कलिकाल सर्वज्ञेन–पूर्वार्धे षष्ठो जः ओवा खेन्वाद्यलाधुनियति। पदनियति रिति[6] इत आरभ्य ममैव काव्यानि उदाहरणानि।

---

1 मूले 'गोपेतेति' पाठः।

2 गः गुरूः तेन उपेतम् गोपतम् आर्याधर्म् इत्यन्वयः,
तेन 'गोपेतमिति वचनात्' इत्ययं पाठः शुद्धः।

3 चेदर्द्धमितिवत् षष्ठी समासात् मूले पाठः पिप्पल्यर्धमितवत् शुद्धपाठः कृतः।

4 मूले 'गाहादौ संपआसेई' पाठः।

5 जा पठम तीज पंचम सत्तम ठाणे ण होइ गुरूमज्झा।/ गुब्विणिए गुणरहि आ माहा दोसं पआसेइ।। / संस्कृतम् - (प्रा. पै. 1.59.65) या गाथा प्रथमतृतीयपञ्चमसप्तमस्थने ननु गुरूमध्या जगणयुक्ताभवति। गुर्विणीव गुणरहिता सकलकार्यक्षमता सा गाथा दोषं प्रकाशयति। अतो विषमस्थानस्थनायका सान कर्तव्येत्यर्थः। गाथा छन्दः। (श्री लक्ष्मीनाथभट्ट विरचित पिङ्गलप्रदीप व्याख्या)

6 मूले उक्तम् 'यदुक्तं कलिकाल सर्वज्ञेन 'पूर्वार्धे षष्ठो लः खो वा सेन्वाद्यलाधुनि यति पदनियतिरिति। वस्तुतः कलिकालसर्वज्ञस्येयमुक्तर्नासि। कलिकाल सर्वज्ञेति विशेषणं

यथा–

अह सहि साहस कारिणि कह मवि पविसन्तराणि किरणम्मि।

अच्चो एत्थ जणो ण हु संचरइ कहं णु ब्बेलिस्सि?[1]।

सप्तमः प्रथमादि।।4–19।।

सप्तमस्य सर्व लघुत्वे प्रथमाक्षर पदं षष्ठानते यतिः।

उक्तं च तेन–ख (ष) ष्ठः छपरोऽन्तयतिरिति खः परो यस्मात्।

उदाहरणम्–

दल चलन लब्धमार्गे रजनीशकरे कृशाङ्गिपरिपतितम्।

कुञ्जान्तरे पलायितमङ्गानि तमः परिक्षिपति।।

एतच्च द्वितीयार्धेपि यदुक्तं तेन तुर्यर्योप्यष भवति चरम फले इति व्याख्यातं च वृत्तिकृदिभः। अपि षष्ठानुकर्षणार्थ इति। उदाहरण–

जह तह विरावणु मणु अछु हाहि।

दिब्बु सहोर अमिअ अ।।

जं उण अणे वि सस्स वि।

रो अइ तं हंत अह विरलम्।।

अन्त्ये पञ्चमः।।4–20।।

श्री हेमचन्द्रस्य कृते प्रसिद्धम्। श्री हेमचन्द्रस्य ग्रन्थश्छन्छोऽनूशानं यथाशक्ति अन्विष्टं परन्तु इयमुक्तिर्नोपलब्धा।

किन्तु वृत्तरत्नाकरस्य नारायणी व्याख्यायां इत्थं पाठः प्राप्यते 'यति नियमं छन्दोमाणिक्य का रोऽप्याहपूर्वार्धे षष्ठो जः खो वा खे चास्य लघुनिभवति यतिः। षष्ठः खपरोऽत्र ख इति चतुर्लधोर्गणस्यसंज्ञा।पूर्वार्धे षष्ठो गणो जगणः खो वा कार्यः। से तु षष्ठे गणे, अस्य लघूनि दोतदीयप्रथम लघ्वन्ते यतिर्भवति। यदि षष्ठः खपरः खश्चतुर्लघुः परो यस्य स तथासप्तमश्चतुर्लधुः स्यादित्यर्थः। (अत्र निर्दिष्टः छन्दोमाणिक्य' नामा ग्रन्थः केन लिखितः कस्मिंश्च काले निर्मित इति बहुशःपरिशीलनेनापि ज्ञातुं नाश्नुवम्। न्यूकेटलागस् नामाख्ये ग्रन्थेऽपि छन्दोमाणिक्यकारस्य नाम नास्ति।)

1 अयि सखि साहसकारिणि कथमपि प्रविशान्तराणि किरणे (?) अच्चो (?) अत्र जनौ न खलु सञ्चरति कथं नु ... ?

शेषार्धे पञ्चमस्त सर्वलघुत्वे प्रथममारभ्यपदम्। यतुर्थान्ते यतिः[1]।

उदा0–

जह जह उच्छ वणाइं दलाइं मुंचति परिणअदलाइं।

उच्छवण वालिआ अविमुंचद तह तह निअङ्गाइं[2]।।

षष्ठश्च ल्।।4–21।।

चकारोऽन्त्यानुकर्षणार्थः। शेषार्धे षष्ठ एकलघु रेव स्यात्।

त्रिषु गणेषु पादः पथ्याद्ये च।।4–22।।

योगविभागात् त्रिषु गणेषु पाद इत्सर्गः। तत्र आद्येऽर्धे शेषे च त्रिषु गणेषु पादश्चेत् समाप्यते तदा पथ्या नाम। उक्तमुदाहरणम्।

विपुलान्या[3]।।4–23।।

पूर्वं गणत्रयादुत्तरं वा पादश्चेत् विपुला।

तदुक्तं जैनकोषे–

जी ए बारहमत्ता पदुमे तइए अदोसमा आआ।

सा प छावि उल्मलउण उणाहि अपा असंजुत्तेति।

उदा0–

वटुल पिंगलं लहुण अणोक सणोएणोतारिसंगठिई।।

वाआण्महुराइपि ऊहोज्ञपि ऊ तह विलोए।।

---

1 मूले 'सतिः'।

2 यथा यथा उत्सिक्तानि दलानि मुञ्चन्ति परिणाल्यानि।/
उत्सेक बालिकाऽपि मूञ्चन्ति तथा तथा निजाङ्गामि।।

3 जीस वादसमत्तो तइओ पदो समा पाआ।
सापत्था विउला उण उणाहि अआ असंजुत्ता।
(नन्दिताठ्य गाहालक्खण,पृ. 5 श्लोक 18)
संस्कृतानुवाद- यस्याः द्वादशमात्राः प्रथमस्तृतीयः समौ पादौ।/
सा गाथा पथ्या विपुला पुनः ऊनाधिक पाद संयुक्ता।।

प्रथमेऽर्द्धे शेषे वा द्वितये वोऽनुज्झितगण त्रितयम्[1]। मुखजघनसर्वपूर्वा तेयं विपुला त्रिधा भवति।

चपला द्वितीय चतुर्थोग्मध्ये जौ।।4–24।।

द्वितीयचतुर्थौ जगणौ गुरुमध्यत्थौ यत्र सा चपले त्यधि क्रियते। तेन प्रथमोऽन्त्यगुरुस्तुतीयोद्धिगुरुः पञ्चम आदिगुरुः।

पूर्वेमुखपूर्वा।।4–25।।

पूर्वार्द्धे चपला लक्षणे मुख चपला नाम।

उदा0–

पिक्केणवंति उच्छंवुच्छमाणस्स सामिणोसहसा।

उच्चुच्छेरुअ गोवी अपिक्कमेणं क्खु रावेह।।

जषनपूर्वेतरत्र।।4–26।।

शेषार्द्धे चपलालक्षणे जघनशब्दपूर्वा चपला नाम।

उदा0–

णिअजंगणम्मिकूअंदहि अअन्ताइ ऊलणिज्जन्तम्।

दीहं पउत्थ जाआ चिरेण जुं चि अणीसासं।।

उभ्योर्महा[2] चपला।।4–27।।

उभयोरर्द्धयोश्चपला लक्षणे महाचपला नाम।

उदा0–

अत्रागआ धुआए (ब्व) घरम्मिपंथ अपलाइ आवेडी।

कठिणाणि अन्तरखा कुणेज्ज को तुज्ज संरखम्।।

इत्यूर्याधिकारः।

आद्यर्द्धसमागीतिः।।4–28।।

आद्यार्द्धस्य[1] गणेत्याद्युक्तलक्षणमन्त्यार्द्धेऽपि चेत् तदागीतिर्नाम। प्रतियोगित्वादितरत्रेत्य (दु वृत्तेर्वा) (?)[2]।

---

1 मूले 'वोनुत्थितागण त्रितयम्' इति पाठः।

2 मूले 'उभयोमहोचपला' इति पाठः।

उदा0—

सन ह सासुहावअत्यो महलच्छी सोणु अंसिणे हो आ।

इह एत्थच्चिअहदृगा अत्रुणवरणाअरो णत्यि।।

अन्त्येनोपगीतिः।।4—29।।

अन्त्यार्द्धलक्षणपूर्वार्द्धेऽपि चेत्तदोपगीतिर्नाम।

उदा0—

जं जं आणे इब्बरे वेरं अहिहाइणं हलिओक।।

तं उग्धाडिअ दो से हालिअ जु अई विऊरेई।

उत्क्रमेणोद्गीतिः।।4—30।।

अर्द्धयोर्व्युत्क्रमेण उद्गीतिर्नाम।।

उदा0—

पुलि अविणिज घर कूपे निवडन्तो जमिऊ सुणहो।

णहु वारिऊ सुऊच्चिअ काहिओ अन्ताईभूमि आइब्ब।।

अर्द्धे वसुगण आर्य्यागीतिः।।4—31।।

पुनरर्द्धग्रहणं व्याप्त्यर्थम् प्रत्यर्द्धमष्टौचेद् गणास्तदाऽऽर्य्यागीतिर्नाम। शेषेऽपि षष्ठो जो ग्लौ वा गण वचनात्।

उक्तं च भरतेन—

"इतरार्धेऽपि षष्ठः स्याद् स विकल्पो भवेद्गण[3]।" इति

अत्र चाष्टमो[4] गणो गौ गन्तेति द्वि विकल्प एव।

गुरूणेकेनाधिकेन निधने युक्तमिति वचनात्।

उदा0—

किं पिअ कहेमि दुक्खं णिअ परसुक्सं वि पि अं अणं परिभोक्तुम्।।

---

1 मूले 'गण एति आद्युक्त' इति पाठः।

2 अथोऽस्पष्टः

3 भ.ना.शा. 15-172 मूले उत्तरार्धेऽपि षष्ठन्याद् इति पाठः।

4 'अष्टम्'इत्यस्यस्थाने षष्ठो गणश्चत् साधुः।

अब्बो[1] परधरादुक्खं अवि मंद रसं विभगा एह अडिंमो।

इति गीत्यधिकारः। केचिद् गीतिरप्यार्यामाहुः।।

यदाहुः–

पथ्या विपुला चपला मुखचपला जघनचपला च

गीत्युपगीत्युद्गीतय आयूर्यागीतिश्च नवधा आर्येति।।

एषां चात्र संख्यादिक्–

एके होक्ता पथ्या तिस्रो विपुलाश्चतस्र एताभिः।

द्वादश तिस्राचपला षोठ चेवं समुदिदष्टाः।।

आभिषोडशभेदाः प्रत्येकं गीतयश्च सहस्राणि।

मानं मान विदो जगुः[2]।

तत्प्रदर्शनं तु चतुःपञ्च चतुरादि पिण्डन (?) इत्युत्तरस्कन्धे वक्ष्यामः।

गीत्युपगीत्युद्गीत्यायूर्यागीति वर्ज्जमेकैकशोऽथ वक्ष्यामि, गुरूलघुमेदात्संज्ञा-सहितान् षड् विंशतिर्मेदान्–

यत्र लघवस्त्रयः स्यु गुरवः सप्ताष्टाविंशतिश्च सा लक्ष्मीः। हासादेकैक गुरोर्वृढेया[3] तेन द्वयो-र्द्वयोर्लघुनोः[4]। क्रमशः

कीर्तिः कान्तिर्दुर्ग्गा गौरी तरंगिणी तारा।

सिद्धिऋद्धिर्वृद्धिर्गान्धिवर्वी किन्नरी ज्योत्स्ना।।

माला वाला हंसी वीणा वाणी कुरङ्गिणी क्षौणी।

लीला ललिता रंभाब्राह्मणी मागधी मेधा।।

अनुपगीतिवत् त्रिलघुकानास्त्येव न वा

द्विलघुका काचिदिति। इति गण छन्दांसि।

अथमात्राछन्दांस्याह–

---

1 मूले पाठै 'अधो'

2 श्लोकः खण्डितः

3 मूले 'वुद्धय' इति पाठः।

4 मूलग्रन्थे 'तेन द्वयो र्द्वयो र्द्वयो' इति पाठः।

वेतालीयं द्विः स्वराः अयुक् पादे, युग् वसवोऽन्तेलगः।।4–32।।

ल इत्यनुर्क्तते। द्विरिति सुवा (पा?) निर्देशः, उभयसंबन्धार्थः, द्विःकृता इत्यर्थः। यत्र प्रथमे तृतीये च चतुर्दशमात्रा, द्वितीये चतुर्थे षोडश, तासु च प्रतिपादमन्त[1] (न्ते) रेफ लगास्तद्वैतालीयं नाम।

उदा0–

दशशिरस इमां पुरीं क्षणादपि, न दहामि[2] सुरोष वाडवेः।

विरहदहनभवितेर्महुर्जनकसुता यदि नेह वर्तते।।

गौप[3]छन्दसकम्। ।।4–33।।

(भूपसाभबाधात् केचित्तु ग्वोशन्त पठन्ति तेषां वा शब्दश्चात्व आगन्तु न्यायेन तत्रैव यदि प्रतिपाद मन्ते गुरुरधिकः तदौपच्छन्दलकं नाम[4]?

कुचकलशतटस्खलत्पराणा-

मुषलि भुजैः श्लथकङ्कणैर्वधूनाम्।।

अलसतरदृशां तमालपन्ति-

प्रचित शुभाः प्रिय नीविबन्ध्नानि।।

आपतलिका भगो[5]ग्। ।।4–34।।

आपातलिकेत्यस्थिरशीला[6] उच्यते।

उदा0–

स्वयमीशानो निजदेहे शेलसुतां तां विभ्रदजस्त्रम्।

वनिता नो विश्वसनीयता इति किल लोकान् शिक्षयतिस्म।।

शेषे परेणयुङ् न साकम्।।4–35।।

---

1 मूले प्रतिपादमन्तरेफलगाः' इति पाठः

2 मूले 'दहमि' इति।

3 मूलपाठै ग्वौ इति

4 भूयसा इत्यारभ्य नाम इत्येतत् पर्यन्तम् एवं लिपिकेन निर्दिष्टम् परं लिपिकस्य किं तात्पर्यमिति स्पष्टं में न प्रतिभाति।

5 'आपातलिका नाम' एतावदेव पाठोमूले।

6 मूले 'स्थिरशील' पाठः।

उक्त नियमेभ्योऽन्ये लः शेषः। अयुजि षुट् युजि चाष्टौ तत्र युग्मो लः परेण सह नेकी कार्यः। नोभाभ्योमेकोगुरूरिति यावत्। द्वितीयस्तुतीये नेत्यादि, अयुजांत्वनियमः।।

षड् चामित्रा युजि।।4–36

द्वितीयतुर्यर्ययोः पादयोः क्रमेण षट् ला अमिश्रा न कार्याः गुरुरेकोऽप्यवश्यं कार्यः।

पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः।।4–37।।

युज्मिश्रीभावः प्रति प्रसूयते, युक्पादे पूर्वश्चतुर्थो लः पञ्चमेन सह चेन् मिश्रते तदा प्राच्यवृत्तिर्नाम्।

उदा०–

अतिकुटिल तरेण वेधसा[1]

यापितैव जनकेन्द्र नन्दिनी।

गतभयमधुनाऽजरे त्वया

राम एष सहसैव भुज्यताम्।।

अयुक् तृतीयेनोदीच्यवृत्तिः।।4–38।।

अयुक् पादे तृतीयेन[2] लकारेण पूर्वो द्वितीयश्चेन्मिश्रते तदोदीच्यवृत्तिर्नाम।

उदा०–

तवैव चरितेन मे[3] यशः सुकृतमपि प्रचितं सुदुष्यरम्।

कदापि नहि यन्मनः पये किमपि मुधा ननीह लज्जसे।।

आभ्यां युगपत् प्रवृत्तकम्।।4–39।।

कालेन देशो वा लक्ष्यते। प्राच्यवृत्तयुदीच्यवृत्तिलक्षणाभ्यामेकं पद्यं प्रवृत्तकं नाम।

उदा०–

---

1 मूले 'वेषसा' पाठः

2 अयुक् पाद तृतीयलेनां पूर्वो' इतिमूले।

3 चरिते नमो यशः पाठः।

त्वयि व्रजति वत्स, काननं

त्वत् पितर्य्युपरते च जीवति।

जिगाय चरमान्तकं च सा

मा कृथाः सदय मानुचिन्तनम्।।

अयुक् चारुहासिनी।।4–40।।

चत्वारोऽपि पादा द्विस्वरत्वादयुक्पादलक्षण युक्ताश्चेत् तदा चारूहासिनी नामा युगपदयुगिति संबन्धात्।

उदा०–

कर कमले प्रगृह्य वीरे जनकपतिसुतातिवाष्पनेत्रा।

नहि विभूषित राविभर्त्तु[1] मुच्चैरवनव वदना चिरायतस्थो।।

युगपरान्तिका।।4–41।।

चत्वारोऽपि युक्पादलक्षणयुक्ताश्चेत्तदा अपरान्तिका नाम।

उदा०–

विरहहुताशमहोल्वणेवपिदाहे,

जनकमहीन्द्रंसुता रघूद्ह्यच।

अहह परस्पर जीवनेकमात्र

ग्रहिलतया कथमप्यसृन विभर्त्ति[2]।।

सूत्रमिदमावर्त्तनीयम्–अयुक् तृतीयेनेतिवानुवर्त्तनीयम्। तेनायमर्थः–अयुक् युक् द्वे तृतीयेन सह मिश्रितपूर्वः स्यात्तदा।

अपरा अन्या अन्तिका भवति[3]।

---

1 राविभर्त्तुः अथोऽस्पष्टः।

2 यस्य चत्वारोऽपि पादायुग्लक्षणयुक्ताश्चेत्तदा अपरान्तिका नाम वैतालीयं भवति सर्वत्र छन्दोग्रन्थेषु अत्र उदाहरणे चतुर्षु पादेषु षोडशाक्षराणिसन्ति। किन्त्वत्र अयुक् पादे अष्टादशाक्षराणि युक् पादे च षोडशाक्षराणि सन्ति, उदाहरणमसंगतम्।

3 अयुक् इत्यारभ्य भवति पर्यन्तं वाक्यं किञ्चिदसंगतमिवप्रतिभाति। अत्र एवं भवितुमर्हतिअयुक् पादे द्वितीयो लकारः तृतीयेन सह मिश्रितः स्यात् तदा अन्या अपरान्तिका भवति।

उक्तं च रत्नाकरे–

तृतीय युग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः[1]।

उदा0–

जनन्यमलवंश संभवेन

न मेस्ति कथमपि चे तसो व्यथा।

स्थिरं पुनरिदं व्यथोत्तमं

व्यलोकि नो भरतस्य यन्मुखम्।।

तदेवं सप्तविंशतिर्वैतालीय प्रमेदाः। तथाहि-शुद्धास्त्रयः, प्राच्यवृत्तया-दयोप्येकेकशस्त्रयः। चारुहासिन्यपि तथ शुद्धाः स्यु तिसस्त्र एव हि।

उदीच्यवृत्तिर्नाम्ना तु तिस्त्र एवं षडेकतः।

तथ परान्तिका षट्स्युस्तिस्त्रः स्यु दक्षिणान्तिका[2]।

इतिवैतालीयाधिकारः।

गन्ता द्विर्वसवोमात्रासमकं ल् नवम्:।।4–42।।

यत्र पादे षोडशमात्रा भवन्ति[3] नवमो च लघुरन्ते गुरुरित्थं चतुर्भिर्पादैर्मात्रासमकं नाम। अत्राधिकारे "शेषे परेणयुङ्न साकम् इत्यनुवर्त्तयन्ति तदप्रमाणकम् रत्नाकरे च "तदयुगत्याद्वानवासिकास्यात्"[4]। इत्यत्र ला इति दशमे-कादशमिश्रभावो दृश्यते।

उदा0–

दह दह मामपि परिहर दयितं

जनमिममिति बल परिरंभणतः।

एक विलग्नः कुरुते दहनः

पुरमिथुनानां शमनातिथिताम्।।

---

1 वृ.रं0अ. 21 श्लोक 15

2 अयं श्लोको हलायुध वृत्तितोऽधिकः।

3 मूले षोडषमात्रास्तास्तुवच नियमो इति अस्पष्टार्थकः पाठः।

4 वृ. रे. 2-67

द्वादशश्च वानवासिका[1]।।4–43।।

द्वादशो नवमश्च चेल्लघुस्तदा वानसिका।

उदा0–

यस्मान्मनसो भवति तदेव-

प्रहरति सततं विषम शरोधैः।

हत मकरध्वज सुकुलकलङ्क-[2]

प्रहरसि मामिति किमिह विचित्रम्।।

विश्लोक (:) पञ्चमाष्टमौ।।4–44।।

पञ्चमाष्टमौ चेत्तदा विश्लोको नाम।

उदा0–

नाये स्वयिसुभगाति विदूरे प्राणेस्फुटमबलायास्तस्याः।

मलयानिलेन सह गोत्रेण प्रस्थास्यत इति सुनियतमेव[3] हि।।

चित्रा नवमश्च।।4–45।।

नवमः पञ्चमोऽष्टमश्च लघुश्चेच्चित्रा नाम।।

उदा0–

मैथिलसुताविरहजज्वलनं स्फुरतार्च्चिषेव भवतः परितः।

न परेतराट्स्पृशति मां नियतं विरमक्षणं कुरुकृपांकृपणे।।

परयुक्तेनोपचित्रा।।4–46।।

चानुकृष्टत्वात्पञ्चमाष्टमो निवृत्तो। अर्थाद्विभक्ति परिणामः।

परेणदशमेन सह मिश्रिते नवमेनोपचित्रा नाम।।

उदा0–रतिमन्दिरमयिकाञ्चनरुचिरं, सोत्पलदलमभितोऽर्द्धवशशांकम्।।

प्रेयांस्तेध्वजलाछित (?) मकरोत्सविते नाद्य न पश्यसिकिमु माम्।।

---

1 मूले 'बाणवासिका' किन्तुअन्यत्र 'वनवासिका' इति।

2 'मूलपाठे' 'कृलङ्क' इत्यनेन त्रयोदशमात्राणि एव भवन्ति। तस्मात् संयोजितः पाठः।

3 मूले 'नियतमेव' अत्र एकमात्राहानि रासीत्।

द्वितीयचतुर्थयोर्नन्देरी[1]।।4–47।।

द्वितीये चतुर्थे च परेण मिश्रिते नन्देरी नाम।।

उदा०–

भवत्याःसुतनोः कुचकुंभयो, रूपेतुं तुलना सुकठोरयोः।

शरीरं गुरूबिल्बफलान्यहो त्यजन्तिद्रुमाद्गिरिपृष्ठतटे।।

प्रथमचतुर्थयोरिति कैचित्पठन्ति। केचिदिदं सूत्रं न पठन्ति।

एभिः पादाकुलकम्।।4–48।।

एभिरितिषट्संग्रहार्थम्। षडिभरमियमेनचेच्चत्वारः पादाः स्युः पादाकुलकम् नाम।।

उदा०–

झंझामारुलवारिप्रवाह[2] मिहिरकिरण तुहिन[3] चयमभिसह्य।

उपकुर्वते निरुपधीह परांस्तरवो न तेषु विधिनास्मि कृतः।।

उपचित्रानन्देशीयोगेषूहयम्।[4] पादाभ्यां पादैर्बाहुलमिति योगादेकस्यैकस्त्रयोन्यस्य, त्रयस्त्रयाणामेकोन्यस्येत्याद्यनियमः अतएव नरसिंहपुराणेऽपि–

नखमुखविलिखितदितिनयोरुः परिपतदसृगरुणीकृत गात्रः।

हिमधरगिरिरिवगैरिकयुकतो नहरिरहरहखतु स युष्मानिति।।

अत्र प्रथमे द्वितीयादि मिश्रणे पञ्चभेदाः। द्वितीये तृतीयादि मिश्रणे चत्वारः। तृतीये चतुरादिमिश्रणे त्रयः। चतुर्थे पञ्चमादि मिश्रषे द्वो षष्टपज्चमाभ्यामेक इति द्विसंभेदे पञ्चदश चेते प्रत्येकमुपयान्ति दिशा चतुर्दशेति दशाधिकाद् विंसति (:) (?) प्रथम द्वितीयो ध्रुवीकृत्य तृतीयादिभिचत्वारः, प्रथम तृतीयो ध्रुवीकृत्य चतुर्थादिना त्रयः, प्रथम चतुर्थै ध्रुवीकृत्य पञ्चमादिना द्वौ, प्रथम पञ्चमषष्ठेरेकः, द्वितीयतृतीयौ ध्रुवीकृत्य पञ्चमादिना द्वौ, द्वितीयपज्चम षष्ठैरेकः। तृतीय चतुर्थौ

---

1 इदं सूत्रं अन्यत्र छन्दश्शास्त्रीयग्रन्थेषु नोपलब्धम्।

2 'जलधारा' मूले पाठः अनेक षोडशमात्रा न भवति।

3 मूले 'हिम' अत्रापि एकमात्रा न्यूनमासीत्।

4 मूले 'उपयाति' इति।

ध्रुवीकृत्यपञ्चमादिना द्वौ, तृतीय पञ्चम षष्ठैरेकः। चतुर्थादिभिचैक इति त्रिसंभेदे विंशतिः। विंशतावपि प्रथमस्यादि पादद्वये त्रयः द्वितीयस्य षट्। एतत्प्रदर्शनप्रकारस्त्वेवम् तृतीयं षट्स्थाने विलिख्य परतः स्थानयोः–स्थानयोः प्रथमादि त्रयं प्रत्येकं लिखेत् मध्ये च शिष्टं द्वयं द्वयं क्रमो क्रमाद्यः[1] यथा पूर्व स्थान षट्के विश्लोकशब्दं विलिख्य परतः स्थानयो र्विश्लोकशब्दं, स्थानयोवनवासिका शब्दं, स्थानयोर्मात्रासमक शब्दं, प्रथम द्विकमध्ये मात्रासमकवानवासिकाशब्दौक्रमो (प) क्रमाभ्यां द्वितीय द्विकमध्ये मात्रासमकविश्लोकशब्दौ तृतीय द्विकमध्ये वानवासिका विश्लोक शब्दाविति। एवमन्यमापि तदेवं प्रत्येकं द्वादशतदेवं त्रिसंमेदे-असीत्यधिका चतुः शती। प्रथमादिकं त्रिकं ध्रुवीकृत्य चतुर्थादिना त्रयः, प्रथमद्वितीय चतुर्थान् ध्रुवीकृत्य पञ्चमादिना द्वौ, प्रथम द्वितीयपञ्चम षष्ठेरेकः, प्रथम तृतीय चतुर्थान् ध्रुवीकृत्य पञ्चमादिना द्वौ, प्रथम चतुर्थादिभिरेकः, प्रथम तृतीयमञ्चम षष्ठै रेकः, द्वितीयादि त्रिकं ध्रुवीकृत्य पञ्चमादिना द्वौ, द्वितीय तृतीयपज्चम षष्ठेरैकः, द्वितीय चतुर्थादिभिरेकः द्वितीयादिभिरेकः एवं चतुः संभेदे पज्चदश तत्र प्रथमस्यादि पादे[2] द्वे षट् द्वितीयादेरप्येवं षट् षडिति प्रत्येकं चतुर्विंशति रितिषष्ठ्यधिकं शतत्रयं चतुः संभेदे तदयं संग्रहः।

दिङ्नेत्रेखाष्ट-वेदाश्चवियद्रसहुताशनाः।

द्या[3] (द्वया?) दियोगेक्रमाच्छब्देखडिभः तर्केषुखेन्दवः [4]।।

इति मात्रा समकाधिकारः।।

गीत्यार्या[5] लाः।।4–49।।

द्विर्वसवइत्यनुवर्त्तते। पुनर्लग्रहणं द्वि-मात्रिकनिवृत्यर्थम्। प्रतिपादं यत्र षोड (श) लधवः स (सा) गीत्यार्या नाम। अष्टित्वेपिचास्य संज्ञार्थमुत्तराथं वचनम्।

उदा0–

---

1 'क्रमाद्या' इति मूले।

2 मूले 'पाद' इति।

3 मूले 'धादियोगे' इति पाठः।

4 एवं संग्रहः लहायुधवृत्तौप्रायेण सुलभछन्दः शास्त्रीय ग्रन्थेषु वा नास्ति।

5 छ.वृ.ह. टीकायां 'गीत्यार्या लः' इति।

शिवमपि शिव जनयसि जनधृत पद,

भवमपि भव विदहसि हतभयगद।

मुनिरपि पुरहरपुरमपि (वि)[1] तरसि,

पशुपतिरपि जनदनडुहि विचरसि।।

अचलधृतिः क्वचित्।

शिखा विपर्य्यस्तार्द्धा।।4–50।।

लधोर्विपर्य्यासोगुरुः प्रतियोगित्वा[2] (त्?) सेव लध्व[3] (धी) सर्वगुर्व्वधांचेति शिखा नाम। सामान्य संज्ञेयम्।। विशेषसंज्ञे आह।

लः पूर्वश्चेज्ज्योतिः।।4–51।।

पूर्वः खण्डो लघुश्चेज्ज्योतिर्नाम।।

उदा0–

अपि गुणविरहित विसरसि गुणगण,

मपिमृडइदमपि जगदभिविदहसि।

ईशोप्यस्थ्नोधत्से मालां,

व्यालान् कृशित्तं भस्मालेपी।।

गश्चेत् सौम्या।।4–52।।

पूर्वश्चेद्गुरुः सोम्या नाम। उक्तं विपर्य्ययेणोदाहरणम्।

ज्योतिः सोम्ये[4]।।4–53।।

अनङ्ग क्रीडेति जयदेवः[5]। इति गीत्यार्य्याधिकारः।।

चूलिकार्द्धमेकानुत्रिंशदेकत्रिंशदन्ते म्[1]।।4–54।।

---

1 मूले 'धितरति' इति।

2 मूले 'प्रतियोगित्वा' इति।

3 मूले 'लध्वर्थ'

4 इदंसूत्रं छन्दश्शास्त्रादधिकम्।

5 द्विध्नान्यष्टौ दीर्घाण्यर्थे यस्याः सोक्तानङ्गक्रीडा। शक्लमपरमपि शकलमपरमपि सलिलनिधिगुणितवसु लधुकसुपरिघटितपदविसृति। (ज.छ.अ. 4, श्लो. 30)

एकानुत्रिंशच्छब्दएकोनत्रिंशदर्थः। एकस्य चा दुडुगित्या दुगागमः (?)। पविक एव क्रमः[2] (?) यत्र प्रथमार्द्धमेकोत्रिंशन्मात्रा द्वितीयं चेकत्रिंशत् तासु चोभयत्रान्तेगुरुः। स्वरूपेण तत् (चूलिका नाम।।अन्तेगिति वचना (द) ष्टानां लघुत्वमेव–लानुवृत्ते र्वा 'अर्द्धग्रहणादिह पादव्यवस्था नास्ति द्विपदी वा।

उदा०–

गगनशयनमुहु रजनि शिशिरकरः (र)

सुरतविपरिगलितकुसुमम्।

कलयसरसमयि वितर विविध-

सुरतकृशतरतनु कनकलतिके[3]।।

चूलिकेव पूर्वार्द्धवदुत्तरार्द्धे अतिरुचिरेति रत्नाकरः[4]।

वैषम्यात् कथमद्धं व्यभिचरत्यपि, अर्द्धंनपुंसकमिति नुपंसक ग्रहणादित्येके। तस्यसूत्रे लिङ्गस्यातंत्रतार्थत्वात्। अर्द्धद्वयात्मके एकार्द्धस्य समत्वात् लद्वयात्मकानां त्रयाणामेकपर्लैकखण्डवत् सूत्रपदानि यथोपयोगमावर्त्यानुवर्त्य च पूर्वमपरे छन्दसी बोध्ये। तथाहि–

द्विर्वसवो लधवोऽर्द्धं चैषामष्टो तत्र चान्तमात्रागः। तेन त्रयोविंशति र्लधवोऽन्ते च गुरुरिति चतुर्विंशतिः एवं प्रत्यर्द्ध चेदन्या चूलिकेयम्। यदुक्तुं त्रयोविंशतिर्लगुरुरु (र) ति[5] रुचिरेति।

उदा०–

उपगतदृढ़ विपदपिकमलमतिरसहत कयद (?) मते।

त्यजसि न मधुप तदुचितफलमिदमनुभव परियमनम्।।

---

1 मूले 'चूलिकार्द्धमेकान्नत्रिंशदेकेत्रिंशदन्तेम्। इति पाठः। 'चूलिकैकोनत्रिंशदेक त्रिंशदन्ते ग् इति छ. शा. 4-52)

2 'एकस्य' इत्यारभ्य 'एवक्रमः' पर्यन्तमस्पष्टार्थः।

3 अस्मिनुदाहरणे उत्तरार्धे एकत्रिंशदक्षराणि भवितव्यानि।
अत्र एकाक्षरं न्यूनम्। त्रिंशदक्षरण्येवसन्ति।

4 त्रिगुणनवलघुरवसितिगुरुरितिदलयुगकृततनु रति रूचिरा। (वृ. र० 2-42)

5 मूले 'रतिरुचिचिरेति इति पाठः।

अपि च। द्विर्वसव एव द्विश्चेत्प्रत्यर्द्धं मात्रा द्वात्रिंशदिति यावत्। तत्र च पूर्वोभः परो लः तदान्या चूलिका नाम। तदुक्तम्–पूर्वो द्विर्वसवो गापरे चतुर्नारङ्गक्रीडा।

उदा0–

निद्राया[1] यात्यन्यां (?) तस्मा,

द्रुध्याभृङ्ग पदिमन्येषा।

स्वपिति सुमुखमपि निशि निश सु[2] सरल,

मतिमतिकिमु सखि नहि परिकलयसि।।

पाद व्यवस्थायां सौम्येति भेदः।

इति चूलिकाधिकारः।

अध जातीनां लघुगुरु वर्णानां ज्ञानमाह–

साम्येन न समालांग्ल इति[3]। ।।4–55।।

येन यत्संख्येनाक्षरेण लां छन्दोमात्राणांयथा समुदिष्टानां समा समसंख्या ग्लो गुरुवो लघवो वा वर्णा न स्युः सा गुरु संख्याबोधव्या। अर्थादवशिष्टा लघुसंख्या बीजं चाह[4]। अपूर्णमात्राणां द्वयोर्द्धयोरेकौकमात्रानुप्रवेशद्धिमात्राश्च गुरुरिति। यथा–

अन्ता आणे इजलं तं उण धरसामिणि घ वासि।

---

1 मूले 'निद्राया' इतिपाठः।

2 सुशस्त्र' एवं मूले पाठः।

3 साम्येन न क्ष्ज्ञमासांग्ल इति सूत्रम्। (छ.शा.ह.टी. 4-53) मूले 'सउन्येन' इति। अस्य सूत्रस्य वृत्तिः ईलायुधवृत्तितो भिन्ना। अस्य सूत्रस्यायमभिप्रयः आर्यायां कति गुरवो लघवश्च वर्तन्ते इति पृष्टे सति पूर्वं तावदार्यां तां लिखित्वा तस्याः सर्वसां मात्राणां गणनां कृत्वा तन्मात्रासंख्याङाः कुत्रचन्संस्थाप्याःपुनस्तस्या एव आर्यायाः सर्वेषामक्षराणां गणनां कृत्वा तदक्षरलंश्चापिण्डीभूताङा मात्राङानांसम्मुखे संस्थाप्याः ततो मात्रा संख्याङ्कानपनयेत तत्र ये संख्याङ्का अवशिष्यन्ते तावत्संख्याङ्काः तस्यामायर्यायां गुरवो भवन्ति। पुनरक्षरसंख्याङ्कत एतद् वशिष्टगुरूलसंख्याङ्कानपनयेत् तत्र यावन्तोऽङ्का अवशिष्यन्ते तावन्तो लघवो जायन्ते। अनयैवरीत्या गणमात्राच्छन्दलां गुरूलघुज्ञानांभवति यथा - प्रकृते उदाहरणे - (मा. सं. 54) (अ. सं. 37) (गु. सं. 17) (अ. सं. 37) (गु. सं. 17) (लघु. सं. 20)

4 मूले 'स्वमुधिष्टानां' इति पाठः।

इं अमन्तं जान्ति जणा सामिणिमरकं घदु देसु।।[1]

पथ्यायां सप्तपज्चाशन्मात्राः शास्त्रोद्दिष्टाः पद्येचात्र षडिवंशति वर्ण इत्येक विंशत्या मात्रा (भिः) संख्या न पूर्यते।। अत इहैकविंशतिर्गुरवः पञ्चदश लघवः। तदेवं किन्तोऽत्र लघवो गुरवोवेति प्रश्ने-अक्षरसंख्या निर्णयपूर्वको निर्णयः प्रदर्शितः।। अथ कियन्तो वर्णा इति प्रश्ने गुरुसंख्या निर्णय पूर्वको निर्णयः प्रदर्शितः।। लां येन गोतसमाः साग्लः संख्याग्ल इति वर्णोपलक्षणं तादात्म्यात्-गित्येकवचनं स्वरूप प्रदर्शन मात्रार्थत्वात् वेदाः प्रमाणमितिवद्वा यथोदाहृत एव एकविंशतिर्गुरवः षटित्रंशतमात्रातो न्यूना इति षटित्रशद्वर्णाः।। अथगुरवः कियन्त इति प्रश्न लघुसंख्या निर्णय पूर्वको निर्णयः प्रदर्श्यते। लो लघवो येन लां न समाः सा गसंख्या गितिसंख्यासंख्येय योरभेदोपचारात्। लौ सइत्युक्तं तेनगिति द्विः प्राह[2], गद्वय लक्षणया वा गमात्राणां संख्येत्यर्थादायाति। तदर्द्धागुरव इति यद्वा द्विर्वचनात् सापद्यगतग द्विगुणगसंख्येत्युक्तम्। विचित्र वाग्भङ्गयो हिं वाग्मिनः। समासार्थत्वाच्च ययोदाहत्त एव पञ्चदश लघवो द्विचत्वारिंशता मात्रा न्यूनाः तदर्द्धमेकविंशतिर्गुरवः। उक्तं च रत्नाकरे–

''वृत्तस्य लाविना वर्णैर्गावर्णागुराभिस्तथा।

गुरवो लैर्दले नित्यं प्रमाणमितिनिश्चितम्[3]।।

इति जाति समाप्तौ मुक्तप्रकारार्थो वा।।

इति श्रीभट्टाचार्य्य श्री महादेवकृतौकविदयितायां पेंगलवृत्तौ चतुर्थौऽध्यायः।।

---

1 'बीजं चादः' इतिमूले पाठः।

2 मूले 'प्रागद्वयवय' लक्षणया इति पाठः।

3 वृत्तः र. अ. 2-38

पञ्चमोऽध्यायः

वृत्तम्।।5–1।।

अधिकारोऽयम्।

सममर्धलमं विषमं च।।5–2।।

अव्यवधानाच्चार्धसममित्येवानुवर्त्तते। यावदर्धसमं तत् तावतेव गुणितं विषमं पूर्वं पाठादकृतोनमेव राशिः। तत्किं सकलमेव? नेत्याह[1]।

राश्यूनम्[2]।।5–3।।

उभयमपि राशिनः ध्रुवाङ्केनोनं कर्तव्यम्।[3] यथा गायत्रे छन्दसि समवृत्त संख्या चतुः अष्टिरित्यष्टमे दर्शयिष्यते। सा चतुष्ट्यवैगुणिता षण्णवत्युत्तरं सहस्रचतुष्टयं भवति। इतो राशेः चतुष्षस्टेरपनयाद् द्वात्रिंशदधिकं सहस्र चतुष्टयं शिष्यते।

तेन–"गायत्र्यर्द्धसमा बाहुरामाकाशाब्धिर्भिमता। (अङकतः 4032)

तदेव षण्णवत्युत्तरं सहस्र चतुष्टयं स्तेनगुणितम्।

ऋतुवन्द्रभुजर्ष्यर्षिस्वरषटतुहिनांशवः।।

(अङ्कतः 16777216)

शतश्च राशिरुपनेयः तेन विषमाः। "खं भुजेन्द्रग्निमुनिस्वरषडिन्दवः'। एवमन्येषूहयम्[4]।

---

1 वृत्तिरियं 'सममर्ध' इत्यनेन सूत्रेण सह असंगताप्रतिभाति यतः अस्य सूत्रस्य वृत्तिः स्पष्टमेव, यस्य चत्वारः पादाः समाः तत् 'सम' वृत्तम्। यत्रार्धे समे यस्य तत् अर्धसमम्। सर्वाः पादाः विषमाः तत्र विषयम्।

2 इतः पूर्वं पिङ्गलच्छन्दः शास्त्रे सूत्रद्वयमधिकमस्ति- 1. समं तावत्कृत्वः कृतमर्धसमम् (5-3) 2. विषर्म च। (5-4) अनयोरुल्लेखोऽस्मिन् ग्रन्थे न कृतः किन्तु अनयोरेव वृत्ति उपर्युल्लिखितस्य 'सममर्धं' सूत्रस्य वृत्तौ सम्मिश्रितः।

3 अत्र 'ल यथा' इति पाठः 'ल' इत्यस्य औचित्यमत्र न प्रतिभाति।

4 'राश्यूनम्' सूत्रस्य स्पष्टार्थ : - समवृत्त संख्या चतुः षष्टिः तस्यां चतुः अष्टिसंख्यागुणितायामध्यासम वृत्तसंख्या संपद्यते चत्वारिसहस्राणि, अण्नवतिश्च

ग्लिति समानी।।5–4।।

सिंहावलोकेनेनाष्टुप् चत् क्रमेण गुरलधुभ्यां तदा समानी नाम।

उदा0–राधिका विलास सद्म योगिवंध पादपदुम्।

गोपवंश पद्म हंस कृष्ण पाहि नूनकंस।।

ल्गितिप्रमाणी।।5–5।।

लघुगुरुभ्यां चेत्समाप्येते तदा प्रमाणी नाम। इति समाप्तो।

उदा0–पयोवतारणोस्तमद्रुजैषड्डुदृतावले।

ब्रजाङ्गना पयोधरे दृगञ्चले दधौ हरिः।।

नाराचमिदं क्वचित्।

नगस्वरुपिणीति कालिदासः[1]।

वितानमन्यत्।।5–6।।

समानी प्रमाणीभ्यामन्यदष्टाक्षरं छन्दोवितानं नाम। यद्यपि तंत्रान्तरे समवृत्तप्रकरण एवैतानि पठ्यन्ते तथाप्येकपादेनाप्येतल्लक्षण विषमार्धसमयोरप्येताः संज्ञास्तु इतीह प्राक् पठितानि। कविकालसर्वज्ञस्तु वक्ष्यमाण वक्र (क्त्रं) लक्षणानाक्रान्तमष्टाक्षरं प्रस्तारविषमचतुः पादं वितानाह्वयं वक्र (क्त्रं) मन्यते। अत्रापि, विशिषन्ति–

पञ्चमं लघुसर्वत्र सप्तमं द्विचतुर्थयोः।

गुरुषष्ठं तु पादानां शेषेऽथ नियमोमतः।।

प्रयोगे प्रायिकं प्राहुः केप्येतद्वक्त्र लक्षणम्।

लोकेनुष्टुबितिख्यातं तस्या,टाक्षरता मताद्य। इति

वृत्तानि। (यथा 64X64= 4096) / अधसमसंख्या अर्धसमसंख्यया एव गुणिता विषमवृत्तसंख्या संपद्यते यथा- 4096X4096= 16777216 वृत्तानि। तद् विषममर्धसमं वा वृत्तं राश्यूनं कर्तव्यम्। यथा मूलराशिः 4096 समुदायात् (16777216) सः अपनेतव्य इति। एवं कृते शुद्धविषमवृत्तस्य संख्या (16773120) भवति। एवमेव अर्धसम संख्या 4096 तः 64 उने कृते सति 4032 इति शुद्धार्थसमसंख्या भवति। उभयशेषोऽयं राश्यूनमिति।

1 द्विसूर्यषष्ठमष्टमं गुराप्रयोजितं यदा।/
तदा निवेदयन्ति तां बुध नगस्वरूपिणीम्। (बु.वी. 13)

कालिदासास्तु–

श्लोकेषष्ठं गुरूज्ञेयं सर्वत्र लघुपञ्चमन्।

द्विः चतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोरिति[1]।।

क्वचिदेतद्गाथापीति वक्ष्यते।।

आर्हातास्तु विशेष नामाङ्कित समवृत्तं वितानमाहुः।

पादस्यानुष्टुब्वक्त्रम्।[2]।।5–7।।

पादस्यानुष्टुब्वक्त्रां पादेति ज्ञानादनुष्टुवित्युद्गताया वक्त्रमिति चतुरुर्द्धवा-त्रागधिक्रियते, उपजीव्यत्वात्। समादिक्रमेणोद्देशेपि सूचीकटाहन्यायात् परिमाणपरिशानविषमस्याऽऽनन्तर्य्याच्च विषमादि क्रमेण विशेषलक्षणारंभः। वक्त्रेषु प्रस्तारविषमा एव चत्वारः पादाः कार्य्याः।

न प्रथमात्स्नो।।5–8।।

वक्त्रेषु पादस्य प्रथमाद्वर्णात् सगणो नगणो वा न कार्यः।

वान्यत्[3]।।5–9।।

मगणादन्यदेव कार्यं वा नास्थाय (म्?) सुखार्थमेवेदम्।

य चतुर्थात्।।5–10।।

पादस्य चतुर्थाद्वर्णात् परमादि लघुर्गणइत्युत्सर्गः।

उदा0–

लोकोत्तरं विधातस्त्व मकृथा निखिलंमेधिक्।

विरामे राज्य एतस्मिन्, जीवनं न विरामंयत्[4]।

पथ्यायुजो ज्।।5–11।।

द्वितीयचतुर्थयोश्चतुर्थात्परं गुरुमध्यो गणश्चेत् पथ्या नाम शेत्रयोर्य एव।।

---

1 "मूले नामानं कितं" इति पाठः

2 इदं सूत्रं मूले सूत्ररूपेण नास्ति अपितु पादस्यानुष्टु वक्रांपादेति इतिवृत्तिरूपेणैव

3 मूले 'वान्यात् इति। इतः पूर्वं छन्दः शास्त्रे 'द्वितीयचतुर्थयोरश्च' सूत्रमिदमधिकं परमत्र इदं सूत्रं नोद्धृतम्।

4 मूले विरामयत् इत्यत्र यगणस्य हानिरतः विरामं यत् इत्यनेने यगणसिद्धिः।

उदा०–

याति रामेवनेप्रोज्छत् प्रीता नेत्रजलानियत्।

तेनेव[1] केकयोद्‌भूता मातृ सामान्यमागता[2]।।

विपरीतेकीयम्।।5–12।।

विपरीतेत्यावर्तनीयम्। पथ्येवोक्ता विपरीताचेद्‌भवति। प्रथमतृतीययोर्मध्यगुरुगण इति यावत् तदैकीयमते विपरीतपथ्या नाम्।

उक्तं च–अयुजोर्जोऽथ वारिधेस्तदेव विपरीतादि[3]।

उदा०–

कदाचिदप्यवस्थिति, र्मानिनां मानहानौ न।

काणादैः सह गौतमैर्निरणा[4]यि पुरापीदम्।।

चपलायुजो न्।।5–13।।

अयुज इति सुखार्थम्। प्रथमतृतीययोश्चतुर्थात्परं त्रिलघुर्गणश्चेत् चपला नाम।

उदा०–

तथा मुञ्चामितततं, विरहश्वसितं दूरात्।

सीताया मे दिशि यथा न गच्छेयुस्तडित्वन्तः।।

विपुला[5] युग्लः सप्तमः।।5–14।।

जगणं[6] षिना द्वितीयचतुर्थयोः सप्तमो लघुश्चेद्विपुलानाम त्सुमाविपुलेति क्वचित्।

---

1 'तेनैवै' पाठो मूले।

2 'सागता' इति।

3 अयुजोर्जेन वारिधे स्तदेव विपरीतादि। वृ. रं. 2-23

4 मूले 'निरनायि' इति पाठः।

5 छन्दःशास्त्रे 'युग्लः' मूले 'युक्ता' इति अयुक्तः पाठः।

6 हलायुध वृत्तावत्र जगणस्य तु प्रसङ्ग एव नास्ति अत्र तुं 'य चतुर्थात्' (पि. सू. 5-13) इत्यनेन सर्वत्र यकारेप्राप्ते, युक् पादे सप्तमो वर्णो लघुर्भवतीति 'य चतुर्धात्' इत्यस्यापवाः। अत्र 'जगणं' इति असंगतः।

उदा0–

महीयासमहं गन्ये, सर्ज्जकान्मूनं पालकम्।

याति[1] जातोदशामन्त्यां, न चेद् धात्री कृपावती।।

सर्वतः सैतवस्य।।5–15।।

सेतवस्था चायृर्यस्य मते सर्वेषु पादषु सप्तमोलघुश्चेद् विपुला नाम।

उदा0–

देहीष्टं[2] धेहि शिरसा तथापि न खलो निधः।

प्रामाणिकेश्चापि सखे दुःप्रापः खलङ्ष्यते।।

भ्रोन्तौ च।।5–16।।

चकारो विपुलासूत्रस्य चतुर्थादयुजहत्येतयोश्चानु कर्षणार्थोऽमुक्त (:) स मगण (:) समुच्चयार्थः। अतएव कलिकालसर्वज्ञो मकार विपुलामप्याह। अस्मातृतीय प्रथमयोत्चतुर्थात्परं भरनत सामान्यतमः सजातीयः, द्वितीय चतुर्थयोस्तु सप्तमो लघु स्तदा कार विपुले त्याहि नाम। तद्विपुलेति तद्ववचनात् कथं युग्ल इति नश्चहामात् (?) कथमयुज इति भवतां वचनात् नह्यन्यथा लघुर्भवति सप्तमः।

क्रमेणोदाहरणम्–

स्वीयेर्गुणैर्याति सतामादरो न तु पैत्तृकैः।

पश्य पद्मान् पङ्कभवान् शम्बूकांश्चसमुद्रजान्।।

आर्यासीतापादपद्मस्थिरच्छायानिराकुलम्।

जानीहि मां स्वगहे[3] तावेव हि वनेधरौ।।

राज्यलक्ष्म्यापि रहिता (त) स्त्वया चेतोवपुः[4] त्रिया।

श्रीरामजासमक्षुना रामः स्वतनुकेवलम्।।

---

1 मूले 'यातो' इति पाठः।

2 'देहीष्ठम्' इति मूले।

3 स्वगेहे इत्यस्य प्रयोगे रगणस्यापेक्षितास्य सिद्धिर्न स्यात् अतः एव गृहे इति संशोधनमुचितं प्रतिभाति।

4 मूले 'वपु श्रिया' इति पाठः।

राजहंसभृङ्[1]गेर्वरं कासारे भुञ्चविग्रहम्।
गर्त्तेबकैः पयूर्याकुले न र्ग (ग) न्तु मर्हसि।।
अपियोगात् कुजनैर्न स्वगुणं साधुरुज्झति।
श्री खण्डो हरति तापं भुजह्गेप्यड्गप्यड्गसङ्गिनि।।
हे शंख नानादेखेषु भ्रमयंस्त्वा गुणस्तव।
अभूत्सयत्नः स्वस्थाने शम्बूकाः सुखमासते।।

हेमसूरिस्तु–

ऊँज इति व्यक्ति जात्यात्रयणादेकस्मिन्नेवायुद्धपादे नगणावपि विपुलेत्याह।

यथा–

अनाकृष्टस्यविषयैर्विधानां पारदृश्वनः
तस्य धर्मरतेरासीद्वृद्धत्वं जरसाविना[2]।।इति

केचन सर्वत इत्यनुवर्त्त्य चतुर्षु पादेषु भादिगण मत्यत्वे तेषां पूर्व सूत्रं जगम एवावतिष्ठते। अन्ये तु विपुला सूत्रमधिकारार्थमेव व्याचक्षाणाः शुद्ध विपुलां पृथङ्नेच्छन्ति तन्न। पूर्वसूत्रासंगतिरसंगात्[3] सर्वासां विपुलानां चतुर्थोगुरुरेवेत्यप्रामाणिकम्।

रत्नाकरे च–

यख्यां लः सप्तमेयुग्मे, सायुग्म विपुला मता[4]। इति।

इति वक्राधिकारः।

प्रतिपादं चतुर्वृद्धयापदचतुरुर्द्धम्।।5–17।।

नासत्यवधौ वृद्धिरिति प्रथमपादेप्यनुष्टुबेव योगाच्च स चावधिप्रत्यासत्तेः स्वस्वानन्तर एवेति द्वितीये द्वादशाक्षरस्तृतीये षोडशाक्षरचतुर्थे विंशत्यक्षरश्चेत् पदचतुरूर्ध्वं नाम।

---

1 ‘भुड्गैर्वरं’ इति पाठः क्रियेत चेत् तगणस्य सिद्धिः स्यात्ं मूल पाठे ‘राजहंसशुकै वरं’ इति।

2 रघुवंशः सर्ग। श्लो. 23

3 मूले ‘असंगतिमसंगात्’ इतिपाठः।

4 वृ. र. 2-25

उक्तं च रत्नाकरे–

"मुखपादोऽष्टभिर्वर्णैः परे स्युर्मकरालयेः क्रमाद्वृद्धैः [1] इति। अत्र प्रथम पादो वक्त्रवत् द्वितीयाः। अधिकानि च आय्र्याक्षराणि च[2] बंधानि तृतीय चतुर्था-वाय्र्याद्धवत् कर्तव्यानीति सम्प्रदायः।

उदा०–

मनसेव त्वयि स्पृष्टे

तस्याः रश्वर जित्खलो[3] ददावग्निम्।

तत्त्वामेव पलाय्य द्रागा संशिश्रिये सुभग।

पक्त्रे (वक्त्रैः) र्दहति विदोस्वानसुन्यस्तत् परित्यज त्वरितम्।

गावन्त आपीठः। ।। 5-17।।

तेषु वर्णेष्वन्ते चेत्प्रतिपादं गुरुभवतस्तदा आपीडो नाम। विशेष वचनाच्छेषाणां लघुत्वमेव सम्प्रदायाच्च।

उदा०–

अयिकृशतनु[4] मुग्धे।

न गगनमिदमुडुशशिजुष्टम्।

अहि रूपगतवति पति[5] मरकतपीठम्।

सितमणिगण अचितमपि तु विशद तदुपधानम्।।

आदो चेरद्रत्प्रत्यापीडः। ।। 5-18।।

आदाविव चेद्गुरू भवतः, प्रत्यापीडेः। आदो चेत्यपि पठन्ति।

---

1 मूले 'वृद्ध' इति/ मुखपादोऽष्टभिर्वर्णैः/ परे स्यु र्मकरालयेः क्रमाद् वृद्धैः/ सततं यस्य विचित्रैः पादैः सम्पन्न सौन्दयम्। / तदुदितममलमतिभिः पदश्चतुरुर्ध्वामिर्धवृत्तम्। (वृ. रं. 5-17) वर्णविषमवृत्तानि।

2 'आर्य्याक्षराणिश्च' तत्र पाठः।

3 'बलो' मूले।

4 छन्दो लक्षणं साधु समन्वेति। किन्तु 'कृततनुमुग्धे' अत्र समासो नेष्टः।

5 व्याकरणदृष्ट्या 'पत्यो' इति साधु प्रतीयते, किन्त्वनेन छन्छोभङ्गता भविष्यति यतः पदमध्ये गुरूर्नेष्टः।

उदा0–

मुग्धे समुचितमिद,

मंभोरूहं कुलमकृतयदपि।

वक्त्रेण तब जितमचिरादधिजलमिद

मेवानुचितममल विधुमुरिव लवमपि भवति यत्ः।।

प्रत्यापीनो गारादौ[1] च। ।। 5-19।।

आदौ गुरू अन्ते च गुरू चेत् भवतः प्रत्यापीनो नाम।

उदा0–

मा (भा) तिज्वल भुवि लग्नो

हन्त प्रियतम वपुषि कृशानुः।

काश्चिसुवयत इति नियमित तनुरावाः

तासां[2] खमणितनयसदनमनुपुरनगर दाहे।।

प्रथमस्य विपर्यययाये मञ्जरीलबल्यमृतधाराः[3] ।। 5-20।।

प्रथमस्येत्यावर्तनीयम्। अनन्तरस्य च प्रत्यापीडस्य प्रथम आपीड एव तस्य यः प्रथमः पादस्तस्य विपय्र्यासे स्वस्थानं व्यकत्वा[4] द्वितीयादि चरणानामधोऽधः पतति। यथासंख्यं मञ्जर्याद्यास्तिस्त्रः संज्ञाः। पूर्वावस्था परित्यागोऽपि विपर्यय उच्यते। यथमति विपर्ययः। नन्दिह रीवर्तो (विपरिवर्तितो) ऽर्थः प्रतियोग्यनभिधात्।

उक्तं च रत्नाकरे–

प्रथममितर चरण समुर्त्थं

यदि च भवति लक्ष्म।

इतरदितर गदितमपि[5] यदि च तुर्यम्[1]

---

1 अन्यत्र सर्वत्र प्रत्यापीडो गावादौ च।

2 मूले 'रावातायाः'

3 ह. टी. तोऽत्र किञ्चित् वैशिष्टयम्।रत्नाकरातृ पूर्णरूपेण प्रभावितावृत्ति एव।

4 'त्यक्ता' मूले पाठः।

5 मूले 'गदित' इति।

चरणयुगलकमविकृत मपरमिति कलिका[2] सा।।

द्विगुरुयुत सकल चरणान्ता।

मुख चरणगत[3]मनुभवति च तृतीयाः।।

अपर मिह हि लक्ष्म

प्रकृतमखिलमपि यदिदमनुभवति लवलीला।।

प्रथममधिवसति यदि तुर्यम्-

चरम[4]चरणादमवसित गुरूयुग्मय्

निखिलमपरमुपरिगत मिति ललितपदयुक्तां तदिदभमृतधारा[5]।

क्रमेणोदाहरणानि–

(मञ्जरी) अपि कुचकलशयुगलभारा -

न (त) ननु जलवायः

कनकनिकष[6] सरसरूचिरतनुशंघा

युवतिनिवहत[7] इव परिसरति दिशिदिशिपाण्डुः।।

लवली–

कृशतनु कुवलयदल नेत्रे

व्यथिततरविरहिनिकर (विषम)[8] शापेः।

---

1 'यदि च लक्षम्' इति मूले असंगतः पाठः।

2 मञ्जर्येव वृत्तरत्नाकरे कलिका इति नाम्ना उक्ता।

3 'चरणरिचित्त' इति मूले।

4 मूले 'प्रतिचरणमवसित गुरूयुग्मम्' अत्र षोडशाक्षराणि भवितव्यानि किन्तु त्रयोदशाक्षराण्येव सन्ति।

5 मूले यत्र कुत्रापि खण्डितो न्यूनाक्षराणि च सन्ति तत्र सर्वत्र वृत्तरत्नाकरात् संशोधितः पाठः। (वृ.रं. 5-175 वर्णविषमवृत्त)

6 'निकस' पाठः।

7 मूले 'विवहत' इति।

8 षोडशाक्षराणि भवितव्यानि किन्तु त्रयोदशाक्षराण्येव सन्ति पादपूर्त्तये 'विषम' इति वर्द्धितः।

शरदि जलद गोत्र

बत विगलित सकल विभवमखिलमगमदस्तम्।।

(अमृतधारा)–

अहनि जनपुर उरूनलिन्या

रमति मधुकमनुभजति निशि निद्राम्।

इति मिलितमधुकर मभिहसितमयिसखि मुग्धे

प्रकलय कुमुदिन्या।।

इति पद चतुर्ल्ध्र्वप्रकरणम्।।

उद्गतामेकतः सौ स्लौ, न्सौ[1] ज्गो, भ्नौ जलौ गः, स्त्रौस्त्रौग्[2]।। 5-21।।

प्रथमे स ज स ले र्दशाक्षराणि। द्वितीये न स ज गैर्दशैव। तृतीये म न ज ल गै- रेकादश। चतुर्थे स ज स ज गैस्त्रयोदश चेदुद्गता नाम विद्धि। एकल इति प्रथमेर्दे प्रथमपादस्य द्वितीयेनाविलम्बोच्चारणार्यम्।

सिंहावलोकनेनाद्यग्रहणानुवृत्तेः।

उदा0– अथ कूलभूतलमुपेत्य रुचिरवदनोमहोदधित्।

चापनिहित तनुवागमभरं निमने दृशेव रघुवंशकेशरी।

तृतीयस्य सोरभकं रनौभ्गौ[3]। ।। 5-22।।

तत्रैव तृतीयापादस्यस्थाने, (र) नभगैर्दशाक्षराणि चेत् सारभकं नाम। एकत इत्यनुवर्तते, पृथगिति वक्ष्यनाणात्।

उदा0– रुचिकारि कासि उगतोति, सरसमधुयष्टिरुत्तमा।

पञ्चबाणभिणाः सुतनो सुभगेशुभा च गुरुदाह शामिका।

ललितं नौ सौ। ।। 5-23।।

---

1 वृत्तिस्तु हलायुधटीकानुसारिण्येव किन्तु सूत्रे क्वचिद् भिन्नता अस्ति।
यथा 'न्सौ' इति स्थाने त्सौ।

2 मूले 'रूजौ' इत्यत्ते।

3 मूले 'नौन्लौ' इति पाठः। अयं पाठो वृत्यापि उदाहरणेनापि चासंगतः।
छन्दः शस्त्रानुसारं संशोधितः।

ननससैर्द्वादश चैत् तृतीयस्थाने तदा ललितं नाम।

उदा0–

अथ वीक्ष्य वानर बलानि, विविध विकृतानि। विश्वतः।

पवनतनयमवकंधरक,ङ्कलयां ज्चकारतरणीन्द्रकेशरी।।

इत्युद्गताधिकारः।

उपस्थितप्रचुपितं पृथगाद्यमलौ उभौ गौ, लोज्रौ ग,

नोस्, नौ न ज्यो[1]।।। 5-24।।

प्रथमे मसजभगगेरचतुर्दश। द्वितीये सनजरेर्गस्त्रयोद्वश। तृतीये ननसैर्नव। ननौ[2] सः इति रसाकरादिदर्शनात्[3]। चतुर्थे नत्रयजयैः। उपस्थित प्रयुपितं नाम पृथगाद्यमित्येकत हत्यस्य बाधार्थम्।

उदा0–

अव्याद्वो हिमरोलजाननाम्बुजपायी

भ्रमरः सितकरबालरोखरोऽसो[4]।

गरल[5] कवल चतुरो

विहित चितनु विच्चारः प्रमयेशः।।

वर्द्धमानं नौसोन्सौ[6]। ।। 5-25।।

तृतीय स्येतिमण्डूकप्लुत्यानुवर्तते। तत्रैव तृतीयस्यस्थाने ननसननसैरष्टादश चेद्धर्धमानं नाम।

उदा0–

शंभो त्वं बत चानु[1]गोप्य लौकिकचेष्टाम्[2]।

---

1 मूले-म्लौ जभौ गौस्ने ज्रो गो स्नो नो ज्यो, इति सूत्रमशुद्धम् ग्रन्थस्य वृत्यानुसारेणापि 'सूत्रमशुद्धम्। सूत्रमिदं छन्दः शास्त्रात् वृत्तरत्नाकराच्च संशोधितम्।

2 मूले 'मग्नौसः' इतिपाठः।

3 'त्रितयं स नजरगास्तथ नगौ सः (वृ. रं. 5-181) विषमवर्णवृत्त।

4 शेखरः मूले गुर्वक्षरमेकं न्यूनम्।।

5 मूले 'गवल' इति पाठः।

6 मूले 'त्सौ' इति पाठः।

व्यथिता तनुरतनोद्वियाति (?) दूत्यम्।
अति चिरम अह समर्प्य सुनिपुणमिव नु ताम्[3]।।
परिरमति निरवधि समुचित तरुण्या।।
शुद्धविराड्षमं त्रः।।। 5-26।।

तृतीय एव तजरैर्मव चेच्छुद्धविराङषमं नाम।

उदा0–

स्नेहं शीतलतां निषां नमुञ्चति लोको
विमलो विधिवशतोऽपि यंत्रितः सन्।
दृष्टान्तमितो विपरिचतः
परिकलयत हिमकरकादिमनेकम्।।
इतिप्रचुपिताधिकारः।।

"एवं विषमवृत्तान्युकत्वाऽर्द्धसमानिवक्तुमुपक्रमते।

अर्द्धे। ।। 5-27।।

अधिकारोऽयमध्यायान्तात्।

उपचित्रकं सौ स्लौभगौभगो ग। ।। 5-28।।

अर्द्ध इति व्यक्तिपरत्वात् प्रत्यर्द्ध सत्रयलगैरेकादशप्रथमः पादः।
भत्रयगगैरेकादशद्वितीयारचेदुपचित्रकं नाम।।

उदा0–

शिरसे (?) रविमिद्य महीतला
दक्षतमेवगिरी नृपनेतुम्।
विविशुः कषायः कतिचिन्महीं
गर्तपयेन हठादवलिते[1]।

---

1 'वानुगोप्य' इति।

2 'चेष्टा' इति पाठः

3 तृतीय चरणे 'शुनि कुणा च ताम्' इति पाठः। अस्मिन् पादे न्यूनाक्षरता छन्दोभङ्गतजा अस्पष्टार्थतादि दोषा वर्तन्ते।

(रिति वा नवकानाम्[2])?

द्रुत[3]मध्या भौ भगो ग्, न्जो ज्यो।। ।। 5-29।।

उदा0–

जातुवधूरपहाय मनोभूरपि निशि भीत हवापससार।।

वेगवती सौसगौ, भौ भ्गो ग्[4]। ।। 5-30।।

त्रिभिः से गेंन च दश, भत्रय गगेरैकादश वेगवती।

उदा0–

कपयः कृमुखाः प्रवितेनु-

र्वामभुजेन तथा कटिकंजूः (?)।

भयवेगवतीरपिमेजे।

हन्त यथाहसितंरिपुनारीः।।

भद्रविराट् त्जौर्गोम्सौ ज्गोग्[5] ।। 5-31।।

तजरमैर्दश, मसजगगैरेकादश भद्रविराङ्।

उदा0–

ऋक्षाधिपतौ सरोजगर्वं।

सुग्रीवंसहसावदत्यनर्हम्।

दृष्टा (ष्ट्वा) क्षणमाञ्जनेय वक्त्रं।

रामोऽभूद्दिलिजन्मदहीनतास्यः।।

ओपछन्दलक स्याप्यस्यसंज्ञाविशेषार्थमत्र पाठः।

एवमन्यत्राप्यूह्यम्।

---

1 अत्र पादान्ते गुरूद्वयम् भवितव्यम्।

2 पङ्क्तिरियमपूर्णाइव प्रतिभाति यतः पञ्चमश्चरणोऽयम्।

3 इदंसूत्रं छन्दोवृत्तौ (अस्मिन् ग्रन्थे) नास्ति, किन्तु अस्य सूत्रस्योदाहरणमस्ति, अतः सूत्रं छन्दः शास्त्रादुदृतम्।

4 मूले यल्लक्षणं तदुदाहरणेन स सङ्गतम् 'वेगवती सौस्तौ भो स्लौग' इति मूले सूत्रम्।

5 मूले 'भद्रविरअ्त्जोर्गेन्सोर्ज्लाम्' इत्युदाहरणादसंगतं सूत्रम्।

केतुमती स्त्रो स्गौ, भ्रो नगो ग्[1]। ।। 5-32।।

सजसगैर्दश, भरनगगैरेकादश केतुमती।।

मिथुनानि सोरतरतानि वानेवा (?) नीयमानगिरिग (गा[2]) नि।

अवजग्मु (रा[3]) असस विलासं व्योमपथेन यान (क?[4]) महासम्।

आख्यानिकी तौ उगौ ग, जतौ जगौ ग्। ।। 5-33।।

ततजगगेरेकादश, जतजगगेरेकादश आख्यानिकी नाम।

उदा0–

गुञ्जेइ वामे भमरो भमन्तो
णिमीलि अंभोवहमज्हामज्झम्।
संकोरिख किण्णलिनोअ वंद
ह अंध आरस्स रुएत डिंभो।।

विपरीताख्यानिकीज्तौ ज्गोगतौ ज्गौ म्।।। 5-34।।

जतजगगेरेकादश ततजगगेरेकादश चेद्विपरीताख्यानिकी।

उदा0–

अवन्तिसारं अविमुक्क सोहम्,
[5]काञ्चीगुणत्वं मणिअंदितादम्।।
जलन्तमाहुरपि एत देहं
महानंदसस्सदेतुम्[6] (?)

उपजाती अप्येते।।

---

1 मूले कतुमती स्जौस्नोभ्रौ न्सौग इत्यशुञं सूत्रम्।

2 पादान्ते गुरूद्वयमपेक्षितम्।

3 मूले 'वासस' इति

4 एकाक्षरं न्यूनम्। 'क' इति वर्द्धितः।

5 मूले 'कञ्ची' इति।

6 श्लोकोऽयमपूर्णोऽर्थेऽस्पष्टश्च।
लक्षणेन सह सङ्गतिरपि नास्ति प्रथम द्वितीयो चरणौ शुद्धौ।

हरिणप्लुता[1] सोस्लोग, न्भौं भ्रौ। ।। 5-35।।

सत्रथलगैरेकादश, नभभरेर्द्वादश हरिणप्लुता।।

उदा०-

करभेरू कृशाङ्गि तवाननात्,
सदयमानकुलानि कलानिधिः।
अधिवाकमवा प्यशनैः शनैः
तनुतरोऽधिकुहूःप्रजहो तनुम्।

अपर वक्त्रं नोलौगन्धौ ज्रो। ।। 5-36।।

ननरलगेरेकादश, नजजरेःर्द्वादश अपरवक्त्रम्।

इदं वेतालीयमपि।

दशशिरस इत्येवोदाहरणम्।

पुष्पिताग्रा नोर्यो, न्जौ ज्रौ ग। ।। 5-37।।

ननरयेर्द्वादश, नजजरगेस्त्रयोदश।

उदा०-

दलयति मलयानिलोऽभिमर्म
ज्वलयतिकाल शशीमयूखजालैः।
इतिनिशि कुशलस्थलैजणाएर्तो[2]
रघुतनयो गहनेषु बंभ्रमीति।।

इदमौपछन्दसकयवमती[3] जौंर्जो र्ज्रौ ज्रौ ग्। ।। 5-38।।

रजरजेर्द्वादश जरजरगेस्त्रयोदश।

उदा०-

प्राणनाथ पाहि पाहि दारणोसि,

---

1 मूले हरिणप्लुत इति।

2 तृतीयचरणे 'कुशलैषणार्त्तो' इति मूले।

3 मूले 'यमती' इति पाठः।

क्व सागता क्व सा तवेति सालपन्ती।[1]

आगतोयमागतोयमध्वनीति,

स वाधृता कथं कथञ्चिदस्मकाभिः।।

वाग्मती क्वचित्।

शिखैकोन[2]त्रिंशदेकत्रिंशदन्ते ग्। ।। 5-39।।

ऊनत्रिंशदुभयत्रचान्त[3] एकोगुरुः शेषा लधव एवोभयम नियमात् शिखा।

उदा0–

अधर विवर चरकपिकुलकरतलविहितशिथिलचिमल नवलिते।

पृथुतर चलजलशिखरिणि जनकुलममनुत धरपिवलयपरिचलनम्।

अथ गगनमभिपतति शिशुयुवतियुतभयच कितमकृत कलकलम्।

दिशि दिशिहरिकपिकररूहकिण[4]चमरमहिषविकलकुलमवपतनम्।।

खज्जामहत्ययुजीति। ।। 5-40।।

शिखेवायुक्पाद[5] एव बह्वक्षरा चेत्व (ख) उदा, तैनेकचिं (चिं)शदक्षरो विष्मपादः। ऊनत्रिंशदक्षरः समपादः।

उदा0–

कलयति नहिं[6] किम वरतनु चिरपरिघटितमकलकलमपि तव सुखतः।

सह वतशिशिरकर[7] नुकुरमिदमपिपृयुतरकटितटरतितुलनाम्।।

न लभत इति विधिरचितमतिविमलयतिजलधरमिषविमृदितपिकेर्यत्[1]।

---

1 'श वा' इति

2 मूले 'शिखैकानुत्रिंशद' पाठः

3 अत्र 'वृत्तिकारः कथऊन त्रिंशदुभयत्र' इति लिखिति, यदि सूत्रानुसारं लहायुधः स्पष्टमुल्लिखति यस्य प्रथमे पादे एकोनत्रिंशद (29) अक्षराणि, द्वितीये च एकत्रिंशत् (31) द्वयोपादयोरपि अन्ते प्रत्येकं गुरूः तद वृत्तंनाम 'शिखा'।

4 मूले - 'हरिकविकिरिरुहरूर्हाविण' इतित्यस्यष्टार्थकः पाठः।

5 'वायुक्यात्' इति मूले।

6 मूले 'कि नु' इति पाठः।

7 'शिशिशुकर' इतिपाइे मूले

(तव)[2] उरुकुचकलसभरसदलसगमनरतिकथमपि शरदिभजेत्।।

इत्यर्द्धसम समाप्तो।।

इति श्री भट्टाचार्य श्रीमहादेवकृतायां कविदयितायां पैंगलवर्त्तौ पच्चमोऽध्यायः।

❖❖❖

---

1 ‘त’ इति।

2 एकोनत्रिंशदक्षराणि वाञ्छितानि, सप्तविंशत्येवात्र अतः पादपूर्त्यर्थम् ‘वि’ नियोजित इति।

षष्ठोऽध्यायः

यतिर्विच्छेदेः।[1]।6-1।।

विच्छेदो जिह्वोष्ठविषामो यति रिति।[2] यमे (ते) रूपमार्थस्य क्रियानिरूपणं[3] पर्यायकथनं प्रसिद्धिप्रदर्शनेन विप्रतिपत्तिनिराकैरणार्थम्, बुद्धिरूपलब्धिर्वानमितिवत्। श्वेतमाण्डव्यादयो मुनयो हि यतिं नेच्छन्ति। यन्मतावलम्बिनानेते प्रयोगाः।

''भावं श‍ृङ्गारसारस्वतभयजयदेवस्य[4] विष्वग्वचांसीत्यादयः।'' तत्र, विच्छेदोस्थसोनह्यविच्छिन्नानि[5] पदानि शोभांश्रयन्ते। यथा- विच्छिन्नानीति सकलसहृदसाक्षिकतेतच्छज्ञेभाविशेषो[6] वा अधिच्छेदो[7] विच्छेदेति नामा अधिकारोऽयं समुद्रादि वचन उपतिष्ठते। यद्वा विच्छिद्यते समुद्रादि पदैश्वतुरादि संख्यया परिच्छिद्यते यदक्षरं तावद्विच्छेदो यतिरिति वाधिकरणे (णो)[8] न स्थानलक्षणा वा। सिंहावलोकनन्यायेन च पूर्वेष्वपि यथायथं पादान्तारौ यति रतएव उद्गतामेकतः।[9] लो चैत्प्रदः[10] मित्या युक्तं पदविभजनाच्च सूचयति सूत्रकारः। प्रायः पदस्यान्त एव यतिर्नान्तरा तच्चरूढंधातुनामरूपं, न तु विभक्त्यन्तम् तथा चालङ्कारसूत्रम् 'तद्वातुनामभागभेदे स्वरसन्ध्यकृते प्रायेणेति'।[11]

अतः - 'स यामिन (नी)षु ललितकाम चेष्टया।'

---

1 मूले 'विछेदः' इति।

2 ''विच्छेदो जिह्वोष्ठ विश्राम याति रिति'' इति मूले।

3 क्रिनिरूप इति मूले

4 राकरणार्थ

5 सारस्वत

6 प्यसौ इति मूले। अत्रैव प्यसौ .. नह्यविच्छिन्नानि अत्र किञ्चित् त्रुटितमिव प्रतिभाति।

7 ''मेत शोभौ'' पाठः

8 मूले ''चाधिकरणेक्ति र्म' अत्र शून्यः प्रयोगः पाण्डुलिपिकर्ता कृतः कस्यापि अलिखितस्याशंस्य परिचायकः प्रतीयते।

9 पि. सू. 4-18

10 पि. सू. 5-25

11 का0 सू. 2.2.4 (काव्यालंकार सूत्रं)

इत्यादौ प्राग्विभक्तेर्यति (ः)। प्रायो ग्रहणादन्यत्र पादान्ते नेह दोषः।

''नमस्तस्मैमहादेवा, य शशाङ्कार्धधारिणे।''[1]

फदमध्येऽपि यतिः पादान्तरगं विना, यदिपूर्वः परो वा भागो नेक वर्णः स्यात्। यथा-

'केज्त्कोयष्टिकौला, - हलमुखरभुवः प्रान्तकान्तारदेशाः।'

'एतस्या रा, जाति सुमुखमिदं पूर्णचन्द्रप्रकाशम्'।[2]

इत्यत्र तु दोषः।

पादान्ते च दोषो यथा-

'प्रमाणमतभवनवन्धक्लेशानाशाय नारा, यणचरणसरोद्वन्द्वमानन्दहेतुम्'। इति सेयं[3] यतिः पादान्ते सर्वत्र निोदगताद्यपादं समुद्राद्युष्टि च श्लोकार्द्धे तु विशेषेण। तेन संहिता कार्याणि। समासश्च न भवत्यर्द्धान्तरीयेण न वा चूलिकार्द्धादे र्वसादिः (?)

(श्लोकार्धेतु विशेषतः)

पाहि मां कृष्णभगवन्नवाङ्मनसगोचर [4] अखण्डलास्वर (सुर) स्तोम स्तुतपादाम्बुजद्वयः।

(समासे प्रत्युदाहरणम्)

सुरासुरशिरीरत्नस्फुरत्किरण मञ्जरी पिञ्जरीकृत पादाब्जद्वन्द्वं वन्दामहे शिवमिति।[5]

स्वरसन्धौ तु पदमध्येऽपि। स च स्वरउभयदेशेऽपि पूर्वान्तः। यथा-

---

1 अयं श्लोक खण्डः यतिः सर्वत्र पादान्ते इत्यस्यप्रत्युदाहरणम्। किन्त्वत्र 'पादान्ते नेह दोषः' इत्यस्यौदाहरणं प्रदर्शितम्।

2 'कूजत्कोयष्टिं अयः पद्यांशः पदमध्यगतस्ययतेरूदाहरणम्, 'एतस्या.' रा, जाति०' अयं यदि पूर्वः परो वा भागो नैकवर्णः स्यात् इत्यस्योदाहरणं किन्त्वत्र मूले द्वावपि श्लोकौ एकत्रैव एवं लिखितौ - कूजत्कोयष्टिकोलाहलमुखरभवः एतस्या राजतिमुखमिदंपूर्णचन्द्रप्रकाशम्।

3 'सियंयतिः' मूले

4 अत्र सन्धि न कार्या

5 मूले द्वावपि श्लोको (पाहि मां, सुरासुर.) एकत्रैव लिखितो।

"सीतावक्ते, क्षण परिचयप्राप्तविश्रानधैर्यः।"

येषां तु पर निमित्तः पूर्वस्यादेशः, तन्मते-

निःसपत्नमेव पूर्वान्तत्वं रूढमिति किं

समासापन्नेक[1] पदभावस्य मध्येऽपि यथास्यात्।

यथा- कनकनिकषस्निग्धाविद्युत्प्रिय (मम) नोर्वशीति।

आपोनारा इति प्रोक्ता आपो वै नर सूनवः।

ता यदस्यायतं पूर्वं तेन नारायणः स्मृतः।

इति योगोवतावपि नारायण इदं रूढम्। एतेन सामासिका लम्बकर्णादयोऽपि व्याख्याताः। यदि पुरोभागोऽनेक[2] वर्णस्तेनेह दोषः। "अस्या वक्त्राब्जमवजित प्रस्फुरच्चन्द्रकान्तिः।[3] इति जैन प्रभृतयः।

अचि यण् जसाय आदेशा एचः कृतानामयादीनां यादयश्च परादयःपूर्वान्तराश्च।

यथा - र - 'सा वाला तन्व्यपि[4] च रभसादाजगामातिदूरम्।' अर्थाद् यण् संयोगेऽपि परादिः।[5]

तथा - 'सन्धि स्वं चेदवानिपसुख ग्राममप्याहरामि।'[6]

भूयस्तस्थामतिशयशठ[7] प्रेमवागेवदेया।

पूर्वौन्तो यथा-

मा मा तन्व्या वम रभसतो भंक्ष्यते हंतमध्यम्

अत्थ (त्र)[1] पादावलित नयनोपान्तमीक्षां बभूव।

---

1 'समासापत्तनैक' पाठः।

2 मूले'परभागो नैक वर्णः।"

3 अत्र हलायुधवृत्तौ पद्यांशोऽयं शुद्धमेवं लिखितः - 'अस्या वक्त्राष्जमवजितं पूर्णेन्दुशोभं विभाति।

4 मूले "तन्वपि'।

5 'अर्थाद्यणसंयोग्यपि' पाठः।

6 'मप्पा' इति मूले।

7 मूले 'यतिशय' पाठः।

मा तस्या या वितर कपटच्छन्नवाचं पुरावत्।।

इलि जशादयस्तु परादय एव। चादिरेफवर्णो निपातः। प्राक्पदान्तवद्दोषस्तत्संबन्धात्[2] तेनेह दोषः।

सीतादेव्याश्च नयनजलैराविरासीत्पयौषिः। अनेक वर्णेतु दोषः। यथा-

प्रत्यादेशादपि च मधुनो विस्मृतभूविलासम्।।

प्रदिरेकवर्णः परेण सम्बन्धात् परादिरेव तेन इह दोषः।

दावं मे प्राक्षिपतिहृदये दुःसहस्त्वद्वियोगः।

अनेक वर्णे तु न दोषः -

यथा- दूरारुढ़ं प्रमोदं हसितमिवपरिस्पष्टमाशा सखिभिः। कम्रप्रवचनीयानां त्वेवनियमः। तदयं संग्रहः -

यतिः सर्वत्रापादान्ते उद्गतादिं विनाभवेत्।
समुद्रादिच्छिद्यद्यते च श्लोकार्धे तु विशेषतः।।
वृत्सगन्धयाख्यगद्येऽपि वृत्तापादान्तगा मता।
अनुक्तयति वृत्तेऽपि यथाशोभं[3] यति चरेत्।
न धातोर्रूढिनास्ति (?) वा मध्ये सा संहिताविना।
यदि न स्यात् परोभागस्तस्यापित्वेकवर्णकः।।
इष्यते पदमध्येपि यतिः पादान्तगंविना।
यदि पूर्वः परोवापि भागः स्यान्नैकवर्णकः।
पादान्ते तु विभक्तेः[4] प्राग्यतिं नेच्छन्ति सूरयः।
उभयादेशतां प्राप्तेप्तःवरः पूर्वान्त इष्यते।।
जसाधव्यव[5] (?) कृत्सान्ताः परपूर्वादिमान्तगाः।

---

1 अत्थवादा इति मूले पाठः।

2 "प्राक्थदान्तबदोबत् संबंधात्। इति पाठः।

3 लोभं इति पाठः

4 विभक्तिःप्राग् मूले पाठेः।

5 जसविधौ जगण सविधौ इत्यर्थः।

नित्यं प्राग्योगतश्चादिरेकार्णःप्राक्यदान्तवत्।।

नित्यं परेण संबन्धात्प्राद्येकार्णः (ः) परादिवत्।

व्यञ्जनानामपि[1] कवितादौ विस्थनयतिर्नियतिः।।

ननु येतो (यत्योः) कथं संहिताकार्याणिसार्द्धमामाकालमात्रा व्यवायः। न निमित्त कार्यिणोरव्यवायानपायात्। जसविधे तु चपादान्तः कार्य्या न तु पदमिति।

प्रस्तारप्रस्ताव एवैकाक्षरादिपञ्चाक्षरपर्य्यन्तानि छन्दांसि सूचयिष्यः जतीत्यनुद्दिष्टानितान्युपेक्ष्य यथोद्देशं गायत्र्यादि क्रमेण विशेषलक्षणानि आह।

तनुमध्या त्यौ। (6-2)

प्रतिपादं तयौ चेत् तनुमध्या नाम। एवमग्रेष्वपि व्याख्येयम्। उदा.-

याहि त्वरया तां द्रुहयेदपि देवी।

आह प्रियमेवं काचित्तनुमध्या।। इति गायत्री।

कुमारललिता ज्सोंग्। (6-3) असगाः। उदाहण-

गतेनचरणाभ्यां विलोलगुल्गर्मा।

विनम्रमुखपद्मा जगाम मुनिवासम्।। इत्युष्णिक्।

हंसरुतं म्नौ गौ। (6-7) मनगगाः। उदाहरण-

गोपीं चक्रतुहिर्नाशौ, पूर्णे लालसचकोरः।

वन्द्यं योगिभिरमन्दं, पायात् वश्छलकिशोरः।। इत्यनुष्टुप्।

भुवगशिशुभृता नौ म् (6-8)

ननभश्चतुर्विमज्चभिर्यतिः। उदा. -

क्वलितखमणिचौरं स्वनमधिजठरं वाले।

सुरपतिरभिनत्सिग्धस्मितमुखि चपला व्याजात्।।

हलमुखीर्नौस (6-9)

रनसाः त्रिभिः षड्भिर्यतिः। उदाहरण-

कठिन प्रकृतिमधुरा, माधवंरहसि निर्जगौ।[2]

---

1 व्यंगानायीव (?) कविताविस्थानयतिर्नियतिः' इति मूले पाठः।

2 मेले 'निजगौ' इति पाठः।

मा वधीः सदयसरला विस्मृतेः कुलयुवतीः।

इमां सर्वादौ हेचित्पठन्ति। इतिबृहती।

शुद्धविराङ्म्सौ[1] जगौ। (6-10)

मसजगास्त्रिभिः सप्तभिर्यतिः। उदाहरण-

सा जीवेदपिचेन्मया विना, जीवामि प्रिययातयाप्हम्।

आनेष्ये दयितां तदाध्रुवं सौमित्रे भुवनात् कुतोऽपिताम्।।

पणवोम्नो यो। (6-11)

मनयगाः पञ्चभिःपञ्चभिर्यतिः। उदाहरण-

रामे सागर तट मायाते, पौलस्त्यः पृथुविपुलाः सेनाः।

प्रेतेशो[2] नवनशानान् (?) दूतान् कर्त्तुप्रोज्झितपरमारेने।[3]

रुक्मवतीम्मौरुगौ। (6-12)

भमसगाः पञ्चभिः पञ्चभिःपूर्ववद्यति। इन्द्रिय बाणैर्यत्र विरामः[4] इति कालिदास वचनात्। उदाहरण-

आलिसमाजे याहि सुवेशा रुक्मवती मां न प्रतिभासि।

साकिल भूषा या पृथगाभा तद्वरनाम्नां का च विभूषा।

चंपकमाला क्वचित्।

मयूरसारिणी र्जोर्गौ। (6-13)

र ज र गाः उदाहरण-

आगता जलाय गोपकान्ता, वेणुनादमानिशम्य मार्गे।

सञ्चराग्र एवमालयन्ती[5], कापि नैव याति पादमात्रम्।।

मत्ताम्भौ स्गौ। (6-14)

---

1 ‘‘विराम्सौ जगौ’’ इति मूले।

2 मूले प्रेतांगो’ इति पाठः।

3 ‘‘प्रोझित’ इति पाठः।

4 श्रु. बो., छन्द 12

5 ‘या पृथमाभा’ इति मूले पाठः।

म भ सगाः चतुर्भिः षड्भिर्यतिः। उदाहरण-

तल्पेमुक्ता प्रियमपिमत्ता, वेणु स्वानैः परमुपयाताः।

नो जानीनो दिशमपि मुग्धास्त्वं[1] चेद्वामः कमनुसरामः।।

षणवानन्तरमेते पठन्ति। इति पङ्क्तिः।

उपस्थिता त्जो ज्गो गः। (6-15)

त ज ज ग गाः। षड्थः पञ्चभिर्यतिः। उदाहरण-

भ्राम्यन् प्रतिकुञ्जमनेकेवलं, कुर्वन्कलमद्य तरूपकण्ठै।

दृष्टिं क्कुभोनुमुहुर्वितन्वन्दृष्टः सखि हन्त वनप्रियस्ते।।

इन्द्रवज्रा खो ज्गौ ग्। (6-16)

त त ज ग गा[2]

चतुर्भिर्पञ्चभिर्यतिः[3]। उदाहरण-

चण्ड क्व रे, हन्त जणा वि अन्ता, सीअक्करोभित्त ठि ई हुवन्ति।

साएक्वपक्सेचिहुरो विहाहा

वेसं विहुज्जेइ पुणो पुणो वि।।

यं सर्वशैलाः परिकल्प्य वत्सम्।[4]

इति कालिदास्य पञ्चभिर्यतिः।।[5]

उपेन्द्रवज्रा ज्तौ ज्गौ ग् (6-17)

ज त ज ग गाः पूर्ववत् पञ्चभिः षड्भिर्यतिः। उदाहरण-

[6]'स्फुरत्यवाते तरलाश्रुजाले, भुज्चेख मुग्धे प्रतिहंसिदीपम्।

कृताच्च रोमाञ्च नितम्बविम्बाम्[1] मितिप्रियःप्राहनिरुद्धपाणिम्।।

---

1 मूले 'आलपन्ते' इति पाठः।

2 मूले 'रूचं' इति।

3 मूले त स ज गा' इति पाठः।

4 सर्वत्र पञ्चभिः षड्भिर्यतिश्च किञ्चिद् वैशिष्टयम्।

5 कु. सं. 1-2

6 मूले पाठे 'स्फुरन्यावाले' इदति अर्थदृष्ट्याअसंगतः।

आद्यन्ताउपवालयः (6-18)

एताविति वक्तव्ये आद्यन्ताविति वर्णतो मात्रातो वा विरूपाभ्यां छन्दोत्तराभ्यामप्येकाकारावभसिभ्यामिन्द्रवज्रोपेन्द्रवज्राभ्यामिवोपजातिसिध्यर्थमतएव रूचिरावंधस्थाभ्यां हरिवंशे।

महाहवे मम तव च द्वयोरिमं पराक्रमंभुजबल केवलास्त्रयोः।

प्रणम्य मामेकमनाः पठेत्तु यः स वैावेज्ज्वरविगतज्वरो नर।[2] इति

द्वादशाक्ष्ज्ञरस्यान्तरस्त्रयोदशाक्षरस्यान्तस्त्रयोदशस्य चादि द्वादशाक्षरः। इन्द्र-वज्रोपेन्द्रवज्रयोश्च पाविकमत्तादित्वंप्रास्तारिकं च जायत इति-

बहुवचनमादिमध्यान्तैक ह्य भवन्तमवंधम्।[3]

शालिनी भ्सौ त्गौ गः।[4] (6-19)

समुद्र्त्रषिग्रहणमन्तरा यतिनिवृत्यर्थमेवमन्यत्र। उदाहरण-

सत्यं ब्रूमः क्रीडयानिर्जितारो

दूरे रामस्तायदास्तां सुधीरः।

लोकांस्त्रीन् वे संग्रहेयुर्निमेषाद्

उग्रं पश्या दृश्यमानाः कपीन्द्राः।।

वातोर्मी म्भो त्गौ ग्। (6-20)

चतुः स्वराः। मभतगगाः पूर्ववद्यतिः। उदाहरण-

बध्वा सेतुं पकपिशूरेः पयोक्षेः

पारं प्राप्ते रघुवंशावर्तते।

क्रव्यादश्रीनवला[5] स्तोकवत्यः।

---

1 'कृताच्च्योद्धाति इति मूले, अयं पाइः अर्थदृष्ट्या छन्छोदृष्ट्यापि चासंगतः।

2 भारतीय ज्ञानपीठकाश्याः प्रमाशितं श्री पन्नालालजैनमहोदयेन सम्पादितं हरिवंशपुराणमन्विष्टं तत्रायं श्लोको न प्राप्तः।

3 पङ्क्तिरियं संदिग्धा इवप्रतिभाति।

4 मूले 'स्तौ त्गोम्' इति पाठः। छन्दः शास्त्रे शालिनीछन्छसः पूर्वं दोधक छन्दोलक्षणमस्ति 'दोधकं 'भौभगौम्' (6-19)

5 मूले 'क्रव्यादेसीनयला' इति विसङ्गतिं व्यनक्तिः।

सीतामेत्य प्रणयैस्तोजयन्ति।।

भ्रमरविलासिता म्भौ न्लौगम्। (6-21)

समुद्रऋषयः। मभनलगाः।पूर्ववद्यतिः चकरणं[1] सुखार्थमसंदेहार्थ च। उदाहरण-

पथ्याकर्ण्य भ्रमरविलासिता,
वल्लीः पुष्पप्रकर विहसिताः।
स्मृत्वादेवं पथितरतरुणा
भेजूश्चौरैरूपहतमयनम्।।

रथोद्धता नौंलौम्।। (6-22)

रनलगाः। उदाहरण-

जानकीकलित[2] केलिकन्दुकम्
राघवेणनिभृतं निवारितम्।[3]
वाष्पपूरितदृशा विमुञ्चती
केकयीमपि चकारदुःखिताम्।।

स्वागता नौंभ्गौम्। (6-23)

रनभगगाः। उदाहरण -

वीक्ष्यमज्जनजलार्दुसुचेल
व्यञ्जदूरू[4]युगमूलमयन्ते।
नूनमध्वगयुवापविमूर्च्छाम्
कां कृपावतिदशाभवितास्या।

---

1 सूत्रे चकारो नास्ति किन्तु वृत्त्यं 'चाकरणं' इति चकारो यत्यनुकर्षणार्थः लिखितः। छन्छःशास्त्रे चकारो वातोर्मी छन्छोलक्षणे वातोर्मीम्भीतगौ ग् च। 6-20) लिखितः।

2 मूले 'ललित' पाठः।

3 'निवारिता' इति मूले।

4 मूले 'व्यज्जनादूरूयुगमूलमयन्ते' इति पाठः। अत्रैकादशाक्षराणि भवितव्यानि किन्तुत्वस्मिन् पादे द्वादशाक्षराणि सन्ति। नगणस्य सिद्धिरपिन भवति।

वृत्ता नौ स्गौ ग्[1]। (6-24)

उदाहरण-

वज्रवरयुवतिभिरासक्तः सजयतिमुररिपुरामुक्तः।
मरकतमणिरिवहेभीभिः स्फुरदतिसुविमलरेखाभिः।।

श्येनीर्जौर्लौग। (6-25)

र ज र ल गाः। उदाहरण-

वीक्ष्यवारिवाहनादलासिनो, नूतनेन तोयदेनगर्ज्जिते।
प्रोषितेषु गेहेमेतुमञ्जसा, कैक इत्यतीव हारिसञ्जगुः।।

इतित्रिष्टुप्।[2]

जगती।। (6-26)

अधिकारोऽयमाध्यायात्।

वंशस्थ ज्तौज्रौ (6-27)

ज त ज राः। उदाहरण -

सखि ब्रुवे पार्श्व विवर्तन स्खलत्
(पुनः पुनः)[3] कङ्कणसंस्कृतेन ते।
युवाध्वनीनस्तवदेहलीगतो
भवेत्कथंहन्त विमुञ्च कङ्कणम्।।

वंशस्थविलंक्वचित्।

इन्द्रवंशा तौ ज्रौ। (6-28)

त त ज राः। उदाहरण-

क्रव्यादपि[4] स्वामपनीयवैधसौ,
निर्माणसीमां निदधौ निजास्पदे।

---

1 मूले ''वृत्ता' इति पाठः।

2 इतः पूर्वं छन्दः शास्त्रे 'विलासिनी ज्रौज्गौग' इतिसूत्रमधिकम्।

3 उदाहरणे द्वितीयपदं त्रुटितप्राथम्

4 मूले क्रव्यादयि पाठः

रामस्त्वहं जानकिरूढगर्भिणी,

कालानले हन्त वलिं वने ददे।।

द्रुतविलम्बिता[1] न्भौ भरौ (6-29)

न भ भ राः। उदाहरण-

पुरतः एव परेतपतिः[2] पुरं दशमुखस्यविवेशह सेतुना।

अथ सपत्पमतङ्गजसरी रघुयुवासबलः सबलो यथो।।[3]

द्रुतबिलम्बितं क्वचित्।

तोट सः। (6-30)

जगत्यधिकाराच्चत्वराः साः। उदाहरण-

अबलेषु पतत्स्वतिदूरतराः

दुदधे सलितं द्वयथोच्छलितम्।

तटिनी परिरभंणकामनया,

स्वभुजाविव लोलतरासृतौ।।

एते विणापि पठन्ति।

श्री पुरो नोभ्यो वसु समुद्राः। (6-31)

न न म या अष्टभिश्चतुर्भिर्यतिः। उदाहरण-

जलनिधिरपिनिर्यद्धातुरागै, रतनुत बहुरक्तांस्ताँस्तुवङ्गात्।

हृदि गिरिदृढ़मूढैः सुप्रहारे, र्वमति च रुधिराणिव्यक्तघोषम्।।

अलोद्धतगति ज्सौं जसौरसर्त्तवः। (6-32)

असजसाः षड्भिः षड्भिर्यतिः। उदाहरण-

समूलमभितः समुदृतः तरे,

महोच्चशिखरे महीधरचये।

---

1 अन्यत्र 'द्रुतविलम्बितम्'।

2 मूले 'परेणपतिं' इति पाठः

3 सबलौ मूले।

समं कपिबलेर्वियत् प्रचलिते
धरा सगगनं नदाश्चधरा।।[1]
तत्तं नौ भ्रमौ (6-33)
ननमराः। उदाहरण-
जलचरनिकराङ्गाघातक्षतैः
पयसि चरुधिरीभूते वारि्षेः।
गिरिसरिदुदकं पीत्वा वानराः,
पुरत उरु विमुञ्चन्ति क्ष्माधरान्।।
कुसुमविचित्रा न्यौ न्यौ। (6-34)
नयनया षड्भिः षडिभर्यतिः। उदाहरण-
अपिगरलाशीभवति यदीशः,
चिरतनमम्बक्षितिधर सूने।
अहमिह मन्ये तदपि भवत्यः,
अधरसुधायाः स्फुटमनुभावम्।[2]
चञ्चलाक्षिका नौरौ। (6-35)
न न र राः सप्तभिः पञ्चभिर्यतिः। उदाहरण-
अथ विधुरूद्गान्नभः प्राङ्गणं, जलनिधिरपिचापनीरोच्चयाम्।
व्रजति वत न येन तेन स्वयं, रचयतुमचिरात्समंमन्त्रणाम्।।
प्रमुदितवदनाक्वचित्।
मन्दाकिनी गौरी शुभा चात्रैव प्रदर्शनात् प्रागेकैकरेफवृद्धौ।
क्रमेण- तरुणीरमणी वासन्तीमालत्यः स्थुः।
भुजङ्गप्रयातं यः। (6-36)
चत्वारो याः। उदाहरण-

---

1 'नदास' इति मूले
2 वृत्तं नाम- ततं अन्यत्र।

कृपांभो नियुक्तां भवान्मेयया स्यात्,
भवत्पादपाथो भवेभक्तिरुच्चैः।
कृपाभक्तितश्चेदृते तां न भक्तिः,
न तावत् कृपाब्धिस्त्वनेषोस्मि ह्युक्तः।।

स्त्रग्विणी रः। (6-37)

चत्वारो राः। उदाहरण -

दूरतः पातितेभूधरे वानरै, रुच्छलत्सुस्वनः फेनमुङ्नीरधिः।
पाहिमां पाहिमां राघवेत्युच्चकैरीयिवान्[1] क्रंदननैर्दण्डवत्[2] किंधराम्।।

प्रमिताक्षरास्त्रौ सौ। (6-38)

सजससाः। उदाहरण-

अयिकाकुवाद् पटुभिः प्रणये, रपि मा वढानि नितरां रमणे।
प्रमिताक्षरा हि युवतिः स्वगिरां, सततुं करोति परमातिथिताम्।।

चित्राक्वचित्।

कान्तोत्पीडाभ्मौस्मौ। (6-39)

भ म स माः। पञ्चभिः सप्तभिर्यतिः। उदाहरण-

यौवनमत्ता, जीवितनाये नोच्चैः,
साकमुदार क्रीडितमातन्वाना।
विप्रतिपात्तावेव च हत्वा सारिं,
ज्ञापनवेले द्रागभित श्रेयत्वात्।।[3]

वैश्वदेवी मो या विन्द्रियर्षयः। (6-40)

म म य याः पञ्चर्भिः सप्तभिर्यतिः। उदाहरण-

वारामागारे स्वामिनस्तेऽति[1] गाढं,

---

1 मूले 'अनुभाव' इति पाठः

2 रीपिवान् इति मूले।

3 र्देडवत्किंधराम् इति पाठः।

कृत्वासंबाधांरामभद्रेण[2] बद्धे।

नेत्रेमुक्ता द्राक् तस्यपत्न्याः

पत्नायांचक्रेतातंकं वाष्पधरापगापि।।

नवमालिनी न्जौ भ्याविति। (6-41)

न ज भ याः अष्टभिश्चतुर्भिर्यतिः।

इतिरार्षे समाप्तौ। उदाहरण-

कपिवलनोदनेन तटदेशं, मुहुरचलापगा[3] पृथुनिनादम्।

पतिविपदं समीक्ष्य वत भर्तुशिवमुपलेषु नूनमवहन्ति।।

इति श्री भट्टाचार्य श्री महादेव कृतायां कविदयितायां पेङ्गलवृत्तौ षष्ठोऽध्यायः।

❖❖❖

---

1 मूले सांरिंजाय न चेलेद्रागभिदजघ्रेयत्वात् इति। अत्र वुटित पदप्रयोगः अर्थदृष्टव्याप्सङ्गतः।

2 'स्तेति' मूले पाठः।

3 'रामद्रेण' इति मूले अक्षरैकन्यूनम्।

सप्तमोऽध्यायः

सदपि समवृत्ताख्यमेकोपाधिमपुरस्कृत्य विधित्वेन पूर्वाध्यायः पृथक् कृतः। सति वाऽध्यायाभेदे उपाधिभेदो मृग्यते न तु एकोपाधिः कश्चन संभवतीत्यध्यायैक्यमेकदोषप्रसक्यत्। अतएवात्मादि द्वादशानां प्रमेयत्वाविशेषेऽपि षट्[1] सकारणत्व कार्य्यत्वे पुरस्कृत्यतृतीय चतुथाध्याययेर्भेदः स्थितोऽन्वीक्षायां मीमांसायां सामान्य विशेषातिदेशत्वेनसप्तमाष्टमयोः कामदाराश्च शास्त्रकाराज्ञां[2] इत्यध्यायान्तरे प्रहर्षिणीति छन्दः प्रभृतीनाहै।

प्रहर्षिणी म्नो ज्रो गत्रिक दशको। (7-1)

मनजरगाः। त्रिभिर्दशभिर्यतिः। उदाहरण-

वैदेही स्वभुजलतोपधानसुप्तां,[3]

वामां तां तरुदलशाद्वलेऽध्वखेदात्।[4]

विम्लानाननकमलां[5] निरुप्य रामो,

वाप्पार्द्रा महहा न चेतयाञ्चकार।।

रुचिरा ज्भौ स्जौ ग्चतुर्मनको।।[6] (7-2)

अभसजगाः। चतुभिर्नवभिर्यतिः। उदाहरण-

अथप्रगप्रकटविमुवतधीर तम्,

त्तरङ्गिणिरमणमवेक्ष्य सस्मितम्।

रघूद्वहः कुपितकृतान्तभीषणः।

शिरोधुवन् धुनषि दृगलं ददौ।

---

1 षड्कारणत्वात् मूले पाठः।

2 शास्त्रकारा जा इति मूले।

3 मूले 'सुप्ता' इति।

4 मूले वामातो तरूद्वलशड्वलेऽध्वखेडात् इति पाठः।

5 विम्लालानानन इति एकाक्षरोऽधिकः।

6 मूलग्रन्थे 'रूचिराज्तौस्योग' इति लक्षणं उदाहरणेन असंगतम्। लक्षणम् छन्दः शास्त्रादुधृतम्।

मत्तमयूरी म्तौ य्सौ ग् समुद्रनवको (7-3)
मतयसगाः। चतुर्भिर्नवभिर्यतिः।[1] उदाहरण-
व्यूढोरस्कः सिंहसमानतमध्यः
पीनस्कन्धो मांसलहस्तायतवाहुः।
कम्युग्रीवः सिग्धशरीरस्तनुलोमा
भुङ् क्ते राज्यं मन्तमयूराः कृतिनेत्रः।[2]
गौरीनौ न्सौ ग्। (7-4)
ननगसगाः। सप्तभिः षड्भिर्यतिः। उदाहरण-
चितिकृतवसतिमपि नृकरोटी,
मूमजमददधतमहह भवन्तम्।[3]
इत्यतिजगती।
असंबाधा म्तौ न्सौ गाविन्द्रिय नवको (7-5)
मतनसगगाः पञ्चभिर्नवभिवर्यतिः। उदाहरण -
त्वं विच्छेदे नो मुखमपि ददते शष्पे,
शारङ्गा लीलाकमलमपि तनूमौकत्।
रामस्य त्वेषा सुतननु तनुरसंबाधा,
धिङ् मां क्रन्दन्तं ननु वत कठिने जीवः।
अपराजिता नोर्सोलगो स्वरर्षयः। (7-6)
ननरसलगा सप्तभिः सप्तभिर्यतिः। उदाहरण -
जलधरपटली महोच्चमहीभूताम्,
कटक परिगता वर्ष निपातने।
जलनिधिववर्श नु जीवन संश्रयम्

---

1 मत्तमयूरी छन्दसः उदाहरणमत्र अयुक्तमपूर्णञ्च यथा- निर्दास्यु व्रैस्तानि ततस्ते कुपितापि' इति पाठेः।

2 इदमुदाहरण हलायुधभट्टस्य। छ.शा. 7-3, पृ. 21

3 उदाहरणमपूर्णं प्रतिभाति।

विपदि निपतितं[1] निरीक्ष्य रूरोद किम्।[2]

प्रहरणकलिता नोम्नो ल्गो द्विस्वराः। (7-7)

ननभनलगाः। पूर्वोक्ता यतिः। उदाहरण -

जनकनृपसुता[3] कुशलपरिचयः

प्रमुदित वदनः पवनतनुभवः।

सुखनिहितदृशं धुकवदनममुं,

सदसि सविनयं रघुतिलकमगात्।।

वसन्ततिलका त्भौ जो गौ। (7-8)

सभजजगगा। उदाहरण -

आवाससीमनसमङ्कुरितं कुटीर-

द्वारेऽथपल्लवितमुत्कलिकं च वीथौ।

एधादि सञ्चयि निकुड्मलितं च दुःखम् -

चूर्णीपदे विकसितं रघुनन्दनस्य।।

वसन्ततिलकं क्वचित्।।

अस्या एव संज्ञान्तरे आह-

सिंहोन्नताकारश्यपस्य। (7-9)

उद्धर्षिणी (शैलरम्यन्मधुमाधवी)[4] कस्यचित् इति शर्करी।

चन्द्रावर्त्ता नोनौ स्। (7-10)

नननसाः। उदाहरण -

प्रियसखि पुरत उदितमपि मयका

वनमति कुजनवचसमयिसमिलेत्।

तनु लव गमनत ऊतरकुरुचि -

---

1 मूले 'नितित' मिति पाठः।

2 मूले 'स्वोदेकिणम्' पाठः।

3 जनकपतिसुता' इति अर्यदृष्ट्या नोचितं प्रतिभाति। छन्दः साधु।

4 मूले 'ध्रुकवदमुं' पाठः अक्षरद्वयस्य न्यूनत्वमत्र।

मर्म कृत ऋतुसतिसुवितथ मदुनोः।।

शशिकला क्वचित्।

सप्तभिरत्र यतिः केचित्। अत्रैव व्यङ्र्भिावभिरष्टभिः सप्तभिश्च यतिः[1] संज्ञान्तरे- आह।[2]

मण्यृतुनवको चेत्।[3] (7-10)

मणिगुणनिकरवस्वृषय।[4] (7-11)

क्रमेणोदाहरणम् -

समुचितमिदमपरिचितकितदया[5]

भ्रमरकितव निखिलमकृतनलिनी।

सदवधि लघुविपदि परिहरसि तां

भजसि सपदि युवतमाह कुमुदिनीम्।

परिहर परिहर विधुमुरिव रूदितं, मम कुनियतिकृतमिदमणिनियतम्।

भवति सलिलमनुकुवलयमवले, न सलिलमपि कृशतनु कुवलयतः।।

मालास्रक् क्वचित्।

मालिनी नौ म्यौ यः। (7-12)

ननमययाः। पूर्वोक्ता यतिः। उदाहरण -

सदसिमुनिसुराणां शैलपुत्रयाः सदक्षोऽ

वधि परिणयमीषत् शक्तयोः कान्तपादौ।।

कुरू नयनपदव्यां शंभुमित्याप्तवाग्भिः

---

1 छन्दः शास्त्रे 'उद्घर्षिवीसैतवस्य 7.9. इति सूत्रमधिकम् छन्दोवृत्तौ तु संकेतमात्रम्।

2 मूले सभाहसमिलत् इति पाठः। अक्षरन्यूनतात्रो।

3 मूले यतो इति पाठः।

4 छन्दः शास्त्रे मालतुर्नवकौचेत् सूत्रमधिकम्। अस्यैव छन्छसः वृत्तरत्नाकरे शशिकला प्राकृतपिङ्गलसूत्रे च 'शरभः' इति नामसमुपलभ्यते।

5 छन्दः शास्त्रे यत् माला छन्दः तदेव मणिच्छन्दः मूले 'मणिर्न्मुनवकौ चेत्' इति पाठः।

समजनि गुरूलज्जा यन्त्रणानन्तशाखा।।

इत्यतिशक्वरी।

ऋषभगजविलसितं भ्रौ नौ न्गौ स्वर नवको। (7-13)

भरनननगाः। सप्तभि र्नवभि र्यतिः। उदाहरण -

पारगतेषु तेषु दशमुखपुरयुवतिः

प्रोद्यदहोनधूनि[1] समपरसरणमनसा-

लोकनभाषणादि विलसितमपिरमणे

नून मनुक्षणं च कलयति चरमतमाम्।।

गजतुरगविलसितं क्वचित्। इत्युष्टिः।

हरिणी न्सौ म्रौ स्लौ गृतुसमुद्रर्व्यंयः। (7-14)

नसमरसलगाः। षड्भिश्चतुर्भिः स्प्तभिर्यतिः। उदाहरण -

उपरि निहितादृष्टिर्दृष्टस्तयामृगलाञ्छनो-

दिशि दिश समुन्मीलत् पुष्पप्रवालदलव्रजः।

भुवि निजसखीन्यस्तः शय्यासरोरूहसञ्चयः।

सपदि च कृतं तन्व्या नेत्राम्बुजं विनिमीलतम्।

पृथ्वी जसौ ज्सौ य्लौ ग् वसुनवकौ। (7-15)

जसजसयलगाः अष्टभिर्नवभिर्यतिः। उदाहरण-

निमीलयति लोचने निरवलम्बमालोकते।

विजल्पतिनिराश्रयं किमपि मन्दमन्दं मुहुः।

धिरो धुवतिसस्मितं श्वसिति पाइडुगण्डावला

भुवंविनतवंधरा लिखति वाष्पधाराय (ज)? [2]लम्।।

वंशपत्र पतितं भ्रोन्भ्रौ न्लौ गदिगृषयः।। (7-16)

भरनभनलगाः दशभिः सप्तभिर्यतिः। उदाहरण-

---

1 मूले 'अब्धृषयः' इति पाठः अत्र यत्यनुसारेण विरोधः।

2 मूले 'कृतचया' इति।

शाोणमहोत्पलाभमयनो रघुपतिरभवत्,
कः सहतां कठोरकुचयोरवहति विपदम्।
तेन स राम एव नचिरादित इति स वलय -
मन्त्रणयन्ति शिंजितमिकान्निशिचरसुदृशाम्।[1]
केचिदिदानीं हरिणीं हरिणीस्थाने च शिखरिणी पठन्ति।
नन्दाक्रान्ता म्भौ न् तो त्गो ग समुद्रर्त्तुस्वराः। (7-17) उदाहरण-
प्रत्यूषेषु प्रशिथिलकरे न्यस्य वामं कपोलम्,
अन्याधन्य सुरतभवनाद्वीक्षते निस्सरन्ती।
वर्त्मन्यस्ते नयन नलिने सायमासंहरन्ती,[2]
मन्दंमन्दंगुरूजनगिरा वन्दिवद्यातिगेहम्।।
शिखरिणी य्मौ न्सौ भलौगृतुरूद्रा। (7-18)
यमनसभलागः षड्भिरेकादशभिर्यतिः। उदाहरण-
स्खलन्तीवीवक्षोरूहनिवसनव्यापृतकरा,
रविन्दायास्तस्याः सहचरवधूनामभिमुखे।
मयि स्थित्वा पृष्ठे लिखति नखरेण स्तनतटम्
विवृत्तभुभङ्गा स्फुरदधरमास्यं स्मरमनः।।
इत्यष्टिः।
सुकुसुमितलतावैल्लिता म्तौ न्यौ याविन्द्रियर्तुस्वराः। (7-19)
मतनययया: पञ्चभिः षड्भिः सप्तभिर्यतिः। उदाहरण-
शश्वच्चम्पातिस्मित विकटेर्वर्षधरा प्रसारैः।
भिन्सौ[3] भग्नायां सुमुखि सहसा रत्नमप्याविहाय।।
विन्यस्यन्ती[4] वै दिवसगणनालेखमन्वेषयन्ती,

---

1 मूले 'प्रौज्जाद' इति पाठः।

2 मूले धारायलम्' इति पाठः।

3 'सु' इति एकाक्षरन्यूनत्वात् नियोजितः।

4 'सायं मासं' इति पाठः।

द्वित्राङ्कैर्युक्ता नलिकगालितान्[1] भित्तिखण्डाश्चिनोति।।[2]

इति धृतिः।

शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यर्षयः। (7-20)

मसजससतगाः द्वादशभिः सप्तभिर्यतिः। उदाहरण-

गोकर्णः सहतर्णकैरधिगृहद्वारं सुखं शेरते,

कुर्वन्ति प्रियपादयानकलमकाः कण्डूयनेर्निस्त्वचः।

कन्दानां विरुजन्तियूकरसुता पश्यत्यपि त्वप्रिये,

तस्मिन्नेवपुलिंदयूनि सुभगे त्वं चालि वाचं यम्।।

इत्यधृतिः।

कृतिः (7-21) अधिकारोऽयम्।

सुवदना म्रौम्नौ य्भौ ल्गावृषि स्वरर्तवः। (7-22)

मरमनयमलगाः सप्तभिः सप्तभिः षडिर्भयतिः। उदाहरण-

कुर्वेभागधुरोहं श्रणुत कपिवरा आवक्षितिधरैः,

रेतस्मिन्नम्बुराशौ विरचयततरां सेतु सहबलैः'।

एकः स्वास्त्राणकृतैर्दशवदनशिर स्तुंगाचलवरैः,

सीता[3] शोकाम्बुराशौ पुनरयमचिरात्कर्तारघुपतिः।।

इति समाप्तौ कृतिश्चेद् क्रमेण गुरूलघुभ्यां समाप्यते तदा वृत्तं नाम।[4] उदाहरण-

आः सहेतकालवर्धितोऽपि कान्तविप्रयोगखेदमित्थम्,

आलिलोक भूरियाचने हि[5] यासि मानवर्त्मन स्मयासि।

सामयतिदुष्टवृत्तेकेन दूरमुज्झितोऽसि इन्त नैव,

---

1 मूले 'भिन्तौ' पाठः।

2 मूले विन्यंवन्ती वी इति पाठः।

3 मूले नलित इति पाठः तेन छन्दोभङ्गः

4 'चिनोषि' एवं पाठः।

5 मूले सीतो इति पाठः।

जीवितासि कामिनीषु नायका विनम्रवक्रभाज एव।।
स्रन्धरा मौ म्नौ यो य त्रिः सप्तकाः। (7-23)
मरभनययया: प्रतिसप्तकं यतिः। उदाहरण-
नूनं पूर्णप्रतीक प्रियसखि चतुरोदीर्घयामांस्त्रियामा,
सीमन्तिन्धा नितान्तं[1] रचित रतिककलक्षमदेहोबभूव।
मुक्तामुक्तेतिपश्चात् कति कति समयान् प्रत्यहं स्नेहराग,
व्यामोहेनप्रसङ्गावदिकृशतरतां शीतरश्मिर्जगाम।।
इति प्रकृतिः।
भद्रकं भ्रौ[2] न्रौ न्रौ ग्नौ दिगादित्याः। (7-24)
भरनरनरनगाः। उदाहरण-
मानद भावकाः सुवहुलाःप्रदोष समयेत्वयापि कलिताः।,
कैरव वान्धवेऽथ विलसन्मयूखउदिते कथं नु विरलाः।
आलप आशते वरजनैः (नै ?) कृशाङ्ग्युवरेतवेक्षणकृते,
स्वागत एव चेह रमणे सकाशनचिराद्बहिः परियियुः।।।
इत्याकृतिः।
अश्वललितं[3] न्जौ भ्जौ भ्जौ क्स्लौ ग्रुदादित्याः। (7-25)
नजभ्जभजभसगा एकादशभिद्वादशभिर्यतिः। उदाहरण-
अयि सखि[4] किं विभर्त्सयसि मामहं न विगुणा नचापि परुवा,
कुटिलतमः तमे विधिवशादुपागत हदं स्वयं वितनुते।
कलयतु[5] मां कदापि रजनीवधूमकुटिलो न मुञ्चति निजा -

---

1 हलायुधटीकायामित्यत्र ग्लिलिवृत्तम्' इति सूत्रमस्ति।

2 मूले अत्र एकस्य लधोर्न्यूनता यथा- 'यॉचने यासि' इति पाठः।

3 'नितान्तंवित्तति इति मूले

4 ग्रौ इति मूले लक्षणमुशुद्धम्

5 मूले पूर्ण छन्दो लक्षणमशुद्धम् अथललितंन्जौ ज्भौ म्नो गुद्रादित्याः। इति पाठः परं उदाहरणं न संगच्छते सूत्राधारेण, अतः छन्दः शास्त्रम् संशोधितं लक्षणम्।

मनृजु रसौ नुजानु मिलितं समुञ्चतिकदाचिदेत्यभिवियत्।।[1]

अद्वितनयाक्वचित्। (7-26)

मत्ताक्रीडा मौ त्नौ नो[2] नलोग् वसुपञ्चदशकेः। (7-26) ममतननननलगा अष्टभिः पञ्चभिर्दशभिर्यतिः। उदाहरण-

मत्ता क्रीडामध्यें कान्तास्फुटकमधनवनमपसृतवती,

प्रान्तिष्यन्तं व्यग्रं कान्तं न तु वदनमिदं मिदमिति सरसिजम्।

लाब्रूवन्तं दुष्टंभङ्गैरधकुतुक विहसित रूचिरवदना,

संश्लिष्यन्ती पश्यंतीषु प्रतियुवतिषु मृशमुपहसितवती।

मन्ताक्रीडा क्वचित्। इति विकृतिः।

तन्वीम्सौ न्सौ भौ न्याविन्द्रयस्वरमालाः।[3] (7-27)

भतनसमभनयाः पञ्चभिः सप्तभिर्द्वादशर्भियतिः। उदाहरण-

कश्चनदूराच्चितरमतमयादात्मगृहेध्वग इति निशि याताः

तेन च तन्वी सह परमिलिता वेद न किञ्चन रतिरसवद्धा,

ज्ञातवतीतं परमथ सततं तस्य पुरः सखि हरति निलजास्यम्।।

इति संकृतिः।

क्रौञ्चपदामी स्भैं[4] नौ नौ गूशरेन्द्रियवस्वृश्रयः। (7-28)

भरमसभनननगनाः पञ्चभिः पञ्चभिरष्टभिसप्तभिर्यतिः।। उदाहरण-

मत्त चकोरी चज्चनेत्रे परिहररूषमपि मयि वत वितथाम्

का कृपितावा नाथ न जाने तुहिनकिरणमुखि कृशतनु भवती।

नास्मि सकोपा रेदिति तत्किं प्रियसति सुचतुरकृते इति भवतः,

किन्तु निमित्तं मानद तस्या विरहदहनयपि वत व (प)[5] रिसहसे।।

---

1 साश्रित इति पाठः।

2 मूले छन्दोलक्षणे मा त्नौ नौ लौ ग् इति एक नमणराहित्याद्दोषग्रस्तम्।

3 मूलेपाठे 'स्वरेयतो' इति पाठः।

4 मूले 'स्मौ' इति भगणस्थनेमगणोलिखितः।

5 मूले 'वतवरिसहसे' इति।

इत्यतिकृतिः।

भुजङ्गविजृंभितं भौ लौ नौ र्सों ल्गौ वसुरुद्रर्षयः। (7-29)

ममतननननरसलगाः। अष्टभिरेकादशाभिः सप्तभिर्यतिः। उदाहरण-

आकर्णं[1] नूनं काञ्चित् कोकिल[2] गणसहजसुकथितां मनोजमहीपतेः।

चिन्तामन्दं शीर्षशरश्वन्मलयपवनपरिमिलिताधुवन्तिमहीरूहाः।

आयांत्युच्चैर्भृङ्गादिभ्यः कतिचन विदधिति निभृतं विकृजितमंत्रणाम्।

अग्रे वाति व्यग्रश्रान्ताभरदहह विरहि नगरीकृतान्तमुखान्तरे।।

अपवाहको म्नौ नौ नो न्सौ गौ नव-र्सुरसेन्द्रियाणि। (7-30)

मनषट्कसगगानवभिः षड्ािः षड्भिः पञ्चभिर्यतिः।। उदाहरण-

आपीतारणसुचिषदसुशितवदनविकचकमलकुलसंशोभी,

कण्ठश्यामलमधुकर तुहिनकिरण पृथुकविषद् नवचक्राङ्गः।

कोऽपियुद्धवगणशुचिकलकलमृतसदमृतपदमरूकासारः,

पायान्मां विकटसृमरभवकृतभय[3] जनित विविधपरिसन्तापात्।।

इत्युत्कृतिः।

अथेदानीं दण्डकवृत्तान्याह।

दण्डको नौ रः। (7-31)

पूर्वछन्दसामेकैकाक्षरवृद्धया प्रक्रान्तत्वात् षड्विंशात्यूर्द्धमिहावसीयते। तच्च सप्तविंशति त्रिंशदादि प्रथमेति वक्ष्यमाणादिति। प्रथमादबहुवचनान्तं पञ्चम्यन्तं च तेन राःप्राथम्यात् पूर्वदिश[4] पञ्चम्याराश्च द्वयपराददण्डकं पृथक् स्यात्।

प्रथमं[5] चण्डवृष्टिप्रपातः। (7-32)

---

1 मूले 'आकर्ण्या' इति पाठो व्याकरणादसंगत।

2 अत्रोदाहरणे 'परभृदगणकथिता' इति छन्दोलक्षणाधारेण वर्णाः न्यूनाः।

3 मूले 'भव कुतभवह' इत्यत्र अर्थदृष्ट्यासङ्गतिः।

4 मूले 'दिश' इति भ्रज्ञन्त प्रयोगः।

5 छन्दःशास्त्रे 'प्रथमः' इति।

तुतत्वाद्रेफदण्डक इहावसीयते, न द्वयात् परैः सप्ताष्टादिके ये दण्डकास्तेषु प्रथमसप्तरेको दण्डकश्चण्डवृष्टिप्रपाताख्या उक्तं च रत्नाकरे -

यदि ह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः।

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंखादयः[1]।

इति आदिपदात्पञ्चदशादयोपि रेफा दण्डके स्युः ते चार्क चन्द्रेशपीयूष-वाराहावतारादयः। उदाहरण-

सकल भूषणदण्डधृक् पण्डितस्ताण्डवगण्डयुग्मण्डनाकुण्डलत्कुण्डली।

विषमसमरकाण्डयुगाण्डि या चण्डिमा पिण्डितोद्दण्डसत्पाण्डवाखण्डकः।

शिशिरशिखरिकन्यकास्वङ्गुलीयरूपयप्रोल्लसददोऽद्वल्लवीवेल्लित[2]-

स्त्रिपुरमथनशम्बरद्वेषणाग्रेजपाकेरूणाडम्बरत्र्यम्बक स हि मां त्राहि मां।

एवमर्णादावप्यूहयम्।

अन्यत्र रति[3]माण्डव्याभ्याम्। (7-33)

रातामममाड्उव्याच्चमुनेरन्यत्र संज्ञेयं ताभ्यां संज्ञान्तरभवकृतम्। तदनुज्ञानार्थं चेतत्।

शेषःप्रथित इति। (7-34)

अवशिष्टोऽयं दण्डकःप्रचिताख्यः स्यात्। तत्रैवोक्तम्[4] -

प्रतिचकसमभिधो धीरधीभिः स्मृतोदण्डको नद्वयदुत्तरेः सप्तमिर्येः।। उदाहरण-

जय जयशिव महेन्द्रादि वृन्दारकामन्द वृन्दामिवन्द्याङ्घ्रियुग्मारविन्द।

स्मरहरतुषारक्ष्माभृ-तजूजा-

मुखाम्भोजरोलम्बदंभारि शंभो।

हिमकर चरसमिस्ते समस्तेषु नास्ते

---

1 वृ. र. अ. 3 दण्डकप्रकरणे, पृ. 157 सु. 110

2 'श' इति

3 मूले 'वात' इति।

4 वृ. र. अ. 3 दण्डक प्रकरणे पृ. 159

अगत्सु प्रभो वस्तु[1] भूस्तथा वा।
श्रुति विपिन चर पञ्चाननः किं च -
कुंभेन तेनानतं नोऽन्तङ्घ्रिं नमस्ते।।[2]
इति उद्दिष्ट समाप्तिः।

कलिकालसर्वश्रीयास्तु दण्डकादन्य दवासौ[3] प्रचितः स थ दण्डकवत्प्रथमश्चण्डवृष्टिप्रपातान्यः। एकैक यकारवृद्धया तु पूर्ववदर्णादि समाहवयव इति वर्णयन्ति। दण्डक यति योग विभागादन्येपि तत्र।[4]

स्याद गुरर्लघुः क्रमादशोकपुष्पमञ्जरीति। (7-35) उदाहरण-
गण्डमण्डकोल्लसत् सुकुण्डलीन्द्र कुण्डलेश
पिण्डितातिचण्डतारकाण्डउण्डवे,
नखण्डितातिदण्डदानवेन्द्रमुण्डखाण्डिवारि-
गाण्डिवाद्य[5] वाहुदण्डपाण्डवेण (न)
संभृताति भागधेय दत्तहीन संभ्रमार्द -
जंभवैरि[6] कुम्भजादि वृन्दवन्दितम् ,
विश्व[7] वन्दिताङ्घ्रि शुंभसन्धिशुभंकालरात्रि,
कान्तं भवन्तमीशशंभवे भजे[8]।।
सगणैः कुसुमस्तवकं गदितम्।[9] (7-36) उदाहरण-

---

1 मूले 'वस्तूद्भूतस्त्वमधिकम् छन्दोभङ्गता अत्र

2 मन्तारङ्घ्रघ्रो इति मूले

3 नाभ्यां खद्यादयः प्रोचतः। छत्र नु. अ. सू. 369 नगण्द्वयात् परे यादयः सर्वेवर्णमणायदा भवन्ति तदा प्रचितः। (तत्रैवं सूत्रस्यवृत्ति)

4 इतः परं सप्तमाध्यायसमाप्ति पर्यन्तं छन्दः सूत्रे हला युधवृत्तौ च न किप्युलभ्यते।

5 "गाण्डीव' इदं शुद्धं किन्तु मूले माण्डिव इति।

6 मूले 'कुम्भं संजभादि वेरि' इत्येव पाठः अत्र अक्षरन्यूनतया पादपूर्ति र्न भवति।

7 'विश्व' इति संयोजित पाठः।

8 मूले 'भ्यामि' इति पाठः। अक्षरवृद्धिरत्र।

9 छन्दोऽनुशसने 'कुसुमास्तरणः' इति नाम्नाभिहितमिदं छन्दः।

रचिताभरणां विजया निजपाणिकृते मुकुरे सुकपालतलं श्रुतिगम्
कुसुमस्तवकं प्रतिविम्बित कण्ठगतासिति स प्रसमीक्ष्यकरेण मुहुः।।[1]
स्फुट कज्जलकभ्रमरभ्रमतोमृशतीकुटिलभुवमद्रिसुतां गिरिशः।
छलयन्मुहुरन्सरितः प्रकरोथतथाननुसाहिवति सुस्मितयाभिहितः।।
गुम्फितोरेभवेन्मतमातंगलीलाकरः। (7-37) उदाहरण-
भव्यदीव्यङ्गनातुंगवक्षोजत्रङ्गाहति क्षोभजस्फीतमन्दाकिनीभङ्गिभिः।
संगतेनातिमंदानिलेनोपसंवीजिते कल्पवृक्षटवीमंडितेमण्डपे।।
उर्वशीरम्भकादिप्रवृत्यत् स्फुरत् संभ्लीसंभृतेमज्युगुज्यत् सुरोजम्बके।
शैलवालाध्वलोरूहाम्भोजसत्कुङ्मलन्यस्तहस्तिश्चिरं चारू रेभे शिवः।।
लघुर्गुःक्रमेण वेदभवत्यनङ्गशेखरः। (7-38) उदाहरण-
अनङ्गशेखरस्मिते विरञ्चिरञ्चितभ्रुवे -
विधीयते स्फुरन् म1ुखं चकरोरलोचने।
कला कलाप चारू चातुरी धुरीणताव-
वलेपतो, विधातुमीदृशं सरत् सुधानिधिम्।
मुमुहुमुर्विखण्डयत् सुधाकरोति-
हन्त सन्ततं, परिश्रमं व्यनक्तिकेवलं निजा-
नभिभिज्ञतां, न वेद चेदमात्मनो मनेति-
मुञ्जसा प्रिये ध्रुणस्य यदवदक्षरम्।।
न गुरूतः स्युर्यदाण्टौ च रेफास्तदपान्नगेन्द्रो भवेद् दण्डकश्चित्तहारीसताम्।
(7-39)
प्रतिपदं पन्नगेन्द्रः क्रमात्, उर्धमेकैकरेजप्रवृद्धया चदम्भेक्षि।[2]
हेलावली मालती केलि कंकेल्लि लीलाविलासादयः स्युः पुनः।
सद्भिर्यथेष्टं तकाराः पतन्त्येव चेदेव कामात्परो वाणसंज्ञो
मतोदण्डको गद्वयं चाान्त उक्तम्।।

---

1 मूले 'प्रथममोक्ष्यकरेण' इत्यत्र सगणस्य सिद्धिर्नभवति।

2 मूले 'दम्भोलिह' 'ह' अत्र निरर्थकः।

यदि च न युगलाघयेष्ट। परैः पञ्चमात्रैर्गणैः श्रवरूवर्णेनिर्वद्धो भवेस्तु न
मित्यं भवेदुक्थनामान दण्डकोऽयम्।
यत्र यथेन्टमनुक्तमतोभगणाः निपतन्ति गुरूनिधने[1] स भुजङ्गविलासः।
यदि च लघुपञ्चकात् पण्डितः स्वेच्छया रान्तिवध्नाति
पूज्यैस्तदा चण्डकोलः स्मृतः।
यदि[2] किस लघु पञ्चकात् पश्चाद्यथेष्ट। यकाराःप्रयुक्तास्युतदा
सौमतः सिंहविक्रान्त नमा वुधेर्दण्डकोऽयम्।
यदि किल लघुभट्कादीर्घसंज्ञास्त्रयः स्युस्ततः संप्रयुज्यन्त एवं
यकारा यथेष्टं तदामेघमाला।।
यदा याः प्रयुज्यन्त एवं यथेष्टं तदा पण्डितैन्द्रैर्मतः
सिंहविक्रीडनामागुणिव्यूहसम्मानसम्मोदकारी।।
तदुक्तम् - यत्किञ्चित दृश्यते छन्दः धङ्विंशत्यक्षरधिकम्।।
शेषजात्यादिकंमुक्ता तत्सर्वंदण्डकं विदुरितिः।।[3]
शेषयातिश्च मालाचित्रादिका जातिस्कन्धे वक्ष्यते। उदाहरणा-
णानि चेषां विस्तरभयाल्लक्षणान्येव कृतानि।
दण्डको न वृत्तमिति भरतदर्शनत्[4]
तदेवं सक्षेपतः सृत्रकृता कतिपये विशेषतो लक्ष्तिाः।।
वयमिदानीं कवीनां कृते संत्रान्तर प्रसिद्धाः काश्चन विशेष संज्ञाः प्रचक्ष्महे।।
तत्रर्द्धसमे। (7-39)
असुजोः ससना गुरूयुजोः स्युः सभरायाः किल सुन्दरी प्रदिष्टा (7-40)
उदाहरण-

---

1 छन्दोऽनुशासने अत्र यत्र यथेष्टं भगणाः प्रयुज्यन्तेऽन्ते च गुरूदयं च भुजगंविलासः।

2 मूले 'यदिसतर लघु' एवं संदिग्धः पाठः। छनेनुशासनात्संशोधितः।

3 छन्दोनुशासने जतिप्रकरणे अत्र 2 पृ. 91 श्लोक 3868

4 'अतोऽधिकाक्षरं छन्दो मालावृत्तं तदिज्यते' भ. ना. शा. अ. 14 श्लोक 54 दण्डकेति नाम्ना नोक्तं भरतनाट्यशास्त्रे।

अयि लक्ष्मणपूर्वमन्यथासीद् , व्यवहारः कथमद्य हन्त वाच्यम्।
विरम क्षणमाश्रमेषु यावद् विनयं राजर्निवेद्धिम तापसानाम्।।
शिशुलीला क्वचित्।।
अयुजोः ससजा गुरूर्यजि सभरा ल्गौ कथिताा प्रियंवदा।। (7-41)
उदाहरण-
अभवः प्रभुरेव कानने, विरहे ते दयितेति जीवितम्।
अधुनापि तवास्मि तापसी, सहते चेदिदमप्यहो विधिः।।
प्रवोधितान्यत्र।
अयुजोः ससजा गुरूर्युजोः स्युः सभरागः कथिता परीक्षा। (7-42)
अयुजि नात् भरगा युजि ताभादयभरौ मुनिना कथिता मकरावली (7-43)
मात्सौगोऽयुजि, साद्धभसारचेद्युजिपादे कथिता किलकरिणी (7-4)
अयुजोः संसजा जगौ च युजोः पुनः सभराायः किल नालभविनीयम्।। (7-45)
नितम्बिनीयमिति भरतः।
भौ त लगोऽयुजि नो नो नसगा युजि तु मता किल विलतितलीला (7-66)
चिद्दशमेऽसमे ज्जनजनला गुरूरथसमे शिवयतिमानिनी जभजा।
अथ वदन्त नसौ (7-47)
अयुजिस्लगाः, युजि सौ सलगा यदि सा इला। 7-48)
अयुजि स्लगा, साष्टक युक् कविना गुणिना मुनिना निरणायि
मृगाङ्कमुखी (7-49)
राोऽसने[1] समे जरौ ल्गौकामिनी। (7-50)
रोऽसमे समे जरौ जरौ यदा तदा शिखी।। 7-51)
रोऽसमे[2] समे जरौ जगौ नितंबिनी।। (7-52)
रोऽसयमे समे जरौ जरौ जरौ लगौ मुनीन्द्र आहतां तु वारूणीम्। (7-53)

---

1 मूले रो समे इति पाठः।

2 मूले 'रो रसमे' इति।

रोसमे[1] समे जरौ जरौ जरौ जरौ मुनीन्द्र आहतां सतां मता पंतङ्गिनीम्। (7-54)

कामिन्याद्याः पञ्चासमसमलखणविपर्ययेणस्युः वानरिका, शिखण्डि, सारस्यपरा, हंसी च।

विस्तरभयादेवामूनि पृथङ्गोदाहृतानि। इत्यर्द्धसमाधिकार।

जातौ तु भाषाछन्छसि वक्ष्यामः।

अथैकाक्षरमास्भ्यसमेषु। (7-55)

उदाहरण- सा. श्रीः भूयात्

लुरू (7-56)

उदाहरण- शम कुरू। इत्युक्ता।

गौ स्त्री। (7-57)

उदाहरण- कृष्णस्याकम्।

तृष्णां छिद्याः।।[2]

लगौरमा (7-58)

इत्यत्युक्ता। [3]

स सती। (7-59)

उदााहरण- सहखि मे हृदयम्। दहति स्मरणम्।

धी चेत्। (7-60)

उदाहरण- माधव मा वद सा तव तोद्य।।

मो नारी। (7-61)

उदाहरण- गोपानां[4] नारीभिः

कृष्णोऽव्यादसक्तः।

---

1 रो 'समेऽसमे' इति विपरीतं लिखितं मूले।

2 मूले 'छिंद्याः' इति पाठः।

3 मूले अत्युक्तास्थाने उक्ता लिखिता।

4 मूले 'गोपानी' पाठः।

सूत्र- रो मृगी। (7-62)
उदाहरण - सा मृगी लोचना
खिद्यते[1] श्रीपते।। इति मध्या।
म्गौ चेत् कन्या। (7-63)
उदाहरण- आभीरीणां नाभी कूपे।
विष्णोर्मग्नश्चेतो मीनः।।
नगिति चेत्तरणिजा।। (7-64)
उदाहरण- तरणि जा तटगतमृहरिभगान्मदवती।।
इति प्रतिष्ठा।
भगौविति पङ्क्तिः (7-65)
भगगाः।
उदाहरण- वर्त्मनि कृष्णं, वीक्ष्य संकुभा।
काचन चक्रे, दत्ततृणानि।
अक्षरपङ्क्तिः क्वचित् ।
सलगैः प्रिया (7-66)
उदाहरण- चलकुण्डलाइहगण्डकम् ।
भजवल्लवी, गणमण्डकम् ।।
इतिसुप्रतिष्ठा।
शशिवदना न्यौ (7-67) उदाहरण-
प्रिय निजभावं यदि विदिषन्ती।
कपटशयानां शशिवदनासीत् ।।
त्सौ चेद्वसुमती।। (7-68)
त सौ ।। उदाहरण-
धन्या वसुमती यस्यां तव जनिः।

---

1 खिद्यति पाठः।

कृष्णं धृतपराहैवं नतमुखी।

द्वि या सोमराजी (7-69)

यथौ।। उदाहरण-

यदा सोमराजी नभोन्तस्तदास्यात् ।

समं वल्लवीनां मुखैः कृष्णलग्नेः।।

मौ नीवीस्याद्वन्हि (7-70)

त्रिभिस्त्रिभिर्यतिः। उदाहरण-

गोविन्दः कालिन्दी कुज्जान्तःसुक्षीरः।

आभीरीनाभी सुच्छेमा[1] भूमीवीनाम् ।।

इति मायत्री।

ननगि मधुमती (7-71)

ननगाः। उदाहरण-

मधुमतिकलित स्त्वदमलवदनः।

विधुरति सभया[2] समुधन पिहितः।

म्सौ मः स्यान्मदलेखा। (7-72)

मसगाः। उदाहरण-

अत्युच्चैः कुचकुंभ, छन्दान्तः परिवाहा।

हस्तिन्यास्तव मुग्धे, लासेमालीमदलेखा।।

सरगैहंसमाला (7-73) उदाहरण-

यमुनामूलकुज्जे, मुरलीनन्दसूनोः।

सुकलैरङ्गनानाभ्वदरदूती।। इत्युष्णिक्

नाराचिका तरौ लगौ। (7-74) उदाहरण-

मां कोऽपि नैव संवते,पान्थे[1] वृथैव जीवनम् ।

---

1 स्त्रुछेमा इति छन्दोभङ्गता मूले

2 मूले 'त्रपया' इति पाठस्तेनेह छन्दोभङ्गता।

झिल्लीख्छलादतः शाखोटकोऽपि रोदति।।[2]

त्नौ गौ द्विवडितिधीराः। (7-75)

तनमगाः। द्वाभ्यां षडिभश्च यतिः।

उदाहरण- प्रायो लघुरतिचितः, श्यामा भवति नितान्तम् ।

अभ्रंसितमिह पान्थः,पूर्णं कलयतधीराः।।

इत्यनुष्टुप् ।

स्यान्यण्डिउमध्यं भ्मौस् शरयुगैः।[3] (7-76)

भमसाः पञ्चभिश्चतुर्भिर्यतिः।

उदाहरण- कामकलासुकलान्ततरे[4] जीवितनाथे मन्ततमा।

संत्रुति स्म स्मेरमुखी, स्वंमणिमध्यं हारभरणम् ।।

सजरैर्भुजङ्गसंङ्गता (7-77)

उदाहरणम् - सुतनोविघेरकौशलं, कथयामि किं शुचिस्मिते।

मलयेद्धवापि वल्लरी[5] विहिता भुजङ्गता।।

इति वृहती।

दीपकमाला चेद भ्मौ जगौ। (7-78)

उदाहरण- गौपसुवेशीपञ्चसायकोद्दीपकमाला हारकः प्रियः।[6]

राजति कण्ठे प्राह तां मनः, पंक्तिरिवासां काममार्गेणे।।

म्भौ न्गौ हंसी श्रुतिरसयतिः। (7-79)

मभनगाश्चतुर्भिषड्भिर्यतिः। उदाहरण-

---

1 मूले पाण्ड्यो पाठः।

2 शाखोरको इति मूले

3 स्वयुगैः इति पाठः।

4 मूले 'क्लान्तलरे' इति पाठोऽर्थदृष्ट्यासंगतः।

5 वहवरी मूले

6 मूलेग्रन्थे लक्षणे 'म्तौन्गौ.' इति द्वितीयोगणस्तगणः प्राप्यते किन्तूदाहरणे द्वितीयो गणेशभगणः अतः लक्षणे संशोधनं कृतम् ।

व्याधैरूऐ स्वनितदयिते, हाहा हंसी सपदि विकला।

वाला व्यग्री किमपि न जगोदीनांदृष्भिं परमुपदधौ।।

सुचरिरिष्विषु नजनगैः। (7-80)

पञ्चभिः पञ्चभिर्यतिः। उदाहरण-

स्त्रलसग[1] (स्थलगत)? निर्धारयुवतिः सु/र/ति/सु/[2] कला चतुरतरा।[3]

पथिसुभृशं निहितदुशा[4] शयनगतेरमणमगात् ।।

त्वरितगतिः क्वचित् ।

नरजगैर्भवेन्मनोरमा। (7-81) उदाहरण-

जलधरेण धारकाच्छलादह नीरवंनिशान्तरे।

विरहिणी प्रमापणेच्छयातस्व शररश्मयः[5] समातताः।।

इति पंक्तिः।

पञ्चरसैः श्रीर्भतनगगाश्च।[6] (7-82)

पञ्चभिः षड्भिर्यतिः। उदाहरण-

यापरिपूर्णं जलधरमुच्चै, राश्रितपूर्वा किल बहुवेलम् ।

तुच्छमथास्वं शरदिन यायात्[7] तां चपलां धिग् विपुलनितम्बे।।

नजजलगैर्गदितासुमुखी। (7-83)

उदाहरण- किमपिदृशोस्तवक्ज्जलकं न कृतमयाप्यधरेरूणिमा।

उषसि सखी[1] व्यधयेति नवा नतवदनाव्यलिखत सुमुखी।।

---

1 अत्र मूले 'स्त्रलसग' इति संदिग्धार्थैः पाठः।

2 मूले 'सूतिकला' इति, तेन वर्णन्यूनत्वम् ।

3 'चतुरतर' इति पाठः।

4 मूले 'दृशं' इति पाठः।

5 मूले 'च्छयात् जिशररयय:' इति पाठः। अथदृष्ट्या अशुद्धः

6 मूले द्वितीयो गणो गणः प्राप्ये किन्तु दत्तोदाहरणे द्वितीयोगणः भगणो नास्ति। अत उदाहरणाधारेण लक्षणं संशोधितम् ।

7 मूले ग्रन्थेसमौज्जात्रां इतिपाठः अद्यर्थोऽस्पष्टः छन्छोभङ्गता च।

ननपरलगुरुभिः सुभद्रिका। (7-84)

उदाहरण- प्रतियुवति गिरामुदीरणा अरुणितनयनंपुरः प्रियाम् ।

अतिलघुकलयन् प्रियः स्मयन्नपचरितपदैरपूयत् ।।

मौक्तिकदाना यदिभतनाद्गौ। (7-85)

पञ्चभिः षड्भिर्वतिः।

उदाहरण- पादगतेऽपिस्फुटमपमानाद् गन्तुमनस्के वहि रथकान्ते।

मन्दिरमेकच्छलमुपकल्पा द्वारमुदारा सपदि रुणद्धि।।

रसशरो शिवा त्रौ र लगो।। 7-86)

षड्भिरः पञ्चभिर्यतिः। उदाहरण-

स गुरूमन्दिरे धूमसंञ्चयं सृजतिरोदितुं हंत वन्धने।

श्रमदकर्मणि श्वास सोत्थितं[2], कठिनसज्जते सा कृश्शोदरी।।

ससजा गयुगं सुमध्यमास्यात् । (7-87)

उदाहरण- सुगभीरतरानताङ्गिनाभीः तव किंरचिता सुमध्यमायाः।

कलितं कुचयोः परिक्रियाया अवरो नवयौवने च चक्रे।।

उपस्थितमिदं ज्सौ ताद् गकारौ। (7-88)

जससगगाः। उदाहरण-

अपूरयदसौ याः स्वैस्तडित्वां दरिद्रपरमाघर्मेण सिन्धुः।

उपस्थितमिदं पश्यन्तु देवं, पिपासति सभागत्यैव ताभ्यः।।

सससैश्चलगैश च मदलेखा। (7-89)

उदाहरण- द्रहिणः कठिनातिमदालसे विदघेनपुरा हि तवाधरम् ।

न भवेदयि हन्त सुधाकृते न[3] परावृधिदेव परिश्रमः।

स्यान्मेटनं तजजाश्च लगौ। (7-90)

---

1 मूले सखीवदनमेति अत्राक्षराधिक्यम् छन्छोभङ्गता च।

2 मूले श्वाससमुच्छित मितिवर्णाधिक्यात् लक्षणे असंगतिः।

3 मूले एकाक्षरं न्यूनं 'सुधाकृते पराबृधिः इति पाठः।

ब्रूमः किमहो तववारिद हे दत्से ननु जीवनमेव परम् ।
स्थानंन विचयसेऽपि तथा, स्वच्छो न ददासि कदाचिदपि।। इति **त्रिष्टुप्** ।
चन्द्रवर्ण्य रनभा स[1] मुनिविशेखैः। (7-91)
रनभसाः सप्तभिः पञ्चभिर्यतिः। उदाहरण-
चन्द्रवर्ष्मघटितं सखि विधिना काननानलकुलैरिति नियतम् ।
दंदहीति[2] विषमं तनुमखिलांश्यामभस्म चतनौ मृगभिषतः।।
चन्द्रवर्त्म क्वचित् ।
श्रुतिवसू नभजरैः प्रियम्वदा। (7-92)
चतुर्भिरष्टभिर्यतिः। उदाहरण-
इतपुरे किमिव नोच्यते जनै, रिति मया तव कथाप्रसञ्चने।
सचकितं श्रुतियुगं पिधीयते, प्रियमिति प्रतिजगौ प्रियम्बदा।।
त्योत्यौमणिमालाछिनन गुहवक्रैः। (7-93)
षड्भिः षड्भिर्भवतिः।
उदाहरण-
निद्रालसनेत्रान्यञ्चत्कुचचेला, वालामणिमालां दिन्नामवितल्पम् ।
प्रातः परिचिन्वत्यारादभिलोच्य स्मेराः[3] प्रियनरीरासीन्ततवक्त्रा।।
धीरेरमाणि ललिता तभौ जरौ (7-94)
उदाहरण-
तन्विप्रसीद कुरूणे मुधारूपं, दोषोऽस्ति चेन्मम तदा वदस्फुटम् ।
एवंप्रियेण ललिताभिधाषिता ससंचकार करयुग्म योजनाम् ।।
नरभरसहिताभिहितोज्ज्वला। (7-95)
उदाहरण-

---

1 सूत्रे 'रन भा' इत्येवलिखितम् , वृत्तौ तु सगणोपि लिखिताम् । छन्दसि सगणस्यौचित्यमस्ति।

2 मूले 'दहंहीति' पाठः।

3 मूले 'सैराः' इति पाठः अर्थदृष्ट्यासंगतः।

प्रियसखि वद[1] काचन मुग्धा, प्रतिगृहयुवतिर्व्यथतातथा।
जनि दृढ सखि तानपि मद्विधन्प्रवदति न यथा क्वचिदुत्सवे।।
अब्ध्यङ्गैः स्थाज्जलधरमाला म्भौस्मौ। (7-96)
चतुर्भिरष्टभिर्यतिः। उदाहरण-
मध्ये त्वं कं जलधरमालामुच्चै, र्यान्ती वैल्लच्चपलवलाकांदृष्ट्वा।
स्मारं स्मारं जनकातनूजावस्थामस्थाद्रामः करकृतगण्डस्तृष्णीम् ।।
मात्नौमश्चेत् सागरवसुभिः[2] श्यामाः। (7-97)
उदाहरण- अप्येकस्मात् कामिनिकरतः पीडंवशोजौ तेप्राप्यतु लघुतादोषात् ।
मानेनोच्चैरून्ततिनियतीयातौ श्यामे यन्तस्यादपि बहुलैः किञ्चित् ।
भवति न जावधमानिनीजरो। (7-98)
उदाहरण-
अविनयते यदि मेति मालिनी, जनकसुतेनददासि दर्शनम् ।
अयिकठिने वद वत्स[3] लक्ष्मणं विकलतरं तदपेक्ष्से न किम् ।।
मालतीक्वचित् ।
इह वद तामरसंनजाजायाः। (7-99)
उदाहरण- परिहरतामरसं सखि शोणं करतलयोः कुरूपाण्डरमेव।
प्रथम[4]विलोकन मङ्गलकाले, कलयतु मा पतिस्द्वसमाणिम् ।।
कमलविकाशनिका क्वचित् ।
वाणहयो क्तौनितिसिति ललना। (7-100)
भतनसापञ्चभिःसप्तभिर्वतिः।
उदाहरण-
मन्दमनीषालयभृतनगरीं यावदमन्दं प्रतिशति चतुरः।

---

1 मूले 'कय' इति लिखितम् ।

2 मूले 'वस्तूभिः' रिति पाठः।

3 मूले कठिनेवलवस लक्ष्मणं, इत्ययं पाठोऽर्थदृष्ट्याछन्छोदृष्टयाचाप्यसंगतः।

4 मूले 'प्रथविलोकन' इति पाठः

तावदमुष्ये वितरति गमनादप्यमृतांशुंकरमनुललने।।

सभारायः श्रुतिभूधरेः सुभव्या।। (7-101)

चतुर्भिरष्टभिर्वतिः। उदाहरण-

अतियत्नः सरसीरूहाणिा राका तुहिनांशु शतधाविधायवेधाः।

चिरकालार्जितकैशलः सुभव्ये वदनं ते छटपांबभूवरूपम् ।।

मत्यौ सश्चे द्वैदवसुछिच्चतुरा। (7-102)

मतयसारचतुर्भिरष्टभिर्यतिः।।

उदाहरण-

अश्रान्तं मे चाटुभिराजीवचनै नैवास्त्राक्षीस्व[1] च परं मां चतुरे।

प्रत्याख्यातापीति नवोढा वलितग्रीवं शिलष्यत्याकृतचेलादपि तम् ।।

मुनिशरविरतिःसुधा नानौर्यो। (7-103)

उदाहरण-

कलुषितममलं कुलं खरांशो,र्मुनिजनपुरतो यदश्रुधाराम् ।

क्षणमनुवितनोमि वत्स तस्मादनुसरविपिनं न यत्रलोकाः।

भेस्तु चतुर्भिरिहद्रुतमिच्छति। (7-104)

उदाहरण-

षटपदसाधुकरोपि यदृच्छसि, सत्समयेष्वचिराय न तिष्ठसि।

त्वं च तथा नियतं सरसीरूह निष्कपटं द्रुतमेव हि यच्छसि।।

इति जगती।

तुरगरस यति र्नां ततो गः क्षमा। (7-105)

उदाहरण-

वचनमिह कृतिन्यगजनानां सदा करणमभिहितःसाधुतुङ्गात्मनाम् ।

पृथगिदमुभय मध्यमानामिति, प्रियसखि करवै किंभेथः क्ष्याम् ।।

कु टिलगतिः क्वचित् ।।

---

1 मूले ग्रन्थे शुचें' इति पाठः।

सजसा जगौ च भवतीह नन्दिनी। (7-106)

उदाहरण-

अपि भुग्नकन्धरभराविलोकते तरणिं मुहुर्जनकरजनन्दिनी।

हृदयाधिपस्य दिनमध्यकर्मणः[1] परिलब्धविश्रमसुखादिनान्तरे।।

कनकप्रभा क्वचित् ।

प्रवोध्तिामिज्जुभाषिणी सुनंदिनी च जतौ सजौ

गो भवति चारू भषिणी।। (7-107)

उदाहरण- विभिन्नचित्ता अपि च सम्भवन्त्यहो

वहिः सुवृत्तौ कितव लोकरज्जनाः।

किरातकान्ता ललितचारूभाषिणी

स्वभर्तृपाणौ हरिणकानमेलयत् ।।

ननतर गुरूभिरश्चन्द्रिकाश्चषड्भिः। (7-108)

सप्तभिःषड्भिर्यतिः।

उदाहरण-

अयि परिकुपिते किं निज़ेऽपि कोपः क्षणमपिसुतनोसंतनुस्मितं तत् ।

तव हृदयहरःपञ्जरे तृषार्न्तः पिबहतु परि कुहूं चन्द्रिकां चकोरः।।

उत्पलिनीक्वचित् ।

सजसाः सगौ च घटितः कलहंसः। (7-109)

उदाहरण-

अलदं विलोक्य परितः परिससुः, सरसा विहारयसरसीः कलहंसाः।

विमलत्मनां समुचितं परमेतन् मलिनोदयेऽपसरणं यदकाण्डे।।

सिंहानादः क्वचित् ।

म्भौ न्यौ गश्चेच्छुतिह्यनयनेः कान्ता। (7-110)

उदाहरण-

1

रात्रौ चयडद्युतिरितिकलयेत्को था, शीतांश्श्चेदविदहति परितः कस्मात् ।
ज्ञातं चण्डिद्विषिशशिनगतै क्रान्त्या भोगश्चंडत्विज इह विधिनाकृष्टः।।

नजजरगा रतिलालसाः शरोऽष्टौ (7-111)

उदाहरण-

वृत्तिविवरेरपनिद्रकान्तवक्षःपरिमिलितद्युमणेः समीक्ष्य सूतान् ।
अतिगलितच्छविमाशुदीपमुच्चैरकृतगुरूं रतिलालसाालताङ्गी।।

मृगेन्द्रमुखंक्वचित् ।

तो भ्सौ जगै श्रुतिखचरेःप्रभवती। (7-112)

तभसजगाश्चतुभिर्नवभिर्यतिः।

उदाहरण-

याातादृशोरपिपदवीं प्रभावति, सृष्टाप्यहो हरकमले स्वमानता।
कण्ठे कृताप्यभृतलता परं स्वतो, वाच्छज्ञपयच्युतमपिपूर्ववद्भवेत् ।।

नयुगलसयुगलगैरिति चण्डी। (7-113)

ननससगाः।

उदाहरण-

सदतिथि[1] लघुचलिताऽऽहमगारं, तव चिरमनुसखि तत्परिगृह्य।
कथमपिगुरूधटमेहि भणन्तीमिति चलदधर रूिवेक्षतचण्डी।।

उपचित्रापीयम् । इत्यतिजगती।।

इन्दुवदना भजसनैः समुरूयुग्मैः[2] (7-114)

उदाहरण-

पूर्वगिरिदावदहनोत्पतितमुत्तका पिण्डमभितः सरति नक्तमिति भीता।
इन्दुवदना भजति सायवमवशेका मन्दिरमिदं पथिक कुत्र भवितासि।।

वरसुन्दरी क्वचित् ।

---

1 अत्र व्युत संस्कृति दोषः

2 अ स इति सहितार्थकः।

सजसा यलौ[1] च गुरूणाभवेदुत्करः।। (7-115)

उदाहरण-

गमिता मया नवरताध्वभूरिश्रमं, सखि मा वृथातिवचनैरपि श्राम्यसि।

अधमाः प्रयान्तुपुंनरेव वेतस्वतीं गतवत्[2] कथञ्दिदपवाहयिष्ये क्षणम् ।

नटगतिरिति जलनिधिगुण्ने गौं। (7-116)

नननननगगाः।

उदाहरण-

भ्रमरकविचलितकुंचसिचयान्तांप्रतिमुखविदितविलसदुरूमूलम् ।

श्रमजलक्षणचितवदनसरोजं नटगतियद्रुपतिरमण[3]मपरयत् ।।

द्विर्वहिरविलोल म्सौ म्भौ गौ चरणे चेत् । (7-117)

मसमभगगाः सप्तभिःसप्तभिर्यतिः।।

उदाहरण- ऐन्द्रे चेन्मणिराजे सौवर्णी मृदुलेखा,

जीमूते नवखेतां शान्त्यादविलोला।[4]

श्रीवत्साङ्कितवक्षः पट्टान्तर्भिलिताया,

राधायाहरिजानुस्था सा प्रतिमापि।।[5]

म्भौ न्यौगौस्याात् कुटिलमुदधिषडब्रह्मास्यैः। (7-118)

मभनयगगः चतुर्भिः षड्भिश्चतुर्भियतिः।

उदहरण-

आस्सामास्तां कुटिल कितव वाक् चतुर्य्यं वच्मि त्वं मे प्रियइति लघुगच्छेस्तस्मात् ।

---

1 मूले अत्र 'यनौ' इति पाठः।

2 मूले 'वेतासी' मित्यत्रन्यूनाक्षरं तस्माद् छन्दोभङ्गता।

3 मूले 'यदुपतिरगमश्यत् ' इति पाठः। न्यूनाक्षरमत्र।

4 ग्रन्थे निवकेतांशान्यादविलोला' इति पाठः।

5 चतुर्थचरणं लक्षणादसङ्गतम् मेले तर्हिआनुस्थस्तामप्रतिमपि इति पाठः।

सा चेद् देवी तवविरचितमेतत् विद्यात् , धिकस्वनीधानहमिन नच सर्वानार्य्यः।।

मुनिमुनिविरति नो ततो गौ सुबन्धुः।। (7-119)

उदाहरण-

वद वदसि न किं हन्त राम क्व सीतेत्यनवरत वचः स्पृष्टचीराञ्चलानाम् ।

विहरणमनसां तापसीवालिकानां ज्वलयति नितरां मर्म सीतासुबन्धोः।।

नन्दीमुखीक्वचित् ।

जतौ नरौ रूपो शरनवभिः शुचिस्मिता। (7-120)

उदाहरण-

गरीयतोच्चैस्तुलयति यत्स्फुटं लघुं वणिकपशुस्तत्फलमवलोक्यतां[1] पुरः।

शिरो यदस्याक्रमितुमसौ समीहेते, जगाद जीवाधिपतिमिदंशुचिस्मित।।

मा त्नौ मौ गौ वेदवङ्दधि छिद्रासन्ती।। (7-121)

उदाहरण-

श्रीखण्डादेरूत्कटशिखरात् पादात् खज्जः

तद्वासन्तीमानतकुसुमामलिङ्ग्योच्चैः

भागीरथ्यावारिणिसुततो साधु स्नात्वा[2]

सेवायै ते भामिन पवनः प्रत्यायातः।।

मौ मौ गौ स्याद् वेदैर्वेदैः षडिभर्लोलीकामः। (7-122)

उदाहरण-

हस्तेनोच्चैः कष्ठेगाढं वद्धे मातुः सिंहे

प्रत्याघतत्रुटयत्पृष्ठे[3] गजर्जन् प्रत्यारूढः।

अभ्यानीतं मात्रा दूरे आद्यं दृष्टवादृष्टवा[4]

---

1 मूलेवर्णिकपशुरिति पाठः।

2 मूले स्नात्वं इति पाठः।

3 मूलपाठे 'त्रुद्यत्पुष्टे' इति पाठः।

4 'द्दष्टा' इति मूले।

व्यादादालःपाणिं लीलोद्दामः पद्मीन्द्रास्यः।।

इतिशक्वरी।

भवति नजौ म्जौ रसहितंप्रभद्रकम् । (7-123)

उदाहरण-

जनकमहेन्द्रपुत्रि मिहिरान्वयस्नुषे,

जनसविधे न यस्यसि निरूढजज्जया।

गुरूतर गर्भभारकलितासि तेन ते

जलमपिदुर्लभं हदयं[1] किं न दीर्यसे।।।

सजना नयो शरदशयतिरतिवेला। (7-124)

उदहरण-

रूचिराननेसुण सुणु ह व अणचन्दा

रे इलालले अभिजकेणमम् इसव्यम् ।

णणु पृष्णिमागक्षण मिलि जगुण या णा,

मा तज पत मोहहमि अरह पणणाम् ।

मौ मो त्यो चेदेद्वैवेदे रश्चैर्मत्तमृगेन्द्रः (7-125)

उदाहरण-

जीभूता नामा निर्घोषा[2]नन्दमत्तमृगेन्द्रो

हुंकारांश्चेत्[3] कुर्वन् गवां धत्ते तत्पशुरेव।

किं न श्वानः[4] स्पर्धायन्ते शादूर्लोर्जितगर्ज्जे,

युक्तं[5] तस्माद् बुध्येन्नुच्छं यद विन्द[1]न्त्युतधीराः।

---

1 'इद' इति पाठः।

2 मूलग्रन्थे 'नियोषा' इतिपाठः।

3 च तु इतिपाठः।

4 मूले शर्ब्बायं पाठः।

5 द्युक्तं इति पाठः।

आम्रौ माय्यौ[2] तरङ्गैरब्ध्यर्णवैश्चन्द्रलेखा।। (7-126)

उदाहरण-

सद्वृत्तक्षीणभावा वक्राप्यसौचन्द्रलेखा,
साधूनां लोचनानां कान्त्या[3] प्रिया जो भवीति।
काले चास्याः कर्तु स्यात् सा वक्रता क्षीणता वा,
पाषाणाः किं सुवृत्ताः पुष्टाङ्गकाः पश्य न स्युः।।

सप्ताष्टकैर्यतिभिरित्येके।

एक न्यूनो विद्युन्मालापादौचेल्लीखेलः। (7-127)

पञ्चदशगुरवः।

उदाहरण-

गौर्या स्कैन्धे कृत्वा वाहुं प्रेमालापैर्विष्टस्य,
श्रीकण्ठस्यस्थित्वा पृष्टे शुण्डादण्डेनाकृष्य।
स्वर्द्धुन्यामातुः स्मेरास्यायाः विक त्वा पादारम्भेजे,
प्रकर्षीद्वालोहास्यं लीलाखेलाः पद्मीन्द्रास्यः।।

विपिनतिलकं नसनरेफयुग्मेर्भवेत् । (7-128)

उदाहरण-

सखि कुशलि किं गृहमयेन सुप्ते परैरयिपरिवदामि किं तां तदा जीवति।
कुतुकमपरं श्रुणु विलोक्यतां सत्वरा, विधिरपिविधातुमपरांसमासज्जते।।

तूणकं समानिका पदद्वयं विनान्तिमम् (7-129)

उदहरण-

---

1 मूले पूर्णं पदमेवाशुद्धम् 'यद्विसजरूर्जतधीराः' इति पूर्णः श्लोकोऽयं क्वचित् छन्दोदृष्ट्या क्वचिदर्थदृष्टया चासङ्गतः।

2 मूले अत्र आम्या रान्रो इति लक्षणं लिखितं किन्तूदाहरणेनघटते अत उदहरणनुसारं लक्ष्णं निर्मितम् ।

3 मूले 'कान्त्ययासुप्रिया' इत्यत्र यगणः प्राप्यते किन्तु सु इत्यनेने यगणस्य हानिर्भवति। तस्मात् प्रियाया भवीति इति पाठः कृतः।

सन्निशम्य नाम सास्य मात्रतः समागतं, साभवन्तमाशुनिष्पुरा गतेवदेहलीम् ।

आलद्यो वयं मिथो सुखाहिते क्ष्णाः स्थिताश्विववन्मुमो च सापि वाष्पमानताननना।।

वेदेर्वेदे रश्वैरिछन्ना मौ मयौ यश्च चित्रा (7-130)

उदाहरण-

पारावारे रत्नावसे रामभद्रेणगाढं,[1]

वद्धे वालादन्तश्चारीवाडवाग्निश्चिराय।

भेजे लङ्गनारीणां हृत्कन्दशः सान्द्रमारशु

सेतस्वत्यः पत्न्योद्विग्ना मेजिरेलोचनानि।।

इत्यतिशक्वरी।।

नजभजरा गुरूर्भवति वालिकेतिनाम। (7-131)

उदाहरण-

कथमपिसम्वृत्ता न्तरविदाहदुर्विकारा,[2]

पदयुगले सखीजनवचोभिराविलग्ना।

गुरूगणलज्जितेन वत वालिका मनाग,

प्यतिकठिने न हन्तेन मया विलोकितापि।।

बालिनाक्वचित् ।

पञ्चभ्कारयुताश्चमतिर्यदि चान्तगुरूः। (7-132)

उदाहरण-

वीरगुरोर्भवदृश्यगतिक्षतभूतलतः प्रोस्थिधूलिभरेण नभोगतमद्रिदरीः।

स्वत्परिपन्धिवधूभिरितोपि च दूरकृतं, रोषभरेण समग्र सदेवरुद्रायतनम् ।।

लघुगुरूर्यदाक्रमात् तदाह पञ्चचामरम् (7-133)

उदाहरण-

परिस्त्रवन्मदाटविस्फुरन्मतङ्गजोत्मादशिक्षि मन्थरागतिशिचराय याभिरादरात् ।

---

1 फत्न्योविग्ना इति मूले

2 विकार इति पाठः

पठन्तु इन्त ताद्वृतं दशाननत्वदङ्नाः वषाभिधातजश्चस्तुरङ्गरङ्गरङ्गणम् ।।

शैलशिखाभरो नभभगा दशषड्भिर्विरतिः। (7-134)

उदाहरण-

हन्त वसन्तसन्ततवहप्रतिभीषयते,

किञ्चमृगाङ्गाः माधवी मुधाकलकण्ठि च माम् ।

भूत मया वियोगदहनज्वलितावसिते,

वर्ष्माणि मे यमस्य चरदाःपरिर्जिताः।।

भ्यो ननगे ग्रैहाश्चभङ्गा किल वरयुवतिः। (7-135)

भरयननगाः नवभिःसप्तभिर्यथ्तः।

उदाहरण-

तल्पमुपेत्य वीक्ष्यनिद्रां मम मुकुलदृशो, या विभराज्चकार पाणिं निजकरकमले।

पीनपयोधरेऽप्यनाभाव नु जघनतटे,

सा विरहेऽपि किन्तु जीवेत् तु सुवरयुवतिः।[1]

चित्रसंज्ञमीरितं समानिकापदद्वयन्तु (7-136)

उदाहरण-

सम्द्रतेन कञ्चनेन निन्दितासि पक्ष्मलाक्षि,

वेधसेतिचित्रमेतदेव तावदेकमात्रम् ।

किं पुनर्यदद्यापि मार्दवंन मुञ्चसीति, [2]

किञ्चि इअह तन्वि वच्मि सृष्टिरेविकाऽन्यथैव।।

म त्यौ मः स्मौवेदशराश्चैरूक्तपीननितम्बा (7-137)

उदाहरण-

श्रान्ते कान्ते कामकलासु व्यत्यासमितान्तं,[3]

---

1 लक्षणे एकाक्षरंन्यूनं मूले जीवेतु वायुवतिः इति पाठः।

2 चापि इति मूले

3 व्यस्यासायनितान्त इति पाठः

फादान्ताद्यैः कुर्वथ्त याज्वाकोटिःपीन नितम्बा।

स्मेरापाङ्गैरानतवक्त्रा कलान्तं देहमकृष्य

स्थूलस्यस्याः श्रीण्किुचोस्क्षीणं मध्यमपश्यत् ।[1]

भन्[2] মममा स्गौवनमत्ता (7-138)

उदाहरण-

दूरभुरोजश्रोणिद्वन्द्वे वर्द्धेते सविवादं,

यौवनमनते वहध्नस्येतं मध्यस्थं सुदरिद्रम् ।

मुज्यधवेनेत्युक्तापाणिं नीवीप्रत्युपनीतं

साधु कृपेति स्निग्धालापाद्धे साऽश्रुकराभ्याम् ।।

म्भौ नो म्नौ गोवदकमलिनी वेदैः षड्तृभिः (7-139)

उदाहरण-

त्यक्तवा मोहा कमलिनीं दूरादुपगतः केतक्याधिक् सविधमगमं दुष्कध्टककुलेः।[3]

आस्तां सर्वं कांमिव पुरस्तस्याःपुनरहो,

यास्यारीति प्रियनतशिशराः क्रन्दत्यलिरसौ।।

मदनललिता क्वचित्

भत्समतनगैरष्टछिन्नैस्यादिह चलिता। (7-140)

उदाहरण-

सन्मणिकुकुरेचिह्नं भोगानामतिललितं,

कापि रहसि पश्यन्ती हृष्यन्तीन च युवतिः।

पुष्टीमिलितजीवेशं दृष्ट्वान्तः परिचकिता,

कज्जलरचितां रेखामङ्गुल्या परिमृशति।।

वेद[1] (विद्धी) यतिरिह षड् वेदैः षड्ीिः स्यादगुरूजधरा। (7-141)

---

1 अपश्यन्तम् इति पाठः। अन्ते एकाक्षरमधिकम् ।

2 इत्यत्र पञ्चम्यन्तत्वात् नकारस्य नगणोनार्थः।

3 मेले दुः कण्टक इति।

उदाहरण-

सुन्दरिकुचयोः श्रोण्योरूच्चैगौरवमधिकं,

वीक्ष्य नपुरूषीभावो योक्ता त्वां निजदयितः।

आलय इति ते मन्यन्ते मे पश्यन्ति हृदयं

योक्ष्यति नियतं माढाश्लेषं वाञ्छन्ति सहिते।।

यमौ नःस्त्रौ गश्चेत्प्रवरललितं षड्सोब्धिः। (7-142)

उदाहरण-

यदासौदोक्षिण्ये प्रियसखि विधिः स्यान्तदानीम्

कराद्यैः पीठायामपि न तु अनोबुद्धिमेति।

प्रवामा[2] रूद्ररूपतनमचिरादेवमेवं

ततान[3] प्रेक्ष्येथाः कुवलयलसल्लोचनानाम् ।।

गरूडस्तं नजो भाजतगैरिहाविश्यते।[4] (7-143)

उदहरण-

बहिरबहिश्चिरं हुतभुजाभिदग्धा प्रिये,

क्षणमपि वल्लभे शुभमिवाति भाग्योदयैः।

गुरूचरणाः[5] प्रिये सुसखि मां यदाचक्षते।

दयितदंकित तदीय हन्त किं वक्ष्यते।।

इत्यष्टिः।

यदिभवतो नजौ भजजलागुरूमुत्कटकम् ।। (7-144)

उदाहरण-

---

1 पूर्वोक्तमेवछन्छोलक्षणमत्रघटते। मूले अत्र विद्धि इति।

2 प्रवामातिरूद्रा इतिमूले, एकाक्षरमधिकमत्र

3 तनानवेक्षेथा इति पाठोमूलग्रन्थे।

4 मूले गमन्यै भजभगैरिहाविश्यते इतिलक्षणमस्ति किन्तूदाहरणे न संघटते

5 मूलग्रन्थे गुरूचरणाः पिबत मां यदाचक्षते एवं पाठः। अत्रार्थ्दृष्टयाक्षर दृष्ट्याप्सङ्गतः पाठः। पूर्णचतुर्वश्चरणः संशोधितः।

सुभग किमन्यदत्रकथयामि तवानुचितं
त्वयि पदपञ्चपाणिचलिते ध्रुवमुर्तिकया।
कटकमपास्य तस्य सदनं जगृहेऽय तते
नतमुखमङ्गदे अपि निजस्थलतोपसृते।।
लकुटकं क्वचित् ।
अवितर्थ च।
तुरगरसार्णवैः कृतपति[1] वद कोकिलकम् । (7-145)
उदाहरण-
कृशतनु पुत्रिके मृदित पङ्कजकोषनिभं,
वदनमिदं तवाजनि दिवाकरउष्णतरः।
तदिह दिनं नयेत्यभिहितामुनिदारजनैः
जनकसुताप्रियस्थसुखमैक्षत[2] नो विरहः।
म्सौ त्यौ भ्गौ गिषुवाणग्रैर्यतिरूक्तं ताण्डवमेतत् । (7-146)
उदाहरण-
भ्राम्यद्भ्रमरलीला व्याकुल निर्य्यात् पेणफणौघ
व्यालब्याच्युतरत्नप्रापणनृत्यद्भूतकुमारम् ।
स्मेरस्थाननचन्द्र क्ष्माधरपुत्रीनेश्रविलासम्
शंभो सम्भ्रमजम्भद्विन्मुखदृष्टं ताण्डवमीडे।।
न र जसे र्थलौगुरूवैसुनवच्छिदुक्तावली[3] (7-147)
उदाहरण-
ऋजुपथ जगिति वाग्विहसितं समन्ताद्गतिं,
पदयुगं विलतं प्रमुखभावनालोकितम् ।

---

1 कृतयविवद' इति मूले
2 'रोविरह' इति पाठः।
3 उक्तावला इति मूले। अस्मिन्छन्दसि रगणस्य समावेशेनोदाहरणं सङ्गतं भवति।

उरसि छन्छयो दसौ विरचना नु तन्मन्महे,[1]
बहु समागतो वलां पुरमिमां परःपार्थिवः।।
वेद-तुग्रेर्मभनमयलै[2] गश्चे-तदा हारिणी। (7-148)
उदाहरण-
या वै गीतान्मधुरवचने मा म विरंसी रये
कीर्तिपुण्यंकरतलगतं कस्मादिहोपेक्षसे।[3]
कान्तेनेतेन्तर सखि धनुर्ज्याऽपूर्व[4]लक्षीकृता
यस्मादस्मादहहरिणा जीवन्ति तुष्यन्ति च।।
सुरतक्रीडा स्मौ भ्मौ भगगैर्वाणेष्वश्वविरामेः। (7-149)
उदाहरण-
सुरतक्रीडारंभोन्मनसं दृष्ट्वा जीवितनार्थं
मिणिमज्जीरव्याशिज्जितकं श्रुत्वा चोपसखीनाम् ।
कटकद्वंद्वरात् केयूर[5]युगात्काज्चीतश्च नवोढा
शयनैकान्तेशान्तं विजहौ व्यावृत्ता कलकण्ठात् ।।
भाराक्रान्ताा भमनरसलागुरू श्रुतिप्रङरयैः। (7-150)
उदाहरण-
आयाहि द्रागपि करुणया परिग्रसते[6] क्षणं
भूयोदग्धूंविषमविशिखं वजामिपिनाकिनम् ।
अप्येवं चेन्तनु हत विधिर्विपाककवशादसौ

---

1 मूले एकस्याक्षरस्य न्यूनत्वेन छन्छोभङ्गः तस्मात् 'नु' इति संयोजिततम् ।

2 मूले 'वेदतुग्रैर्मभतन मयनैगरचेततदाहारिणी' एवं लक्षणं कृतमस्ति यदुदाहरणानुसारे णासङ्गतम् । अत्रसप्तदशाक्षराणि भवितव्यानि किन्तु अस्मिन् लक्षणे द्वविंशं स्यक्षराणि सन्ति।

3 मूले दिचौ इति पाठः।

4 मूलेप्रहो इह्यत्र यगणस्य हनिरस्ति।

5 मूले 'नूपुर' इति पाइः, तस्मात् भषणे वाधा भवति।

6 'परितपते इति मूले' इत्यत्र रगणोनर्भवति, तस्मात् संशोधितः पाठः।

पाप्मा जीवतदपि नियतं न पास्यति निष्कलः।।

इत्यष्टिः।

रात सखौ ज भरास्तथा वसु दिग्यतिर्विबुधप्रिया (7-151)

उदाहरण-

जीवितेशि महीसुते[1] विरहे पुरातव निर्जने

वासरागमिताः परंरूदितैर्मया चिरमुर्च्छया।

राज्यभारकसङ्टेष्वधुना पुनः प्रतिनेनधिग्

जीवितप्रलयावधिः समयः कथं व्यतिवाह्यताम् ।।

भात् समतनमैः षडवेदाद्रिच्छिमुनि रतिमन्दा स्यात् । (7-152)

उदाहरण-

सत्कुचजघने चेलाश्लेषादाखनखरराद्राङै

र्मन्थरगमना मध्ये बन्धु स्त्रीजनमधरेदष्टा।

आहितनखरंपद्मे दष्टस्वधरहसितं दृष्ट्वा

कूणितविकलद्रस्त्रयाता निर्भररतिमन्दा माम् ।।

इह ननरचतुष्टयं नाम नाराचमाचक्षते। (7-153)

उदाहरण-

तरति विपदमाशु यस्याश्रयादेवलेकाधमः

प्रकृति सुमलिनः समासाद्य वाज्छांमुदाकाम्यति।[2]

तपयति तरणौ खमध्यं पदे यस्य लीना भवात्

पतति नु वितनोति तस्मात् स्वमानं परञ्चछपिका।

मात् सतो[3] जावधयो भूतेन्द्रियकाष्टभि रासवलीला (7-154)

उदाहरण-

---

1 जीवितेशी इति पाठः

2 मूल ग्रन्थे 'फलिमाक्वामति' इतिपाठः। अत्र द्वितीयतृतीयरगणस्य सिद्धि र्नभवति।

3 मूले मात्समौ इति लक्षणम्

घूर्णल्लोचनविष्वग्व्याकुल शश्वदभिस्खलदङ्गी,
कृष्या वत्स[1] सुपुत्रीपीनपयेधरलग्नकराञ्चाम् ।
अव्यक्ताक्षरसं स्मेरारूणचारूस्सुवक्रसरोजं,
पश्यमः सखि तालाकं स्य निरंकुशमासवलीलाम् ।।
नजभजरैस्तु रेफसहितेः शिवै र्हयेर्नन्दनम् (7-155)
उदाहरण-
जनितरूषा तया चलितया दृग चलेनेषुणा
चित्रमिषकज्जलेन नितरां समाहतं मर्म मे।
भजति रताधुनापि विकृतिं नवां[2] नवां निष्कृपो
विषमशरोऽपि तत्र विशिखान् मुहुर्मुहः प्रास्यति।
म्भौ नयौ यौ चेद्युगतुरगहयैः कीर्तिता चन्द्रलेखा। (7-156)
उदाहरण-
यस्याख्यातः सरसिज दलति क्षत्रशत्रोः कुठारः
स्यादंभेलिः किल जलगणभ्रिाव पक्षान्तकर्त्तुः।
को जानीते दशवदन महावंशमेतं वराकः।
पारेवारान्निधि नर नलजो भेत्स्यते घूर्णडिभः।।
मः सोजः सतसा दिनेश्वररसैः शादूलललितम्[3] (7-157)
उदाहरण-
पाणाद्यास्तव चेष्टितैर्नहि गताः कां कामिह दशा-
माया स्यत्यभिरान्मृगाधिप इति स्फीतो जनरवः।
शर्दूलीभिरथार्मकैरपि समं शार्दूलललितम् ।[4]
मुक्ताद्राक् यतो न लभसे तेषां मनु गतिम् ।।

---

1 मूले कृष्णाावत्पुत्री इतिपाठः। अत्राक्षरन्यूनतास्तिनेछन्छोभङ्गः।

2 'नया नव' इतिमूले।

3 शार्दूललित मिति पाठः।

4 मूले कण्ठेव इति पाठः। तेनेकमक्षरमधिकं भवति।

इति धृतिः।

रसमुखै य्मौ न्सौररगुरूयुता मेधविस्फूर्ज्जिता स्यात् । (7-158)

षडिभः षड्भिः सप्तभिर्यतिः।

उदाहरण-

गभीरं गर्ज्जद्भिर्विवुधभवनादागतैर्वारिवाहैः
स्फुरत्केकरहै स्थगितगतिभिनीलकण्ठैः'[1] पृथिव्याम् ।
भूजङ्गानां स्थानादधिकललकलैर्दर्दुरैरुत्प्लवोधैः
समारुद्धारिक्तयुगपदवलाकान्दिशीका बभूव।।

विस्मिता क्वचित् ।

शक्तिधरा ननु संगुणिता यदि भागयुता प्रमदा। (7-159)

भभभभभभगाः।[2]

उदाहरण-

सन्ततवाहुलतोन्मनस्खलदंशुकमाशु[3] लसत्
प्रस्फुटपीनमुतंगकठोरपयोधरमूलतटा।
अस्थिरपण्यपरिग्रहखण्ड न वाचि हरौकुपिता
काव्यवरोहयति स्म मुहुरूरूभरमहे[4] प्रमदा।।

रसहयग्रे यै न्सौ[5] तद् गुरूयुता छायेतिसंगीयते। (7-160)

उदाहरण-

उदारत्वंवाच्यं पवन तवकिं शाखोद्वाकदेरपि-
त्वया दत्तायस्माद्वरसुरमिता नन्दन्तिसर्वेयतः।
तथा नीचत्वं वा तदपहरसे तमेवतेषामहो-

---

1 रुत्प्लवोद्यैठ इति पाठः। अत्राप्यक्षरूरमधिकम् ।

2 मूलेलक्ष्मणस्पष्टम् तस्माद् वृत्तिर्लिखिता।

3 मूले दतुलसत् इति पाठः। अत्र वर्णाः न्यूनाः।

4 मुहुर्युरूभार इति मूले।

5 मूलेपाठे र्मौ ल्सौ ' इति लिखितम्

यदावेशाद्विद्वानपि किल सदोन्पन्तः किमस्योच्यते।।

भ्रो[1] म्नौ यो नो कुरूचेत् स्वरमुनिकरणै राह स्वरसाम् (7-161)

उदाहरण-

आनीताहं निजाङ्के प्रियतम भवता यातक्षुतवती
संप्रेक्ता जीवमुग्धे शतमिति नियते कल्पगमने।
प्राणेशप्रेमवार्ता तवममकृत देवातिविदिता
किं वा स्निधाति रूक्षैर्मम हि कुनियतिः किन्नकुरूते।।

भुजाग्न्युक्तिश्चावेर्यतनसररगै[2] फुल्लदामेति नाम। (7-162)

उदाहरण-

व्रजेः पर्य्यङ्कः न किमिति भृकुटी[3] मालिमुत्सार्य गेहात्
क्वण्न्मज्जीरो लघु लघु सुभ्गोत्सार्य्य संत्ध्यवः।
यदा नीवां सप्रशिथिलयतिसा सा ध्रुवं प्रीतमेव[4]
प्रियेण त्रस्ताकरकमलयुगे व्याजसुप्तेन रुद्ध।।

इत्यतिधृतिः।

दिक्शरवाणयति र्भवतुत्वक्षरतसा लगौ किलभवक्रम।[5] (7-163)

(भाब्धिरसौ लगुरार्भवति प्रथितं तदा खलुभद्रकम्)

उदाहरण-

माधव माकुरू नाथरूषं वितयं नहि प्रवदामि ते[6]
सा भवतो मुरली सुकल प्रति नाादकैः पवरिमोहिता।

---

1 मूले म्रौ नौ एवं लक्षणं कृतम् , यदुदाहरणे न सघटते।

2 छन्छोलक्षणे लक्षणसमन्वयोनास्ति किन्नूदाहरणे समन्वयोवर्तते।

3 मूले भ्रलता इति पाठः। अत्र सगणो न भवति।

4 मूले स्तुतदे इति। लक्षणे अत्ररगणः प्राप्यते किन्तु स्तुतमित्यत्र रगणे नास्ति।

5 मूले दिक्शरवाणयतिभवतुः क्षरसा लगौ किलभद्रकम् इति लक्षणं लिखितं किन्तु स्पष्अं लक्षणं नास्ति तस्मात् ग्रन्थान्तरात् भद्रकस्य लक्षणं लिखितम् ।

6 मूले तेस्य इति पाठः।

प्रत्यगवेक्ष्यनिकुंजगृहं परिदूर्षितामुहुरन्तिके[1]
सङ्गलदश्रुनितम्बभरालसमन्थरावत सीदति।।
स्यात् प्रमदा यति चान्त्य गुरू करिवाह नितम्यः (7-164)
उदाहरण-
कापिनितम्बवतीषु विदूरलसत्सु मनः प्रविचेतुं
बहुलतोन्नयनं लघु कर्तुंमनाः स्व सखीजनमध्ये।
जीवितनथ्मनुप्रतिदन्त निजाभिमुखेक्षणकोणं
दन्ततृणाद्यकरोन्निभृतं क्षणमन्यमुखीभवनाय।।
ननमतनभगगारचेद् वाजिश्रुतिनवकैः कवरीस्रूात् । (7-165)
उदाहरण-
प्रियसखि करवै किं वे[2] वाद्यश्चपलतरा मम तस्याः
कुवलयसदृशः सान्द्रं भ्रान्त्वा प्रतिपदमङ्गकदम्बे।
अधिगुरकवरीभारं रूढामृगमदपिच्छलतोस्मात्
कुचशिखरि तटे पातात् स्यन्देऽथ जनिततरां रतिमन्दा।।
सजजा भरो[3] सलगाःशरेःख ? द्वि शरैः शरैः किल गीतिका (7-166)
उदाहरण-
जल सज्वलत्सु[4] शिरोरूहे भुजगभ्रमादिति भीतया
वगलत् कुचाचलयास्खलज्जघनस्थलीवरवाससाः।
यमुना जले व्रजर्बालयास्मितसुन्दरः परिषस्वते
लघुवारिताभ्यतावाङुख स्वसखीजनेयदुनन्दनः।।
रसाश्वाग्रे शोभा यमननततगैरन्तिमोन्योगुरूश्च। (7-167)
उदाहरण-

---

1 मूले प्रत्यग्वी तरूकुज इति पाठः। अत्राक्षरन्यूनत भगणाभावेछन्दोङ्गताचापिवर्तते
2 एकाक्षरं न्यूनं मूले तस्मात् वे इति निवेशितमक्षरम् ।
3 मूले 'सा' इति किन्तूदाहरणे न समन्वयः। लक्षणेऽपि एकविंशत्यक्षरः।
4 सम्बलत् इतिमूले पाठः।

समाकर्ण्य प्राणेश्वरगमनकथां यातुमस्मात्प्रदेशा[1]
दरे ज्जीव वीडाविरचित विविधेपाय मा भववितो भूः।
कथं ग्रामं ग्रामं[2] मुहुरिह मिलितः केन वाप्रार्थितस्त्वम्
मुधा[3]मास्कावन्धुक्रमकृत इति ते सारहो वा वदीति।।
नजभ्जसा यलो कि नवच्छिमुदिता[4] कुरङ्गेक्षण (7-166)
उदाहरण-
रूषमपनेतुमेत्य च मया[5] प्रतिवधूगिरा भाषिताा-
प्रियसखि[6] साविधाविह[7] हते वसति किन्त्विदानीमपि।
इति विनिगद्यते हृदि पदार समभिहत्ययान्ती गते-
मयिचरणौदृग्ज्वलमहो विकरति स्म वाष्पैःसमम् ।।
सभयाः त्नौ[8] भगगाः शितिखाण्डग्रहयति लोलवतंसा (7-169)
उदाहरण-
रजनीशेखर[9] विभ्रमनिद्रामनुकलितानतिपीन-
स्तनयोरार्दनखाङ्कशद्यातात् सरभसवनधूवर्धूमिः।
मुहुरामृश्य विलोलवतंसारूणितंविलोचनकेशान्
परिवोध्येव निदेपि च तल्पाद् गतवति मुज्वति कान्ते। (7-170)
इति कृतिः।

---

1 मूले 'यां तु ' इति पाठः।

2 मूले ग्रामं गामं ' इति पाठः।

3 मूल 'युधा'

4 मूले णवनवद्दि पाठः।

5 'माया' इति मूले।

6 सख इति मूले

7 विधरिहहते' इति पाठो मूले।

8 मूले भास्छौ इति।

9 शेखर ति श्रम इति पाठः। 'ति' इत्यत्र निरर्थकः। वर्ण विपर्यसोऽत्र

नजभजजा जरो तदाभवतीह च सुप्रतिस्थिता।। (7-171)

उदाहरण-

सधनजनादिनीवितमपैतु मनस्त्वमुनैव दह्यते,
नरकपिशावकैरपि कृतां यदि मामवलोक्यदुर्दशाम् ।
सुकलितपौरूषाण्यपि च मे वितधानिसुमंस्यते क्षणाद्
विधिवदुपेक्ष्य पूर्वचरितं हिजनैः परमेव गृह्यते।

सिद्धिकं क्वचित् सरसीरचिताश्रीश्च।
भात्रितयानुजजाय इति च यदि विश्वगजैः क्लकण्ठी। (7-172)

उदाहरण-

सम्परिकल्प्य रहः[1] पणमधिषधुगौरवजाघनरत्नं

द्यूतं[2] पदं विधृता वलवदुशतमा क्षणकेन[3] नवोढा।
आशुजितेव धृता लघु विगलित नीविपदेप्रियभर्त्रौ,
तं[4] कुपितैक्षत सापि[5] कपटपटु वाक्[6] च वहिः प्रतियान्ती।

ससना[7] नतजा यू रसमुचिवसुभिःस्मेरमुखीति वदन्ति। (7-173)

उदाहरण-

क्रमशः सुसखी मुखरचितपर्णे नीति[8] विमोचनसीमे
विजिते परथागाः नवगुरूपणतः क्रीडतु को वहुवेलम् ।

---

1 मल संपुरिकल्प इति।

2 यूतपदे इति मूलग्रन्थे।

3 मूल उशतमानिभिरेवे पाठः अत्रर्थदृष्टयाकाठिन्यम् ।

4 ता इति मूले।

5 शशि इति मूले पाठः।

6 चटुवाणि इति मूले

7 मूले ससमा इति किन्तूदारणे ससना इति घटते।

8 मूले जीविमोचन इति एकाक्षरन्यूनतापि

विनिगद्य सजीमिति कितव च ना तस्थुषिकामपितूष्णीम्
अधिपाणिददौ ग्रहपरविनत स्मेरमुखीषु यमक्षम् ।
मदनगजैर्नजपञ्चक या यदिसा वयिताकिल मुग्धा।। (7-174)

उदाहरण-

नयनयुगं पिदधातितरां मिषकौतुकतः किल काचि
च्छ्रुतिविवरे अपि जन्म सखी वत काचनकापि च भासाम् ।
वपुरधिगर्भगृहान्तरमेव च कापि मधौ न तु तस्याः,
कितव कथज्चन तेन सुनिष्कृप जीवति सा तव मुग्धा।

इतिव्रकृतिः।

मोमस्तौ[1] नो नो नः सोगो वस्तुभुवनविरतिमिह वदहंसीम् ।(7-175)

उदाहरण-

वृन्दाारण्ये श्रुत्वादूरादधि स तुहिन किरणरजनि काचित्
वंशीमन्द्रं कंसाराते र्व्रज वरयुवतिरधिरमणशय्यां
दृष्ट्वोन्निद्रं कान्तं सदमन्तरधृतरुद्दति शिशुपरिशान्तम्
व्याजान्निष्क्रान्ता[2] काचित्वालय यदधिपतिरचिरतितन्त्रम् ।
वृत्तविवेचक आह मदोद्धतमश्वभकारयुतं गयुतम् ।। (7-176)

उदाहरण-

पीनपयेधरभारवताङ्गलते मदिरेक्षणिके स्वकला
कौशालदर्शनलालसचिततयाघटिता दयिते दयिते।
वीक्ष्य मुखान्तिव जन्मसरोरूहवंशतिरस्कृतिमादृष्यते[3]
नैदृशकर्म कदापि च हन्त करिष्य इति स्म करोति विधिः।[4]

मन्दिक्वचित्

---

1 मूले मोमस्नो इति।

2 मूले 'निःक्रान्ता' इति

3 मूले 'मादृढं ' इत्यत्रैकाक्षरन्यूनत्वम्

4 'किम' इति।

रुद्रशिवौभभममसैः सः स्यादिह गेन गजेन्द्रविलासः। (7-177)

उदाहरण-

भामिनि कामकलावति या न न्यक्कृतमत्तगजेन्द्रविलासो
स्वद्वदनं परिलोच्य न कोऽपिस्यादपि चन्द्रमसीह सतृष्णः।
प्रत्युत मामुना वत निन्देदित्यवधार्य विधिश्चतुरस्त्वाम्
साधु विधाय रहस्त्रिदशदीस्तेनशठः समरञ्चयदेवाः।

इत्याकृतिः।

सजसाः सतौ भजलगा मिहिरैरूद्रैरभाणिकिल[1] कामकला।। (7-178)

उदाहरण-

ननुकाञ्चीनीं तव तनू[2] नगरीमध्यास्यसारकलिता जगता
मपसारित स्व[3] शिशुभावगुणि[4] क्षेणीपतेः पुनरनुत्थिताय।
नवयौवनेन कठिनोच्चकुचव्याजान्महीधरयुगकनकै
स्त्रिवलीमिषेणपरिखात्रितयं चक्रे[5] गभीरमयिकामकले।।

इतिविकृतिः।

भातु न भाम्नौ जयतु स पश्यति शीतलकिरणभृतः सुचिरायाः।।[6] (7-179)

उदाहरण-

नन्वधिवाकं शरदि कथञ्चन तेन युवतिवदनस्य तवायम्
धावति पश्चात् प्रति शरदंपरिवत्सर कृत तपसः फलमित्थम् ।।

इति सङ्कृतिः।

ससभाननता ज्नौ[1] गिति रसहयनलिनीनाथपतिः शिवदयिता (7-180)

---

1 किम इति

2 तवनू नगरी इत्यत्र एकाक्षरं न्यूनम् ।

3 स्य इति पाठः।

4 अत्र विर इति पाठोऽस्पष्टार्थकः

5 मूले गंभीर इति पाठः तेन जगणे बाधा।

6 मूले भानु न भाम्नौ तदनु न पश्यति इदं लक्षणमुदाहरणे न सङ्गतम् ।

उदाहरण-

मयि युञ्चरूपं सुंदरि सुदयितकिमु रोषस्य पदं हितकृदपि-

प्रततोरून्तरे किं हितमतिदयहृदयान्मां यदितो वहिरकृषः।

किमतः सुतनो नाथ किमिव नहि ननु जीवामि न चेन्मम वद किं

प्रियया विहितैः कोपकठिनतर चरणाघाततरै रिहभविता।।

इत्यभिकृतिः।

वसुन[2] गयुगमिहप्रतियुगम् ।

अथ वसयन्ति रिहमधुकरउरू[3]तरविपदीति बहुतरदूरा

द्रुपगत इति किलसुविंगतिरयमिति मतिमम[1]मनु न कृथायाः

निजगति समुचितपदनभिमिलति हि कथमपिगुणरतियोग्यः।

सविधागतृणतृशदणि मणिरवनिप युवतिषु मिलतिदिगन्तात् ।।

नजभजपज्वकैरथ लगौ रसकौ कथिता कविभिः सुभगेति[4] बुधैः (7-181) सप्तभिः सप्तभि षड्भिः षड्भिर्भयतिः।

उदाहरण- रहसि विमुच्यसा जघ्नचेलनमहोपरिदृश्यचिरं मम कौशलकम् , कमलदलं स्फुरत्प्रणतकंधरकाकरजैर्भसादरविन्दले। स्वयमपिकुर्वती[5] समुखी साधुमी साधुकृतं गुरवोऽपि जिताइति मे वचनात् सचकितमुत्थिताशू परिरेभ उरूस्खलदम्बरकोमयका सुभगा। इत्युत्कृतिः।

अथ समवृत्तानि सङ्गणीमः।[6]

एकाक्षरोक्ताऽत्युक्ताद्विवर्णा मध्यात्रिवर्णिका।

चतुर्वर्णाप्रतिष्ठास्यात् सुप्रतिष्ठा तुपञ्चमः।

---

1 ‘ञौ’ इतिपाठउदाहरणे तु नगणः।

2 इदं लक्षणं अस्पष्टं प्रतिभाति मूले लक्षण्मुदाहरणमेकत्रैव लिखिमस्ति।

3 मूले ‘ऊरू’ इति गुरूद्वयं तेन नगणस्य सिद्धिर्न भवति।

4 ‘सुभगा’ पाठो मूले।

5 मूले ‘कुर्वाति’ इति

6 संग्रन्हीमः इति मूले पाठः।

षड्गायत्री सप्त चोष्णिगनुष्टुबष्टवर्णकैः।
वृहतीनव षडेस्तु दशैकादशत्रिष्टुभः।।
जगती स्याद्वादशातिजगती तु त्रयोदश।
चतुर्दशशक्वरीख्यादशपञ्चातिशक्वरी।।
षोडशाष्टिः सप्तदशत्यष्टिरष्टादशाक्षरैः।
धृतिरेकोनविंशर्णाऽतिधृति विंशतिः कृतिः।।
एकधिका सा प्रकृतिराकृति ह्यक्षराधिका।
अधिकाविकृतिःप्रोक्तासङ्कतिश्चतुरूत्तरा।।
पञ्चोत्तरात्वभिकृतिरुत्कृतिस्तु षडत्तरा।
अतः परं समुद्दिष्अं मालावृत्तमनीषिभिः।
गायत्रयादि जगत्यन्तं धृत्यन्तं चातिजगतात् ।
उत्कृत्यन्तं कृतेदिव्यमानुष्यं द्वयात्मकं क्रमात् ।।
इति भट्टाचार्य श्रीमहादेवकृतायां कविदयितायां पेङ्गलवृत्तौ सप्तमोऽध्यायः।

❖❖❖

अष्टमोध्यायः

अत्रानुक्तं गाथा। (8-1)

अत्राष्टाध्याय्यामनुक्तं समैकचरणं त्रिपात षड्चरणाधिकं च छन्दोगाथासंज्ञं स्यात्[1]।

अत्रासिद्धमिबित केचित्पठन्ति। यथाा राघवचरिते[2]

आसीर्नन्महिरवंशस्य साधु वंधुर्धुरन्धरः।

काकुत्स्था इति राजेन्द्रो दैत्यवंशक्षयानलः।।

तथा-

दशर्ध्म न जानन्ति, धृतराष्ट्रो[3] निवोधनात्[4]।

मन्तः प्रमन्त उन्मतः श्रान्तः बुद्धोबुभुक्षितः।।

त्वरमाणश्चभीरुश्चलुब्धः कामी च ते दश[5]।।

त्रिभिः षडिभर्वाा पादैरत्र श्लोक इति हेमचन्द्रः। त्रयड्घ्रि घडङ्घ्रि श्लोकावित्याहेताः[6]। तदेवं दिङ्मात्रं लघुनि पुनर्निखिलज्ञानाार्थं प्रस्तारादीन् षट् प्रत्ययान्[7]? व्याख्यास्यन् प्रस्तारमाह।

द्विको ग्लौ। (8-2)

---

1 शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः (वृ. र. अ/श्लो.)

2 राघवचरित नामको ग्रन्थो मया कैटलागरेषु बहु अन्विष्टः किन्तु कुत्रापि न प्राप्तः अनुमीयते यदेतन्नामकं काव्यं महादेवभट्टाचार्यस्यैव स्यात्।

3 धृतराष्ट्र इति मूले।

4 मूले 'निबोधनान्' इति पाठः।

5 अयंश्लोको महाभारतस्था षड्पदा गाथा।

6 मूले लिखितं यत् 'त्रिभिःषड्भिर्वा पादैरत्र श्लोक इति हेमचन्द्रः किन्तु छन्दोनुशासने- 'गाथात्रानुक्तम्'।।73।। अत्र शास्त्रे यन्नोक्तं छन्दस्तद् गाथासंज्ञम्। अत्र त्रिभिः षडिभा र्वा पादैश्लोकः।।73.।। (छन्देऽनुशासने अ. 7 पृ. 229-73)

7 मूले 'षघ्रत्पयान' इति पाठः।

उपरिगुरुमधो लघुं लिखेत्[1]। अयमेकाक्षर प्रस्तारः। तौ ग्लौ द्विको द्वयावृत्ति प्रमाणको लेख्यो। किमुक्तं गुरोरेकस्याध पको लघुर्लछोरधो गुर्सः पुनर्गुरोरधोलघुरित्यावृत्योर्मध्ये च विस्पष्टाधैतिर्यग्रेखां लिखेत्।

अथ्कर्तव्यनाह।

मित्रो च (8-3)

तेन पुन र्मिश्रौ ग्लौ लेख्यौ। विमुक्तम् - प्रथमायामावृत्तौ गुरोदक्षिणे गुरुर्लेख्य5।

लघोश्च[2]। (8-4)

द्वितीयायां गुरोर्दक्षिणो लघु र्लघो[3]र्दक्षिणे गुरुः। एवं गौ ल्गौ ग्लौ [4]लाविति चतुर्विधे ह्यक्षरस्य प्रस्तारः सम्पन्ने रेखा चापनेयाा। अथेकैकाक्षरवृद्धयात्र्यक्षरादि प्रस्तारान् दर्शयति।।

पृथग्गला मिश्राः। (8-5)

द्वयक्षर प्रस्तारान् पूर्ववत् द्विरावर्त्य प्रथमायामावृत्तौ पूर्ववद्[5] गा द्वितीयायां ला लेख्याः पृथगिति भिन्न[6] जातीयां संसर्गमाह।।

प्रथमायाां हि ग एव मिश्रणीयो न लः द्वितीयायां च ल एव न गः।

वसवस्त्रिकाः। (8-6)

तदेवं गगगाः लगगाः गलगाः ललगाः लगलाः गलला ललला इत्यष्टौत्रिकास्ड्य-क्षरस्य प्रस्तारा भवन्ति। एते च मादयोऽष्टो गणाः शास्त्रादावेव[7] दर्शिताः। स्पष्टार्थमेवदम्। एवं त्र्यक्षर प्रस्तारं द्विरावर्त्स्त्र पूर्ववद् गलयो मिश्रणाच्चतुरक्षर प्रस्ताराः दर्शनीयाः। एवमग्रेष्वमि। इयं चात्र लघ्वी प्रक्रिया।

---

1 मूले लेखित इति।

2 सूत्रमिदमधिकम्।

3 मूले 'लघोश्च' इत्येव पाठः।

4 मूले 'ग्लौलाविभि' इति पाठः।

5 पूर्ववदर्गाः इति पाठः।

6 पृथगितिजातीयाा इति पाठः।

7 मूलपाठे 'शास्त्रादविवदर्शिताः' इति पाठः।

पादे सर्वगुरावाघाल्लध्रुं न्यस्य गुरोरधः।

ऊर्ध्वं वा विन्यलेच्छेषं भूयः कुर्यादमुंविधिन्।

उनेदद्यादगुरुन् पूर्वे यावत् सर्व लघुर्मवेत्[1]।

इति प्रस्तारः।

यावत्यां भुविछन्दं प्रस्तार्यते सोऽध्वा तमारु।

एकोस्तरः कमशः[2]। (8-7)

उतरशब्दो द्वैगुण्यार्थः। छन्दोवर्णानामुपरि एक द्वि चतुरादिः स्थप्यः। यथा चतुरक्षरे छन्दसि एक द्वि चतुरष्टसंख्याः। एवं मिलितं पञ्चदश पृथक् स्थापयेत्। ततः कार्यमााह।

पूर्वपृक्तालसंख्या। (8-8)

संख्यानां पूर्व एकः सेव लानां छन्दोवर्णानां संख्या एके न पृक्ता मिश्रिता पुनः स्थाप्या तेन षोडशसंख्या भवति मिलित्वाा चेकविंशत्। तत्र छन्दोभेदेसाध्वभेदान् सूत्राभ्यामाह। अङ्गुलपृथहस्तदण्डक्रोशः। 'योजनमिति'। इतिशब्द आद्यर्थोयोजनोंर्द्धानी ग्राहकः अङ्गुलपदं च सार्वत्रिकाभिप्रायम्। तथाह्येकस्य प्रस्मार स्याङ्गुलं स्थानं तथाऽन्तरालस्य तदा हि सुव्यक्तं भवति। तेन चतुरक्षरस्य षोडशप्रस्ताराणां षोडशाङ्गुलानि पञ्चदशान्तरालानां च पञ्चदशाङ्गुलानीत्येकात्रिंशदङ्गुलानि चतुरक्षरपस्ताराध्वा तदुवााच केदारभट्टः[3] -

संख्यैव द्विगुणेकोना सद्भिरध्वा प्रकीर्सितः।

---

1 वृत्तरत्नाकरेऽप्येवम् -

पादे सर्वगुरावाद्याल्लघुं म्यस्यगुरोरधः।

यथोपरि तथा शेषं भूयःवुर्यादमुं विधिम्।।

उनेदघात् गुरुमेव यावत्सर्वलघुर्मवेत्।

प्रस्तारोऽयं समाख्यातरछन्दोविचितिवेदिभिः। (वृ. र. 6-2, 3)

2 ग्रन्थेऽस्मिन् (8-7) एवं (8-8)

सूत्रद्वयमधिकम्।

3 मूले 'केदारभतः' इति पाठः।

वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यान्तथङ्गुलम्[1]। इति

अध्वनियमः पुरुषेच्छाधीनत्वात् निष्कलत्वाच्चानादेय[2] इत्यार्हताः। निरासितं चैतत्प्रत्ययावतारणिकया स्माभिः।

इत्यध्या।

अथ नष्टज्ञानमाह।

लार्द्धः[3]। (8-9)

यदि पृच्छति गायध्या दशमं् वृत्तं कीदृशमिति तदा तां दशसंख्यामर्द्धयेत्, कृतेचैव एकं लघुं न्यसेत्। अथवशिष्टायाः पञ्चसंख्याया विषमत्वेनार्द्धयितुमशक्यत्वाद् यत् कर्तव्यं तदाह।

सैकेगु[4]। (8-10)

सर्वत्र विषमसंख्याकमेकेन मिश्रयेत् तत्र चार्द्धीकृते गुरुं परतो न्यसेत् एतमेव यावच्छन्दः पदाक्षराणि पलन्ति तावदर्द्धयित्वा प्राप्तं लघुं गुरुं वा स्थापयेत् तदेवं प्रथमं-चतुर्थंलघुकं वृत्तं वक्तब्यम् । इति नष्टम्।

अथोद्दिष्टप्रत्ययमाह।

प्रतिलोमगुणं द्वि लार्द्धम्[5]। (8-10)

गायक्या रजगणात्मकं वृत्तं कतिविधं कतिविधं[6] भवतीति पृष्टे उद्दिष्टं वृत्तं भूमौ प्रस्तार्य्य सजातीयापेक्षय योऽन्त्यो लघुस्तमाद्यमादाय प्राति[7]लोमयेन हि संगुणय्यावर्तयेत्। तत्र निराकारवृतेरसंभवात् परिशेआत् संख्यापेक्षायां

---

1 वृ. र. अ. 6 श्लो. 9।

2 मूले - 'धीनत्वान्तिकल त्वाच्च' इति पाठः।

3 छन्दः शास्त्रे 'लर्घ' पाठः।

4 'सैकेग्' इति छन्दः शास्त्रे।

5 छन्दःशास्त्रे 'प्रतिलाोमगणं द्विर्लाघम्' इति सूत्रम्।

6 'कत्विथं' एवं पाठः मूले।

7 'प्रतिलोक्येन हिः' इति पाठः।

कपिज्जला[1]धिकरणन्यायादेकसंख्येवद् द्विगुणीकृत्य द्विसंख्यामन्त्यलघौरूपरि[2] न्यस्य एवमादि यावदावर्तयेत्। तत्र विशेषमाह-

ततोम्येकं जह्यात्। (8-11)

द्विगुणितायां (सा) संख्या गुरौ पतति तत एकं त्ययेत्। द्विगुणीकरणमप्यस्या त्यक्तैकाया एव। एवं क्रमेण चरमें या संख्या संपद्यते सा उद्दिष्टस्य यथोक्ता[3] एव अन्त्य लघै द्वि संख्या तत्पूर्वगुरौ त्रिसंख्या तत् पूर्व लघै षट् तत्पूर्व गुराावेकादश तत्पूर्व लघौ द्वाविंशतिस्तत् पूर्वगुरौ त्रिचत्वारिंशदिति त्रिचत्वारिशं वृतमुद्दिष्टं वाच्यम्।

अयमत्रापरः प्रकारः।

आादावेकं परे द्वि द्वि गुणितानङ्ककान्[4] न्यसेत्।

लघुस्थितेस्ततः सैकेरङ्कै संख्यां विनिर्दिशत्।

गुरुस्थेरपि युक्तै यं वृतमानमपीष्यताम्।

इत्युद्दिष्टम्।

।।अथ वृत्तपरिमाणज्ञानमाह।।

द्विरर्धे। (8-12)

अस्य छन्दलः कति वृत्तानीति जिशासायां छन्दं पादाक्षारसंख्यामादाय निर्णयः। लक्ष्यया गायत्रीपादाक्ष्राणां षट्संख्या सस्यार्द्धे पूर्वन्यायेनैकसंख्यां द्विः कृलां द्विसंख्यामिति यावत् भूमौ स्थापयेत्। ततोऽवशिष्टायास्त्रिसंख्याया वैकम्येनार्धयितुमशक्यस्वाद यत्कर्तव्यं तदाह।

रूपे शून्यम्। (8-13)

रूप्यते निरूप्ते संख्याजातमनेनेति रूपमेकसंख्या तस्मिन् शून्यं विन्दुरूपं द्विसंख्याया अधः स्थापयेत् ततो द्विसंख्या अवशिष्यते तस्या र्अे पूर्ववद्

---

1 जैमिनीय पूर्वमीमांसायाः कपिञ्चलाधिकरणनुसारं यत्र कुत्रापि कापि संख्या न निर्दिष्टा स्यात् तदा तत्र पारिशेष्याददेकत्व संख्या ग्राह्या। जैमिनीय पूर्वमीमांसायां कपिज्वलााधिकरणं-अ. ।।-पा.। अधि. 8।।

2 मूले 'व्यस्य' पाठः।

3 यथोक्तः पाठः।

4 'गुणितानांककान्' पाठः।

द्विसंख्याबिन्दोरधः स्थापयेत्। अथवशिष्टायामेकसंख्यायां शून्यं द्वितीयद्विसंख्याधः स्थापयेत्। तदा कर्तव्यमाह।

द्विः शून्ये। (8-14)

सर्वाध्ः शून्यस्थाने पूर्वन्यायेकेसंख्या द्विरावर्तयेत्[1]। तेन द्विसंख्या फलति।

तावावदर्धेयतद्गुणितम्। (8-15)

द्विरावर्त्य[2] प्राप्तं यत् तावत् स्वोपरिस्य अर्धस्थाने निवेश्य तावतेव गुणितं कुर्यात्। अर्धाद्‌र्द्ध[3]स्थानीया या द्विसंख्या अपनयस्तेन शून्ये कृतो द्विसंख्या मर्धस्थाने नीत्वा द्विसंख्येव गुणिता चतुःसंख्या भवति। ततोद्विः शून्य इति वचनादुपरिस्थाशून्यस्थाने तां चतुःसंख्यांद्विरावर्तयेत्। तेनाष्टसंख्या फलति तां चाष्टसंख्यां शून्योपरित्ये अर्द्धस्थाने नीत्वा तावदर्देलक्ष्गुणितमिति वचनादष्टगुणितां कुर्य्यात् तेन चतुःषष्टिवृत्तानि भवन्ति। एवं गुरुः पादातराणां सप्तसंख्या तत्र पूर्ववद्विन्दुं तदधोद्विसंख्यां तदधाो बिन्दुं न्यस्येत्। अधोविन्दो द्विः कृत्वा तां द्विसंख्यामुपरिस्थर्द्धस्थाने नीत्वा स्वयैव गुणयित्वा यतुःसंख्या द्विः शून्य इति द्विगुणीत्यष्ट संख्या लभ्यते। तामष्टसंख्यामुपरि स्यार्द्धस्थाने नीत्वा स्वयैवगुणायित्वा चतुःसंख्याप्राप्येते। तां चतुः संख्यां द्विः शून्य इति द्विगुणीत्यष्टसंख्या लभ्येतेतामष्टषष्ठिर्लभ्यते तां चतुः षष्ठि द्विशून्य इतिद्विगुणी कृत्वाष्टाविंशत्युन्तरशतं लभ्यते। एवं वृत्तान्तरेपि-उह्यम्।

।।अथैतद्दृष्ट्वाा पूर्वच्छन्दसां समुदायसंख्यामाह।।

द्विर्धूनं तदन्तानाम्। (8-16)

यस्यछन्दसोयत्संख्यानं तद्विगुणितं द्वाभ्यां न्यूनं च कृत्वा या संख्या लभ्यते सा तदेव छन्दोऽन्तो येषां तेषं छन्दसां तत्सहितानां संख्या भवति। तद्गुणसंविज्ञानत्वात्। तेन चतुःषष्ठि द्विगुषिता सति[4] षड्विंशत्युत्तरशतं भवति। तदुक्तादि गायव्यन्तानां 'षण्णा' संख्या। एवमुष्पिहोऽष्टाविंशत्युन्तरशतं द्विगुणितं

1 'द्विरावर्त्या' इति पाठः।

2 'द्विरावर्त्ये' एवं मूले पाठः।

3 'अस्वाद्' इतिमूले।

4 मूले 'सतीघ्र्ना' इत्यस्पष्टार्थकः पाठः।

सत् द्वाभ्यां न्यूनं चतुः पञ्चादशदधिक्शतद्वयमुक्ताधाुष्णिगन्तानांसप्तानांसंख्या। एवमन्यत्रोह्यत्।

अथपूर्व छन्दोदृष्ट्योतरछन्दसः संख्यामाह।

परेण[1] पूर्णम्। (8-18)

यस्य छन्दसो यत्संख्यानं तद्विगुणीकृतं पूर्णमेव न तु ह्यूनं परेऽनन्तरे छन्दसि संख्याानं वोद्धव्यम्, यथा गायत्रीसंख्या द्विगुणिता उष्णिह[2] उष्णिहः संख्या द्विगुणिमाऽनुष्ट्भ इति।

तदयं संग्रहः।

प्रस्तारो द्वाविहोक्ताया अत्युक्तारचतुर्विधः।

अष्टौमध्या प्रतिष्ठायाः षोडोक्ता विवेचकेः।।

द्वा त्रिंशस्सुप्रतिष्ठायः गायठ्या सयुगो रसः। (64)

उष्णितो गजबाहुक्ष्माऽनुष्टुभोरसबाणदोः। (256)

बृहत्याभुउ्भूवाणो (512) पङ्क्तेर्वेदाक्षिखन्दवः। (024)

गजाब्धि खंभुजास्त्रिष्टुप् (2048) रसांकरवपयोधयः। (4096)

जगत्यतिजगत्या रूस्तुभुजकिन्दुमहीधरः। (8/92)

शक्यर्यांवेदमातङ्गरामर्न्तुं रजनीकराः। (6384)

मातङ्गर्तुतुरङ्गाजिरामेः (32768) स्यादतिशक्वरी

अष्टीरसबृहद्धानुवाणवाण रसैर्भवेत् (65536)

अत्यष्टिर्बाहुतुरग ख चन्द्रदहनेन्दवः। (131072)

धृतिः त्रुतिपयेधीन्दुनयनर्न्तु विलोचनैः। (262144)

कथितातिधृतिर्नागानागाक्षिश्रुतिदोः शराः। (524288)

रसस्वरेषुमातंगवेदाकाशेन्दवः कृतिः। (048576)

प्रकृतिर्भुजबाणेन्दुमुन्यङ्कवियदक्षिाभिः। (2097152)

आकृतिवेदरवाग्यब्धिग्रहशीतांशुतागराः। (4194304)

---

1 मूले 'परेपूर्णम्' पाठः।

2 न्यूनः पाठः।

विकृतेर्नागखरसवसुनागाग्नि पर्वताः। (8388608)

संकृती रसचन्द्राक्षिमुन्यृष्यषिरसेन्दवः। (1677216)

भुजाग्निबुतिवेदाक्षे[1]र्ष्वग्निरामेरभिकृतिः। (33554432)

उत्कृतिर्वेदरव[2]नागरवेन्दुस्वरर्त्तवः। (67108864)

समावृत्तस्य संख्यैवं षडिंवंशाान्तमुदाहृता।

रामाक्षिस्वरमुन्येकद्वयबिधारामसुधााकराः। (34217723)

इति संख्या।

अथ द्विसषत्वा समाप्तिं सूचयन्नेवेकद्वित्रिलघुक्रियासिद्धये मेरूप्रस्तारमााहपरे[3]पूर्णमिति। (8-19)

उपर्य्येकं चतुरस्रकोष्ठंविलिख्य तदधो नलमयन्तीक्रीडादिशा उभयतोऽर्द्ध निष्क्रान्तं कोष्ठद्वयं लिखेत्। तस्याप्यधस्यात् तथौव कोष्ठत्रयं लिखेत्। तत्र च मध्येकोष्ठत्रयं लिखेत् तत्र च मध्यकोष्ठं तथा लिखेत् यथोपरितन कोष्ठयोरर्द्धा भागं स्पृशाति एवमुत्तरोत्तरपङ्क्तिष्वपि यथेष्टं कृतेषु मध्य कोष्ठानि यथा स्व स्व परिकोष्ठयोरर्द्धाद्धभााञ्जिलेख्यानि। तत्र प्रथमे कोष्ठे एकं संख्यापरिज्ञानमात्रार्थे विन्यस्य सूत्रमिदं प्रवर्त्तयेत्। पूर्व कोष्ठयोः यथासंख्यानं तद्यथा स्व परकोष्ठे पूर्णन्यस्य विद्यातदिति सूत्रार्थः। तेनोभयोः कोष्ठयोरेकैक संख्यां विन्मयस्य तृतीय पङ्क्तेर्मध्यकोष्ठे उपरितनोभयकोत्रठांशभागित्वात् तत् कोष्ठद्वयसंख्ये एकीकृत्य द्विसंख्यां न्यसेत् । सर्वत्र च पर्यन्तकोष्ठयोरेकसंख्यैव लेख्या। चतुर्थपङ्क्तौ च मध्यकोष्ठयोः पूर्वमुक्ता त्रि संख्यांलिखेत्। पञ्चमपक्तौ द्वितीये कोष्ठे भूः संख्या तृतीये षट् संख्या चुतर्थे चुतः संख्यामेवमधोधः पङ्क्तिष्वप्यूह्यम् तत्र द्वितीयापङ्क्तिरेकाक्षरस्य तृतीयादिर्यथाक्रमं त्रयक्षरादेः। तदेवमेकाक्षरै छन्दसि एकं गुरुवृत्तमेकं लघु, द्वयक्षरे- एकं सर्वगुरु एकंसर्वलघु, त्र्यक्षरे- एकं सर्वगुरुस्त्रीण्येकलघूनि श्रीणिद्विलघूनि एकं सर्व लघु, चतुरक्षरे एकं सर्वगुरु चत्स्वार्येक लघूनि षट् द्वि लघूनि चत्वारि त्रि लघूनि एकं सर्व लघु, एवं सर्वत्र

---

1 'अक्ष' इत्यस्यात्र पञ्च संख्येति अभिप्रायः

2 यद्यपि शब्दस्य शून्र्यायो भवति किन्तु पूर्वसंख्याद्विगुणितंकृत्वा समाकलनेनात्र षट् संख्या भवति।

3 मूले 'परि' इति पाठः।

प्रथम चरमवृत्ते सर्वगुरु सर्वलघुके मध्यानि तु यथाक्रममुपरितन कोष्ठानामेकादिगणनां स्व स्व स्यितसंख्यां वा पुरस्कृत्य इयन्त्येक लघूनि, इयन्ति द्वि लघूनि, इयन्ति त्रिलघुनि, इयन्ति चतुर्लधूनीत्यादि वाच्यम् सर्वत्र यावन्ति यत्संख्यलघुनि तावन्ति तत्संख्यगुरुण्धि लाभर्थ्यात्।

इति समाप्तौ।

इति लघु क्रिया। एते च लघुक्रियाङ्कामिलित्वा वृत्तसंख्या भवन्तीति शिवम्।

वागीश्वरः शुभमतिः कृतिचक्रवर्तो
भागीरथी स्वयमजीजनदीशदालम्।
एलांल गोड गुरुमण्डनृवंशजातः,
संक्षपेपतः प्रतिजगौ कृपयन्तु सन्तः।।1।।
यो नीवाारक शूक (सुक्ति) पावक शिखामध्ये वसन् विश्वभुम्,
भूताानि भ्रमवत्यखण्डमहिम व्याक्रीडलोकत्रयः।
नित्येच्छाकृति बुद्धिमान् स निजसत्काव्याच्च पृत्यानया,
सोमः सोम कला किरीट कुतुकी प्रीणातु नः शङ्करः।।2।।

इति श्री भट्टाचार्य श्रीमहादेवकृतायां कविदयितायां पैङ्गलवृतावष्टमोऽध्याायः।

परिपूर्णश्चायं छन्दोवृत्तिग्रन्थाः।
इमाग्रेक्षे (1712) तपस्य कृष्णयुग्दशमीशनो।
प्राणनाथो हरिप्रदे छन्दोवृत्तिमलीखिम् ।।

❖❖❖